अथ वीरमित्रोदयभक्तिप्रकाशस्य

विषयानुक्रमणिका ।

विषयः	पृष्ठाङ्कः
सामान्यतो भक्तिनिर्णये ।	
प्रथमश्लोकेन श्रीकृष्णनमनात्मकमङ्गलोपन्यासः ।	
द्वितीयश्लोकेन श्रीशिवस्मरणात्मकमङ्गलोपन्यासः ।	,, १
तृतीयश्लोकेन हरिहरात्मकेश्वरसङ्कीर्तनरूपमङ्गलोपन्यासः ।	
चतुर्थश्लोकेन श्रवणमननासमर्थस्यानर्थनिवृत्त्यै भगवद्भजनमित्युक्तिः ।	
तत ईश्वरस्य श्रीकृष्णात्मना परीक्षिद्गजेन्द्रद्रौपदीपरित्राणात्मककार्योपनिबन्धमुखेन कारुणिकत्वप्रदर्शनम् ।	
तत ईश्वरस्यैव शिवात्मनाऽऽदेवासुरमाचकीटपतङ्गमविशेषेण कारुण्यप्रदर्शनम् ।	
ततश्चतुर्मुखहृत्कमलाधिष्ठितस्य भगवतो वेदप्रकाशकत्वजगत्स्रष्टृत्वकथनम् ।	
एकस्यापीश्वरस्य मायागुणोपाधिकी ब्रह्मविष्णुमहेश्वर इति तिस्रः संज्ञा इति प्रतिपादनम् ।	
काशीमरणन्यायेन तत्त्वज्ञानद्वारा मुक्तिप्रयोजकभगवद्भक्तिनिरूपणप्रतिज्ञा ।	
भक्तेर्मुक्तिहेतुत्वाक्षेपः ।	
तत्त्वज्ञाने श्रवणमननादेर्हेतुत्वोपन्यासमुखेन विरक्तस्यैव श्रवणमननादावधिकाराभिधानेनाविरक्तस्य भक्तेरेव तत्त्वज्ञानद्वारा मुक्तिहेतुत्वोक्तिः ।	
तत्र प्रमाणप्रदर्शनम् ।	२
साधनभक्तेर्धर्मसाध्यत्वकथनम् ।	४
साधनचतुष्टयसंपत्तेः पूर्वं कर्मानुष्ठानं तत्संपत्तावध्यात्मविचार इति प्रतिपादनम् ।	५
वैष्णवलक्षणम् ।	६
वैष्णवानां हरिकथाश्रवणकीर्तनादौ मुख्योऽधिकारः, कर्मसु स्वल्प इत्यभिधानम् ।	,,
भक्तेः प्रमाणाजन्यत्वाक्षेपः ।	,,
तत्र समाधिः ।	७
भक्तेः श्रवणादेश्च समुच्चयाशङ्का ।	८
तयोस्तत्त्वज्ञानोत्पत्तौ वैकल्पिककारणत्वप्रतिपादनोपक्रमः ।	९
मुक्तिहेतुतत्त्वज्ञाने मार्गद्वयोपसंहारः ।	२३
भक्तेः सत्सङ्गसाध्यत्वकथनम् ।	,,
श्रवणादीनां समुच्चयनैरपेक्ष्ययोः प्रमाणाभिधानम् ।	२४
समुच्चिताया एकैकस्या वा भक्तेर्मुक्तिहेतुत्वोक्तिः ।	२७
असकृत्सेविताया एव भक्तेर्मुक्तिहेतुत्वोक्तिः ।	२८
भक्तानां भगवत्समीपगमनम् ।	२८
भगवत्समीपगमने को मार्ग इत्याशङ्का ।	२९
तत्र समाधिः ।	,,
भगवत्समीपं गतानां भगवदनुग्रहात्तत्त्वज्ञानद्वारा मुक्तिरित्यभिधानम् ।	,,
सामान्यभक्त्युपसंहारः ।	,,

विषयः — पृष्ठाङ्कः

श्रवणात्मकभक्तिनिर्णये ।

साध्यसाधनभेदेन भक्तेर्द्वैविध्यम् । ३०
साधनभक्तेर्नवविधत्वोत्कीर्तनम् । ,,
श्रवणलक्षणम् । ,,
श्रवणगोचरप्रवृत्तेर्नानाविधकर्मसाध्यत्वोत्कीर्तनम् । ,,
श्रवणविमुखानां निन्दाभिधानम् । ,,
श्रवणस्य पापक्षयसाधनत्वे प्रमाणाभिधानम् । ,,
श्रवणस्य फलभक्तिसाधनत्वोक्तिः । ३१
श्रवणस्याध्यात्मविचारनैरपेक्ष्येणैव भगवत्साक्षात्कारहेतुत्वोक्तिः । ,,
श्रवणस्य वैराग्यहेतुत्वम् ।
श्रवणासक्तानां मोक्षेऽपि स्पृहाभावप्रतिपादनम् । ,,
भगवतो गीयमानगुणग्रामश्रवणफलम् । ३२
भवद्‌गानानृत्यादीनां निषेधाविषयत्वप्रतिपादनम् । ,,
तत्र प्रमाणोपन्यासः । ,,
अपशब्दादिभिरपि भगवद्गुणगानादौ न दोषः । ३४
चैद्यादीनां भगवद्द्वेषादिजन्यानुषङ्गिकस्मरणात्सद्गतिरिति कथनम् । ३५
भगवद्गुणनामश्रवणस्य निःश्रेयसहेतुत्वोपसंहारः । ,,

संकीर्तननिर्णये ।

सङ्कीर्तनलक्षणम् । ३६
सङ्कीर्तनस्य सत्त्वशुद्धिहेतुत्वम् । ३७
सङ्कीर्तनाकरणे निन्दाश्रुतिः । ३७
सङ्कीर्तनस्य फलभक्तिजनकत्वम् । ,,
सङ्कीर्तनस्य वैराग्यहेतुत्वम् । ,,
सङ्कीर्तनस्य भगवत्साक्षात्कारहेतुत्वम् । ,,

विषयः — पृष्ठाङ्कः

सङ्कीर्तनस्य संसारनिवर्तकत्वकथनम् । ३६
सङ्कीर्तनस्य ज्ञानद्वारा मुक्तिहेतुत्वकथनम्। ३८
सङ्कीर्तनस्यान्तःकरणशुद्धिमारभ्य मुक्तिपर्यन्तप्रणालिकाकथनम् । ,,
सङ्कीर्तनस्य कलौ युगान्तरीययज्ञादिजन्यफलसाधकत्वोक्तिः । ४२
तत्तत्कार्यविशेषे तत्तन्नामसङ्कीर्तनम् । ४४
सङ्कीर्तनस्य पापक्षयसाधनतायां प्रमाणानि । ४५
पौराणानामर्थवादानां स्मार्तप्रायश्चित्तविरोधाऽऽशङ्का । ४७
तत्समाधानम् । ४८
स्मार्तप्रायश्चित्तविधीनामानर्थक्याशङ्का । ५१
तत्समाधानम् ,,
हरेर्नाम्न्यर्थवादत्वमभिदधतां दोषोत्कीर्तनम् । ५३
सङ्कीर्तने भगवदनुरागस्याधिकारिविशेषणत्वाभिधानम् । ,,
तत्र विप्रतिपत्तिः । ५४
सङ्कीर्तनस्य पापक्षयाद्यनेकफलकत्वं मुक्तिफलकत्वं चेत्युपसंहारः । ६१

स्मरणनिर्णये ।

स्मरणलक्षणम् । ६१
तस्य कर्तव्यत्वम् । ,,
तत्रप्रवृत्तेर्नानासत्कर्मसाध्यत्वम् । ,,
स्मरणस्याऽऽवृत्तेः सत्त्वशोधकत्वम् । ,,
तस्य मुक्तिहेतुत्वम् । ६२
सकृत्स्मरणस्याघनाशकत्वम् ।
स्मरणप्रकारः । ,,
अवस्थाविशेषे सकृत्स्मरणमपि मुक्तिहेतुः । ,,
भगवत्स्मरणस्य कर्मसाद्गुण्यार्थकत्वम् । ,,
स्मरणस्य फलान्तरजनकत्वमपीति । ,,

विषयः	पृष्ठाङ्कः
पादसेवननिर्णये ।	
पादसेवननिर्णयः ।	६५
तस्य कर्तव्यता ।	,,
तत्र वैगुण्यशङ्काविरहः ।	,,
पादसेवनस्यान्तःकरणशोधकत्वम् ।	६६
पादसेवनस्य वैराग्यहेतुत्वम् ।	,,
पादसेवनस्य संसारदुःखनिवर्तकत्वम् ।	,,
पादसेवनस्य पुरुषार्थचतुष्टयहेतुत्वम् ।	,,
फाल्गुणकृष्णप्रतिपदि चैत्रसितैकादश्यां वा दोलोत्सवः ।	६७
चैत्रशुक्लद्वादश्यां दमनकोत्सवः ।	,,
तत्र प्रयोगः ।	,,
तत्प्रकारश्च ।	
माधवे जलक्रीडोत्सवः ।	६९
प्रसङ्गाद्वसन्तपुष्पमहिमा ।	७०
आषाढशुक्लद्वादश्यां शयनोत्सवः ।	,,
तत्र प्रयोगः ।	,,
श्रावणशुक्लद्वादश्यां पवित्रारोपणोत्सवः ।	७१
तत्र प्रयोगः ।	७२
भाद्रशुक्लैकादश्यां द्वादश्यां वा कटदानोत्सवः ।	७५
आश्विनशुक्लदशम्यां सीमातिक्रमणोत्सवः ।	७६
कार्तिकोत्सवः ।	,,
भगवत्प्रबोधोत्सवः ।	७७
तत्र प्रयोगः ।	७८
जयन्तीसंक्षेपः ।	७९
अर्चननिर्णये—	
अर्चनलक्षणम् ।	८०
अर्चनस्य फलम् ।	,,
शालग्रामार्चनफलम् ।	८१
पूजास्थानानि ।	,,
तत्प्रयोगः ।	,,
मातृकान्यासः ।	८८
बहिर्मातृकान्यासः ।	८९
केशवादिन्यासः ।	,,
प्राणायामाः ।	९०
मन्त्रन्यासः ।	९१
विभूतिपञ्जरन्यासः ।	९२
मूर्तिपञ्जरन्यासः ।	,,
मध्याह्नपूजा ।	१०१
रात्रिपूजा ।	,,
पुरश्चरणसंक्षेपः ।	१०२
संक्षिप्तरामपूजाविधिः ।	१०४
नृसिंहपूजनम् ।	१०८
शिवपूजा ।	१११
यथोक्तपूजाया असम्भवे पत्रपुष्पादिभिर्भगवतोऽर्चनम् ।	११८
वन्दननिर्णये ।	
वन्दनस्य फलम् ।	११९
अष्टाङ्गप्रणामकथनम् ।	१२०
वन्दनस्य पृथगपि फलसाधनत्वम् ।	१२०
दास्यनिर्णये ।	
दास्यलक्षणम् ।	१२१
दास्यस्य भगवत्सन्तोषद्वारा मुक्तिहेतुत्वकथनम् ।	,,
कर्मत्यागपरवाक्यानां भगवदेकशरणतापरताप्रतिपादनम् ।	१२३
तत्राचार्याणां मतम् ।	,,
सख्यनिर्णये ।	
सख्यस्य लक्षणम् ।	१२४
सख्यस्य सर्वानर्थनिवर्तकत्वम् ।	१२५
सख्यस्य भक्त्यन्तरेण सह समुच्चयः ।	१२६
आत्मनिवेदननिर्णये ।	
आत्मनिवेदनलक्षणम् ।	१२७

विषयः	पृष्ठाङ्कः
आत्मनिवेदनस्य फलम् ।	१२७
आत्मनिवेदनादिक्रियात्मकभक्तेर्ज्ञानप्राप्ति-द्वारा मोक्षहेतुत्वकथनम् ।	१२८
अवान्तरभक्तिभेदनिर्णये ।	
नवविधभक्तीनां तामस्यादिभेदेन त्रिविधत्वकथनम् ।	१२९
त्रिविधानामपि प्रत्येकं त्रिविधत्वम्	,,
श्रवणादिनां प्रत्येकं नवविधत्वकथनम् ।	,,
उत्तममध्यमाधमभेदेन भक्त्यधिकारिनिरूपणम् ।	१३१
भजनीयनिर्णये ।	
भजनीयतयेश्वरनिरूपणम् ।	१३४
सदाशिवस्य सर्वेश्वरत्वम् ।	१३५
श्रीनारायणस्यापि परमेश्वरत्वम् ।	१३६
ब्रह्मविष्णुमहेश्वराणामभेदप्रतिपादनम् ।	,,
गङ्गागौर्योरभेदप्रतिपादनम् ।	,,
भेददर्शितां निन्दा ।	१४५

विषयः
मायाशबलस्यैव गुणविशेषोपाधिभिर्विष्ण्वादिरूपत्वे प्रमाणप्रदर्शनम् ।
नारायणपरब्रह्मेत्यत्र समासनिर्णयः ।
महाज्ञेयमित्यत्र समासनिर्णयः ।
नारायणपर इत्यत्र समासनिर्णयः ।
नारायणपरमात्मनोऽभेदकथनम् ।
नारायणस्य जगदीश्वरत्वे प्रमाणोपन्यासः ।
भगवद्गीतायाः शिवपरत्वाशङ्का ।
तन्निराकरणपुरःसरं श्रीकृष्णपरत्वोपवर्णनम् ।
हरिहरतदवतारविशेषाणामीश्वरत्वप्रतिपादनम् ।
ब्रह्मविष्णुमहेशानशब्दोदितानामवतारविशेषाणां ध्यातृत्वं लोकशिक्षार्थमिति प्रतिपादनम् ।
ग्रन्थोपसंहारः ।

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय

बनारस सिटी ।

श्रीगणेशाय नमः ॥

वीरमित्रोदयभक्तिप्रकाशः ।

नमामि नन्दनन्दनं समस्तविघ्नभञ्जनम् ।
व्रजस्थलोकरञ्जनं हसन्तमम्बुजाननम् ॥ १ ॥
गिरीशकन्यकापतिं गिरिस्थितिं त्रिलोचनम् ।
स्मरामि चेतसा हरं भवाब्धिपाशमोचनम् ॥ २ ॥
नीलकायः क्वचिन्नीलकण्ठः क्वचित्
पीतवासाः क्वचित्क्वापि चर्माम्बरः ।
एक एवेश्वरोऽनेकरूपास्तनूः
संप्रगृह्णात्यमुं मुक्तिसिद्ध्यै भजे ॥ ३ ॥
सकलभवनिवृत्तं चित्तमेतन्न यस्माद्
श्रवणमननकर्मानुष्ठितिः स्यान्न तस्मात् ।
विषयकृतविषादो नापि सोढुं प्रशक्यो
हरिपदभजनं तन्निर्वृत्यै प्रकुर्मः ॥ ४ ॥

यः किल सकलश्रुतिस्मृतिप्रभृतिप्रमाणप्रथितप्रकृष्टस्वगुणगणश्रवणाचरणप्रवणतादूरीकृतदुरितं परीक्षितमुदरे दरचक्रपाणिरपालयद् ब्रह्मास्त्रात् ।

येन च चक्रेण शक्यमपि सरोवनकाद्बलवत्तरजलचरधृतचरणगजराजमोचनमकारि कारुण्यात् ।

यश्च द्यूतार्जितपाण्डुसुतद्यूतकुरुसंसदि नीतया द्रुपदसुतया कृतं—

हे कृष्ण ! द्वारकावासिन् क्वासि यादवनन्दन ।
इमामवस्थां संप्राप्तां कथं मां त्वं समीक्षसे ॥

इत्याक्रोशनं स्मरन्,

ऋणमेतत्प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनम् ॥

इत्युदाजहार संहारमिव कुरूणां कुर्वन् दीनदयालुः ।

यस्य करकमलयुगलाकलितहालाहलमपात् लालयिष्यकच्छरणगतान् दितिसुतादितिसुतान्।

यस्मानन्दवनचरनर—वनचर—खचर—कीटपतङ्गानसुव्यपगमानन्तरमतिदुष्करतरतपश्चरणपरनरदुर्लभतरमपि झटिति नयति स्वपदम्।

यस्य कमलापतिनाभिकमलप्रभवचतुर्मुखहृत्कमलस्थितः सन् वेदानस्मै प्रकाशितवान्, चकार च कारणकार्य्यात्मकमदो जगत्।

यस्य मायातद्गुणवानावलितः (१)सर्वचित् सर्वकृत् सर्वनियन्ता सर्वपालकः सर्वसंहर्ता सन् रमापतिरिति उमापतिरिति विधिरिति च गीयते। यत्स्वरूपञ्च स्पष्टतरं भजनीयप्रकरणे निरूपयिष्यते।

तस्य तत्रभवतो भगवतो भजनं दुःखासुकस्वसमकालसुखयुतं सत् काशीमरणन्यायेन दुस्तरतरभवजलनिधितरणकरणज्ञानजनकमिति सत्तर्कसचिवैरनेकप्रमाणैर्निरूप्यते।

तादृशज्ञानस्य च यद्यपि श्रवणमननादिकमुपायः। आत्मा वारे द्रष्टव्य इति दर्शनमनूद्य "श्रोतव्य" इत्यादिना श्रवणमननादेर्विधानात्। तथापि तस्मात् "ब्राह्मणो निर्वेदमायात् शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्" इत्यादिना वैराग्योपशमाद्युपेतं प्रत्येव श्रवणादेर्विधानात् तस्यैव श्रवणमननादि मुक्तिजनकज्ञानहेतुः राजसूय इव "राजा राजसूयेन स्वराज्यकामो यजेत" इति वचनात् राज्ञः फलहेतुः। यस्तु विषयेषु न निर्विण्णो नापि तदेकप्रवणः केनचिद् भाग्योदयेन हरिकथाश्रवणसंकीर्त्तनादौ संजातश्रद्धः तस्य श्रवणकीर्तनादिरूपा साधनभक्तिरेव उक्तविधज्ञानहेतुः, तत्र तत्र श्रीभागवतादौ स्वयं भगवता प्रतिपादितत्वात्। तथाहि।

श्रीभागवते,

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्विण्णो न चासक्तो भक्तियोगोऽस्य सिद्धिदः॥ इति।

यदृच्छयेति केनापि भाग्योदयेनेत्युक्तं श्रीधरस्वामिभिः।

तथा,

जातश्रद्धो मत्कथासु निर्विण्णोऽन्येषु कर्मसु।
वेद दुःखात्मकान् कामान् परित्यागेऽप्यनीश्वरः॥
ततो भजेत मां प्रीत्या श्रद्धालुर्दृढनिश्चयः।

---

(१) मायातद्गुणरूपोपाधित इति पाठो युक्त इति प्रतिभाति।

भक्तौ च सर्वं भविष्यतीति दृढनिश्चयवान् ॥

जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन् ।
प्रोक्तेन भक्तियोगेन भजतो मां सकृन्मुने ॥
कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ।
तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ इति ।

मयि आत्मा चित्तं यस्य । ज्ञायते ऽनेनेति ज्ञानम्=अध्यात्मविचारः, न तु ज्ञानस्यैवायं निषेधः "मयि दृष्टे" इति स्वयमेवोक्तेः । गीतासु च,

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ (अ० १० श्लो० ११)

इति ज्ञानापेक्षाया उक्तत्वात् । श्रेय इति=श्रेयः साधनमित्यर्थः । इहेति परित्यागेऽप्यनीश्वर इत्यवस्थायाम् । तदा तदनधिकारात् । सगुणब्रह्मविचारस्तु भक्तावुपयुज्यत एव भजनीयनिर्णयं विना भजनायोगादित्याशयेन प्राय इत्युक्तम् । अत एवोक्तम्—

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ इति ।

(गी० अ० १० श्लो० ८)

न च "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इतिवत् भजनस्यैव विचाराङ्गत्वं किं न स्यादिति वाच्यम् । क्त्वापेक्षया भजनीयनिर्णयं विनेत्याद्युक्तसामर्थ्यस्य बलीयस्त्वात्,

मच्चित्ता मद्गतप्राणाः बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

(गी० अ० १० श्लो० ८)

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥

(गी० अ० १० श्लो० १०)

इति तत्रैव भजनस्य फलत्वावगमाच्च, अतश्च सगुणब्रह्मविचारस्योपयोगेऽपि न निर्गुणब्रह्मविचारो युक्तः तदनधिकारादित्युक्तं "न ज्ञानं न च वैराग्यम्" इत्यनेन । अत्र हेत्वन्तरं वदन् तदधिकारसम्पादकविविदिषार्थकर्मानुष्ठानस्याप्यनादरमाह अग्रिमश्लोकेन ।

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।

योगेन दानधर्म्मेण श्रेयोभिरितरैरपि ॥
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । इति ।

अत्र कर्म्मभिस्तपसा दानधर्म्मेणेति विविदिषावाक्योक्तधर्म्मानुष्ठानपरामर्शः । धर्म्मानुष्ठानमात्रपरामर्शे "स्वधर्म्मस्थो यजन् यज्ञैः" "अस्मिन् लोके वर्त्तमानः स्वधर्म्मस्थ" इत्येतदध्यायस्थपूर्वश्लोकविरोधात् ।

वेदोदितानि कर्म्माणि कुर्य्यादीश्वरतुष्टये ।
यथाश्रमं मुक्तिकामः प्राप्नोति परमं पदम् ॥

इति बृहन्नारदीयवचनविरोधात । ईश्वरार्पणबुद्ध्या कर्म्मानुष्ठानस्य दास्यरूपभगवद्भक्तित्वेन प्रतिपादनात् । अत एव "सर्वधर्म्मान् परित्यज्य" इत्यत्र विधिकैङ्कर्यं त्यक्त्वेत्युक्तं श्रीधरस्वामिभिः । एवञ्च यत् विविदिषोद्देशेनानुष्ठितैः कर्म्मभिः सत्वशुद्धिरूपं फलं लभ्यते यच्च वैराग्याद्युपेतनिर्गुणविचारात् तत्वज्ञानरूपं फलं, तत्सर्वं पूर्वानुष्ठितनानाधर्म्मजन्यशुद्धवासनातः, ईश्वरार्पणकर्म्मानुष्ठानरूपमद्भक्तियोगेन शुद्धसत्वः सन् मद्भक्तः=कृतमत्कथाश्रवणकीर्त्तनादिर्लभते । ईश्वरार्पणबुद्ध्या कर्म्मानुष्ठानमपि, "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्" इत्यादिना भगवद्धर्म्मत्वेन प्रतिपादनादीश्वरभक्तिरेव , सर्वापि च साधनभक्तिः पूर्वानुष्ठितधर्म्मसाध्यैव,

दानव्रततपोहोमजपस्वाध्यायसंयमैः ।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥

इत्यविशेषवचनात् । विविदिषापक्षादस्य पक्षस्याध्यात्मविचाराच्च विशेषमाह । अञ्जसा=अनायासेन । अध्यात्मविचारस्य वैराग्यादिसापेक्षत्वेनाऽऽयासात् । विविदिषोद्देशेन कर्म्मानुष्ठानेऽङ्गस।(१)कल्यमप्यपेक्षितं काम्यत्वात् नास्मिन् पक्षे "स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात्" "कर्म्मशुद्धिर्मदर्पणम्" इत्यादिना गाधर्क्कर्य्यादिव [विधिकैङ्कर्यनिरपक्षेणैव पापक्षयरूपकर्मशुद्धेः प्रतिपादनात् काम्यानि पुनः फलाभिसन्धिरहितान्यप्यङ्गविधिकैङ्कर्य्यादेव] क्रियन्ते तैश्च पापक्षयो जन्यते, "धर्म्मेण पापमपनुदति" येन केनचन यजेत, अपि वा दर्विहोमेनानुपहतमना एव भवति" इत्यादिवचनात् । पापक्षये च श्रवणादिसामग्रीसमवधाने श्रवणादौ प्रवर्तते तदभावे "कर्मणा पितृलोक" इतिवचनादुत्तमलोकं गच्छतीत्याश्रीयते तदेतद्भक्तिपक्षेऽपि तुल्य-

(१) अङ्गवैगुण्ये फलाभावात , तदुक्तं न्यायदर्शने "कर्तृकर्मसाधनवैगुण्यात्" इति ।

म्, श्रवणकीर्तनादिभक्तिसाधनसमवधाने भक्तौ प्रवर्तते इति वक्तुं शक्यत्वात् । विविदिषापक्षे ज्ञानोद्देशेनानुष्ठितकर्म्मभिः सत्वशुद्धिं प्रसाध्य श्रवणमननादाववश्यं प्रवर्तते इति यत्, तदपि भक्तौ वक्तुं शक्यम्; अध्यात्मविचारवत् भक्तेरपि ज्ञानसाधनत्वाविशेषात् । यस्तु आदित एव केनचित् भाग्योदयेन ईश्वरतुष्टयै कर्म्मानुष्ठाने भगवद्दास्यबुद्ध्या प्रवर्तते न च विशुद्धसत्वः श्रवणकीर्तनादौ । [अविशुद्धसत्वः] श्रवणकीर्तनादौ वा प्रवृत्तस्तेन विशुद्धसत्वः पश्चात्तदेकप्रवणो भवति तस्य विनैव ज्ञानोद्देशेन कर्म्मानुष्ठानं, विनैव वाध्यात्मविचारं तत्फलप्राप्तिरित्येतावत् "यत्कर्म्मभिर्यत्तपसा" इत्यनेनोच्यते । एवमीश्वरार्पणबुद्ध्या कर्म्मानुष्ठानेऽपि यदि श्रवणमननादिसामग्रीसमवधानं क्रियते । एवञ्चेश्वरार्पणबुद्ध्या कर्म्मानुष्ठानरूपा भक्तिः संयोगपृथक्त्वन्यायेनाध्यात्मविचारेऽप्युपयुज्यत इत्यपि वक्तुं शक्यम्, अतश्चेश्वरतुष्टयै ज्ञानोद्देशेन वा कर्म्मानुष्ठानस्य भक्तावध्यात्मविचारे चोपयोगे एतावान् विशेषः, यदा विविदिषोद्देशेनैव कर्म्मानुष्ठानं निर्गुणविद्यायामेव चात्यन्तादरः, तदा यावत्साधनचतुष्टयसम्पत्तिस्तावत्तदनुष्ठानं, तत्सम्पत्तौ संन्यासोत्तरकालमध्यात्मविचारे प्रवृत्तिः, तदुक्तम्—

आरुरुक्षोर्मुनेर्योगं कर्म्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ इति ।

[गी० अ० ६ श्लो० ३]

तावत्कर्म्माणि कुर्वीत न निर्विद्येत यावता ॥ इति ॥
"वेदानिमं च लोकममुं च परित्यज्यात्मानमन्विच्छेत्" ।
त्वंपदार्थविवेकाय संन्यासः सर्वकर्म्मणाम् ।
श्रुत्या विधीयते यस्मात्'

इत्यादिना अध्यात्मविचाराङ्गत्वेन संन्यासविधानाच्च । यदा तु ईश्वरार्पणबुद्ध्यैव कर्म्मानुतिष्ठति ।

गमयतु नरकं वा स्वर्गातिं वा तनोतु
क्षिपतु स परमात्मा यत्र कुत्रापि चास्मान् ।
अलमलमनया नश्चर्चया किन्तु कर्म्म
सततसुखमयस्य श्रीपतेरेव सेवा ॥

इत्येवं भगवत्सेवायां केवलमादरस्तदा तैः कर्म्मभिः श्रवणकीर्तनादिसाधनभक्तौ श्रद्धातिशय उत्पद्यते यस्मिन्नुत्पन्ने भगवत्कथाश्रवणकीर्तनादिरसिकस्य वैष्णवाग्रगण्यस्य सत्यपि विषयान्तरसन्निधाने

चित्तं न चलति, यथोक्तं—

त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दात् क्षणनिमिषार्धमपि स वैष्णवाग्र्यः।
॥ इति।

त्रिभुवनविभवहेतवेऽपि=त्रैलोक्यराज्यार्थमपि। लवार्धमपि भगवत्पदारविन्दभजनाद् यो न चलति स वैष्णवाग्र्यः। ननु लवार्धमात्रभजनोपरमे चैतावान् लाभो भवेत् तत्कुतो न चलेत् तत्राह अकुण्ठस्मृतिः=भगवत्पदतोऽन्यत्सारं नास्तीत्येवंरूपा अकुण्ठा अनपगता स्मृतिर्यस्य सः भगवत्पदारविन्दादन्यत्सारं नास्तीत्येवं कृतः, अत एव आह अजितात्मसुरादिभिरिति अजिते हरावेवात्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात् किन्तु केवलं मृग्यात् तदपेक्षया सर्वस्य तुच्छत्वं स्मरन् यो न चलतीत्यर्थ इत्युक्तं, श्रीधरस्वामिभिः। तादृशवैष्णवाग्रगण्यस्य हरिकथाश्रवणकीर्तनादावेव मुख्योऽधिकारः कर्मसु तु स्वल्पः, इत्याशयेनोक्तं—

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते" इति,

इत्युक्तं श्रीधरस्वामिभिः। एवञ्च भगवद्भक्तस्य भगवत्कथारसिकतया काले कथञ्चित्कर्माननुष्ठानं न दोषाय "गौणमुख्ययोर्मुख्यं बलीयः" इति न्यायात्।

स्वपादमूलं भजतः प्रियस्य
त्यक्त्वान्यभावस्य हरिः परेशः।
विकर्म यच्चोत्पतितं कथञ्चिद्
धुनोति सर्वं हृदि सन्निविष्टः॥

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः।
हृद्यन्तस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्।

इत्यादिना भगवान् स्वभक्तानां दोषं नाशयतीति प्रतिपादनाच्च, सोऽयं पुरुषधुरन्धरः अध्यात्मविचारे न प्रवर्तते तत्फले अस्य स्पृहाभावात्। तदुक्तं—,

नैकात्मतां मे स्पृहयन्ति केचित् मत्पादसेवाभिरता मदीहाः।
येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि॥ इति,
न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत्॥ इति।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ इति च ॥

भगवद्भजने तु तद्रसिकतया प्रवर्तते, तद्रसिकत्वं च तदनुष्ठाने परमसुखरूपभगवन्मूर्तिस्फूर्त्या सकलसांसारिकदुःखविगमने चित्तविश्रान्तेः । अत एव भगवद्भक्तेः श्रेयःसाधनत्वेऽपि परमपुरुषार्थत्वम्, ज्योतिष्टोमादीनि हि नानुष्ठानकाले प्रीतिं जनयन्ति ॥

यथोक्तं वृद्धैः ।

अतीव खेदः खलु कर्मकाले
को वेद भावीनि सुखानि कानि ।
कंसारिसंसेवनकाल एव
संसारखेदः प्रशमं प्रयाति ॥

तथा ।

गोविन्दे सुखरूपता प्रतिपदं वेदैः सदोदीर्यते
तानप्यन्यथयन्ति चेत्कुमनसो मिथ्याकुतर्कोक्तिभिः ॥
तस्यानुस्मरणेन यन्नयनयोरानन्दबाष्पोदयो
विश्रान्तिर्हृदये तनुः पुलकिता तन्नान्यथा किं भवेत् ॥ इति ।

नन्वेवमुक्तवक्ष्यमाणप्रमाणैर्भगवद्भक्तजनस्य मुक्तिसाधनतत्वज्ञानहेतुत्वेऽवगतेऽपि तत्स्पृहया तदनुष्ठानाभावाच्च ततस्तज्जन्म स्यात् । यथा ज्योतिष्टोमस्य सर्वफलार्थत्वेऽपि यत्फलस्पृहां विना तदनुष्ठानं न ततो तज्जन्मेति चेत् । न । वेदान्तिमते पितृलोककामनया नित्यनैमित्तिकानां विधानाभावात् तत्स्पृहयानुष्ठानाभावेऽपि तद्धेतुत्ववदुपपत्तेः । यथा धनार्थितया आराधितोऽपि राजा सन्तुष्टः सन् कृपया आराधकशत्रून् तिरस्करोति तथा भगवान् सन्तुष्टः सन् कृपया तत्वज्ञानमुत्पाद्य भक्तानां भवशत्रुं तिरस्करोति, तदुक्तम्—

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ इति ॥

(गी० अ० १० श्लो० ११)

एवकारो भिन्नक्रमः, अहमेव ज्ञानदीपेन नाशयामीति ।

ननु तत्वज्ञानस्य प्रमाणजन्यत्वेन प्रसिद्धेः, भक्तेश्च प्रमाणजन्यत्वाप्रसिद्धेः कथं तस्य ततो जन्म, अध्यात्मविचारेण तु निर्णीतशक्तितात्पर्येभ्यो वेदान्तेभ्यस्तज्जन्म युक्तम्, अत एव "तं त्वौपनिषदं पुरुषं पृच्छामि" इति औपनिषदत्वविशेषणमात्मनः सङ्गच्छते । किञ्च ज्ञानसामान्यसामग्रीमात्रजन्यत्वं स्वतस्त्वं प्रमाया इति सर्वसम्मतम् । भक्तेर्ज्ञानसामग्रीत्वाप्रसिद्धेः स्वतस्त्वभङ्गः । किञ्च शक्तितात्पर्यावधार-

णेन प्रमाणसम्भावनया प्रमाणासम्भावना निवर्तत इति युक्तम् । भग- वद्भजनात्तु तत्त्वज्ञाने कथं तन्निवृत्तिः ।

उच्यते ।

श्रवणकीर्तनादिना भक्तानां हृदि आविर्भूतः परमात्मा भवतीति तत्सम्बन्धात् निर्मलं स्वान्तं तत्त्वाधियं जनयति, "दृश्यते त्वग्र्यया बुद्ध्या" इत्यादिना तस्य प्रमाणत्वप्रसिद्धेः, औपनिषत्वविशेषणं तु, उपनि- षदां मूलभूतप्रमाणत्वादित्युक्तं साम्प्रदायिकैः, अञ्जनादेः, चक्षुःसं- स्कार इव स्वान्तसंस्कारे भगवद्भजनस्योपयोगाच्च स्वतत्त्वभङ्गः । उक्तञ्च ।

श्रीभागवते ।

यथायथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथातथा पश्यति तत्त्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् ॥ इति ।

भगवद्भजनादेव च दुरितनिवृत्त्या प्रमाणासंभावनाबुद्ध्यनुत्पत्तिः, संकीर्त्यमानभगवन्नाम्नो वा तत्त्वज्ञानहेतुत्वं संकीर्तनप्रकरणे वक्ष्यते, अतोऽपि तत्त्वज्ञानस्य प्रमाणजन्यत्वं युज्यत एव । तदेवं भगवद्भक्तेस्त- त्त्वज्ञानोपयोगित्वे न किञ्चिद्बाधकम् । एवञ्च तत्त्वज्ञाने जनयितव्ये भग- वद्भजनमध्यात्मविचारेण सह विकल्पते । न च दर्शादिवत्समुच्चयः किन्न स्यादिति वाच्यम् । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्ये- केन यजिना षण्णां यागानां साहित्येन स्वर्गं प्रत्युपादानादुक्तस्तत्र स- मुच्चयः । न च तथात्रैकपदोपादानमनयोः । तस्मात् "उद्भिदा यजेत पशुकामः" "बलभिदा यजेत पशुकामः" इतिवत् भिन्नवाक्योपात्त- त्वे सति तुल्यार्थत्वाद्विकल्प एव युक्तः । ननु "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" "द्रष्टव्यः श्रोत- व्यो मन्तव्य" इति सत्यपि भिन्नवाक्योपात्तत्वे सति चैकार्थत्वे यज्ञादी- नां श्रवणादिना यथा समुच्चयः, तथा किन्न स्यात् यावद्धि समुच्चयः सम्भवति तावद्विकल्पानुसरणमन्याय्यम् , अष्टविधदोषानिदानत्वात् तस्य, न च "धर्मेण पापमपनुदति इति कर्म्मणां कल्मषनिवर्तकत्व- श्रवणात् श्रवणविध्यपेक्षितसत्त्वशुद्धिहेतुत्वेनोपकार्योपकारकभावाद् युक्तः समुच्चय इति वाच्यम् ।

यत्कीर्तनं यत्स्मरणं यदीक्षणं
यद्वन्दनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं
तस्मै सुभद्रश्रवसे नमोनमः ॥

इति भगवद्भजनस्यापि कल्मषनिबर्हकत्वश्रवणात् । किञ्च—

"यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्" ॥

इति श्रवणोपकारककर्मसादुगुण्यहेतुत्वेन श्रवणादिना समुच्चय एव भक्तेर्युक्तः । किञ्च विविदिषावाक्ये न तावद् ज्ञानोद्देशेन यज्ञादिविधानं सम्भवति एकोद्देशेनानेकविधाने वाक्यभेदप्रसङ्गात् , न चारुण्यादिवाक्यवदेकवाक्यता, अत्र विशिष्टक्रयश्रवणवत् यज्ञादिविशिष्टक्रियान्तराश्रवणात् । नापि दर्शपूर्णमासवाक्यवदेकवाक्यता, एकयज्युपादानेन तत्र वाक्यभेदाभावात् भिन्नपदोपात्तानेककारकविधाने वाक्यभेदः स्यादेव । तदुक्तम्—

अनेकपदसम्बद्धं यद्येकमपि कारकम् ।
तथापि तदनावृत्तैः प्रत्ययैर्न विधीयते ॥ इति ।

अतो यथा "जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इत्यत्राधानानुवादेन जातपुत्रत्वकृष्णकेशत्वविधानेन वाक्यभेदात् जातपुत्रकृष्णकेशपदाभ्यामवस्थाविशेषो लक्ष्यते, एवं यज्ञादिपदैर्विहितं कर्मसामान्यं लक्षयित्वा तद् ज्ञानोद्देशेन विधीयते, इत्युक्तं साम्प्रदायिकैः । यथाहुः—

यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मवृन्दं गृहीत्वा
स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्ति ॥ इति ।

तस्मात् यथा तत्तत्फलसाधनकर्मणां संयोगपृथक्त्वन्यायेन ज्ञानोद्देशेन विधानम् , एवं भगवद्भक्तेरपि ।

सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ।
यद्वाभिरोचते नाम तत्सर्वार्थेषु योजयेत् ॥

इत्यादिभिः सर्वफलोद्देशेन विहिताया ज्ञानोद्देशेन विविदिषावाक्ये विधानात् श्रवणाद्युपकारककर्मतुल्यतैव युक्ता । एवञ्च भक्तेर्ज्ञानसाधनत्वप्रतिपादकान्युक्तवाक्यान्यवयुत्यानुवादः, एकं वृणीते द्वौ वृणीते इतिवत् । ततश्च भक्तिविचारयोः समुच्चय एव युक्तो न विकल्प इति ।

उच्यते—

न तावद् ज्ञानोद्देशेन विहितानां कर्मणां साक्षात् ज्ञानजनकत्वं सम्भवति, अप्रमाणत्वात्, अतो द्वारापेक्षायां "धर्मेण पापमपनुदति" इति कल्मषनिबर्हणमेव द्वारत्वेनाश्रीयते नान्यत् , प्रमाणाभावात् , अतो युक्तः कर्मणां श्रवणोपकारकत्वेन समुच्चयः, भगवद्भक्तेरपि यदि कल्मषनिबर्हणमेव द्वारत्वेन श्रूयेत, तत एवं स्यात् , तस्यास्तु प्रणालिकान्तरं

श्रूयते। तथाहि—

भक्तिः परेशानुभवो विरक्ति
रन्यत्र चैष त्रिक एककालः।
प्रपद्यमानस्य यथाश्नतः स्यु
स्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्॥
इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या
भक्तिर्विरक्तिर्भगवत्प्रबोधः।
भवन्ति वै भागवतस्य राजन्
ततः परां शान्तिमुपैति साक्षात्॥ इति

अस्यार्थो वृद्धैरेवं निरूपितः अत्र प्रपद्यमानस्येति=साधनभक्त्युपन्यासः। भक्तिः=प्रेमलक्षणा परेशानुभवो=भगवन्मूर्तिस्फूर्त्तिः अन्यत्र=गृहादौ, विरक्तिः=एष त्रिक एकस्मिन् काले भवति यथाश्नतो=भुञ्जानस्य तुष्टिः=सन्तोषः, पुष्टिः=धातूनामाप्यायनं क्षुधाध्वंसश्चेत्येष त्रिक एककालो भवति। एवं प्रतिभजनं प्रेमादित्रिके जायमाने जायमाने अनुवृत्त्या नैरन्तर्येणाच्युताङ्घ्रिं भजतो भगवति भक्तिः परमप्रेमलक्षणा यथा प्रह्लादादेः, विरक्तिरपि पूर्णा वान्तकर्त्तुरिव वान्ते, भगवत्प्रबोधः, पूर्णभगवन्मूर्तिस्फूर्तिः, एते त्रयोऽपि भागवतस्यानन्यपरस्य भवन्ति, ततः=पूर्णभगवन्मूर्तिस्फूर्तिपरिपाके। परां शान्तिं=परमोपशमात्मकं भगवत्स्वरूपं साक्षात्कृत्योपैति=प्राप्नोति। पूर्वश्लोकापेक्षया भक्तिविरक्तिभगवत्प्रबोध इति व्युत्क्रमाभिधानमेकफलत्वान्न दोषाय, भगवत्प्रबोधे परिपक्के सति भगवानेव पूर्णानन्दब्रह्मात्मना साक्षात्स्फुरतीति तस्य फलावस्थां सूचयितुं चान्ते निवेशः।

अत एव चाभियुक्ताः।

वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।
तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्॥ इति।

तथान्यत्रापि प्रश्नपूर्वकं नित्यानित्यावस्तुविवेकेन विषयेभ्योविविरक्तस्य तत्रैव स्थितस्य अत एव विचारानधिकारिणः गुरुमुपसन्नस्य तच्छिक्षया भागवतधर्मोश्चानुतिष्ठतस्तदुत्थया श्रवणकीर्तनादिरूपसाधनभक्त्या नारायणचरणपरस्य उत्पन्नप्रेमरूपफलभक्तेरञ्जसैव मायातरणमुक्तम्।

राजोवाच।

अथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः।
तरन्त्यञ्जः स्थूलधियो महर्ष इदमुच्यताम्॥

अकृतात्मभिः=अवशीकृतान्तःकरणैः । स्थूलधियः=स्थूले शरीरेऽहं धीर्येषां ते तथा ।

प्रबुद्ध उवाच ।

कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ।
पश्येत् पाकविपर्यासं मिथुनीचारिणां नृप ॥

पाकस्य विपर्यासम्=फलवैपरीत्यम् । मिथुनीचारिणां=मिथुनीभूय प्रवर्तमानानाम् ।

नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ।
गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥
एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् ।
सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् ॥

सह तुल्येनातिशयेन ध्वंसेन च वर्तमानम् , यथा मण्डलवर्तिनाम्=यथा मण्डलपतीनां मिथः स्पर्द्धादि तद्वत् ।

तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥

शाब्दे=ब्रह्मणि वेदाख्ये न्यायतो निष्णातम् । परे च=ब्रह्मणि अपरोक्षानुभवेन निष्णातम् ।

तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः ।
अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥

गुरुरेवात्मा दैवतं च यस्य । अनुवृत्त्या=सेवया । वस्तुतः आत्मा आत्मप्रदश्चोपासकानाम् ।

सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयञ्च भूतेष्वद्धा यथोचितम् ।

दीनेषु दयां समेषु मैत्रीमुत्तमेषु प्रश्रयं च इत्येवं यथोचितम् ।

शौचं तपस्तितिक्षाञ्च मौनं स्वाध्यायमार्जवम् ।
ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषो येन केनचित् ॥

आत्मेश्वरान्वीक्षां साक्षिरूपेणात्मेक्षां नियन्तृरूपेणेश्वरेक्षाम् । कैवल्यम्=एकान्तशीलत्वम् । अनिकेततां=मठाद्यभिमानराहित्यम् ।

श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ।
मनोवाक्कायदण्डञ्च सत्यं शमदमावपि ॥

श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्म्मणः।
जन्मकर्म्मगुणानाञ्च तदर्थेऽखिलचेष्टितम्।

हरेर्जन्मकर्म्मगुणानाञ्च श्रवणादि।

तदर्थे हर्य्युद्देशेन न तु स्वर्गाद्युद्देशेन। अखिलचेष्टितं सर्वं कर्म-वि· शेषतश्च यजनादि यत् तदर्थं शिक्षेदित्यर्थः।

इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम्।
दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम्॥

दारादीनप्यालक्ष्य परस्मै परमेश्वराय निवेदनं तत्सेवकतया स मर्पणम्।

एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्।
परिचर्यां चोभयत्र महत्सु नृषु साधुषु॥

उभयत्र=स्थावरे जङ्गमे च—

परस्परानुकथनं पावनं भगवद्यशः।
मिथोरतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः॥
स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम्।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्॥

भक्त्या=साधनभक्त्या। सञ्जातया=प्रेमलक्षणया भक्त्या।

क्वचिद् रुदन्त्यच्युतचिन्तया क्वचित्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः॥
इति भागवतान् धर्म्मान् शिक्षेत् भक्त्या तदुत्थया।
नारायणपरो मायामञ्जस्तरति दुस्तराम्॥ इति।

अतो भगवद्भजनस्य तत्वज्ञाने जनयितव्ये श्रवणव्यतिरेकेण प्र· णालिका[न्तर]श्रवणात् तस्य तदुपकारकत्वेन समुच्चयः। एवं भग· वद्गीतास्वपि भगवद्भजनाध्यात्मविचारयोः किं युक्ततममिति प्रश्नपू· र्वकं सत्यपि अध्यात्मविचारस्य तत्वज्ञानहेतुत्वे सक्लेशत्वात् भगवद्भ· क्तेरेव युक्तत्वं तदनुष्ठाने क्लेशाभावादित्युक्तं भगवता।

अर्जुन उवाच। [गी० अ० १२ श्लो० १-७]

एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥

श्रीभगवानुवाच।

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्य्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।
ये तु सर्वाणि कर्म्माणि मयि संन्यस्य मत्पराः ॥
अनन्येनैव योगेन मां ध्यायन्त उपासते ।
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ॥
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥ इति ॥

यज्ञादीनां तु तत्त्वज्ञाने जनयितव्ये पापक्षयहेतुत्वमात्रं श्रूयते न प्रणालिकान्तरम्, अतस्तेषामन्तःकरणशोधकत्वेनोपकारकत्वमात्रम्, अध्यात्मविचारस्य तु तत्त्वज्ञाने जनयितव्ये अन्यैव प्रणालिका साम्प्रदायिकैर्निरूपिता, कर्म्मभिः शुद्धान्तःकरणेन पुंसा साधनचतुष्टसंपत्तौ श्रवणे क्रियमाणे वेदान्तविचारेणाद्वितीये ब्रह्मणि वेदान्तानां शक्तितात्पर्य्यावधारणे प्रमाणासम्भावनानिवृत्तिः मननेन प्रमेयासम्भावनायां चित्तस्य तदैकाग्र्याऽयोग्यतारूपायां निदिध्यासनेन विपरीतभावनायां निवृत्तायां तत्त्वसाक्षात्कारोदये मुक्तिरिति । भगवद्भजने तूक्तपुराणवाक्यैः साक्षाद्भगवताप्यैव प्रणालिका उक्ता । भगवदर्पणबुद्ध्यानुष्ठितभागवतधर्म्मैर्विशुद्धान्तःकरणस्य उत्पन्नश्रद्धातिशयस्य पुरुषधुरन्धरस्य भगवच्छ्रवणकीर्तनादिसाधनभक्तेरनुवृत्तौ भगवति परमप्रेमलक्षणाऽनुरागात्मिका फलभक्तिरुत्पद्यते, तदा परमप्रेमास्पदभगवन्मूर्तिस्फूर्तिश्च उत्पद्यते । अत एव भगवद्भक्तेः परमपुरुषार्थत्वम् । न च कथं परमप्रेमास्पदत्वं भगवन्मूर्तेरिति वाच्यम् । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इति जगत्कारणत्वेन प्रतिपादितस्य श्रीभगवतो निर्णयवाक्ये "आनन्दाद्धेव खलु, इमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति" इति आनन्दरूपत्वेन निर्णयात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" "को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति च श्रवणात् । अत एवोक्तं—

वृद्धैः ।

यस्यामी विधिवासवादिविबुधा वासेषु विस्फूर्जिताः

सन्तोषाश्रलवीचयो नृपसुखान्येतान्यतो बुद्बुदाः ॥
अन्ये पुत्रकलत्रमित्रविषयाः सौख्योदया बिन्दवः
सोऽयं पूर्णसुखार्णवो विजयते नीलाम्बुदश्यामलः ॥ इति ॥

तेषामेव हरिकथाश्रवणादौ, अनुभवस्य वाक्यं प्रागुक्तं "गोविन्दे सुखरूपता प्रतिपदं वेदैः सदोदीर्यते" इति । तस्माद् युक्तमुक्तं प्रेमभक्तिसमकालं प्रेमास्पदभगवन्मूर्तिस्फूर्तिरिति । ततश्च देहगेहादौ विरक्तस्य भगवत्प्रसादात्तत्त्वज्ञानमिति । तत्सिद्धं भक्त्यध्यात्मविचारयोः प्रणालिकाभेदेनैकतत्त्वधीहेतुत्वम् । अत एव सत्यप्येककार्यत्वे कार्य्यप्रयुक्तानामप्येतद्धर्म्माणां न परस्परसाङ्कर्य्यम् । एकप्रणाल्याऽनेककार्यत्वे साधनीभूतानां भवति धर्म्मसाङ्कर्यम् न प्रणालीभेदे । यथा व्रीहियवकपालानां सत्यप्येकपुरोडाशसाधनत्वे व्रीहियवयोस्तण्डुलनिर्वृत्तिप्रणाड्यैकपुरोडाशसाधनत्वाद्भवति धर्म्मसाङ्कर्य्यम, न कपालेषु, उक्तप्राणाड्या तत्साधनत्वाभावात् । अत्यन्तासंनिहितभिन्नप्रयोगविधिपरिग्रहाच्च न धर्म्मसाङ्कर्य्यम । तत्तदङ्गविध्येकवाक्यतापन्नेन हि तत्तत्प्रधान विधिना साङ्गप्रधानभावनाविधाने न भावनान्तराङ्गानामुपदेशतो प्राप्तिः । नाप्यतिदेशतः [प्रकृतिविकृतिभावराहित्यात् अत उभ] यत्र यावदपेक्षिताङ्गविधानेन पितृयज्ञवदपूर्वत्वात् । तत्सिद्धं भिन्नवाक्योपात्तयोरेककार्यत्वे सति उद्भिद्वलभिदोरिवार्थसिद्धो विकल्प इति । न चाष्टविधदोषप्रसङ्गः । तादृशपुरुषधुरन्धरस्य भक्तावेवास्थादरेण साधनान्तरे प्रवृत्त्यभावेनोदितानुदितहोमवत् स्वीकृतप्रामाण्यहानादेरभावात् । यत्तु पापक्षयहेतुत्वं कर्मसाद्गुण्यहेतुत्वं चास्याः श्रूयत इति । तन्नानिष्टम् । तत्तदधिकारिणं प्रति संयोगपृथक्त्वन्यायेन तत्तत्फलहेतुत्वात् । अत एवोक्तम्—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ इति ।

यज्ञादयुत्याऽनुवादत्वमिति तत्र भक्तेरुक्तप्रणालिकया ज्ञानहेतुत्वस्य विविदिषावाक्यादसिद्धेः । तत्सिद्धं नानाविधकर्म्मभिः शुद्धान्तःकरणस्य जातश्रद्धातिशयस्य श्रवणकीर्तनादिरूपा भक्तिर्ज्ञानद्वारा मुक्तिहेतुरिति ।

अत्र च प्रमाणत्वेन कानिचिद्वाक्यानि उक्तानि अन्यान्यपि विश्वासाय लिख्यन्ते । तत्र कर्म्मणामन्तःकरणशोधकत्वेन भक्तावुपयोगे ।

स वै पुंसां परो धर्म्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययात्मा सम्प्रसीदति ।

आत्माऽन्तःकरणं प्रसीदति ।

तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया ।
हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ इति ।

भक्तेर्ज्ञानहेतुत्वे—

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यम् ज्ञानञ्च तदहेतुकम्(१) ॥

अहेतुकम्=कुशराहितहेतुरहितम् ।

भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ।
अपश्यत्पुरुषं पूर्णं मायाञ्च तदपाश्रयाम् ।
इमं लोकं तथैवामुमात्मानमुभयाश्रितम् ॥
आत्मानमनु येचेह ये रायः पशवो गृहाः ।
विसृज्य सर्वानन्यांश्च मामेव विश्वतो मुखम् ॥
भजन्त्यनन्यया भक्त्या तान् मृत्योरतिपारये ।
मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ॥ इति ।

ब्रह्मवैवर्तेऽपि—

यैरहं सुकृतैर्दृष्टः स्पृष्टः सम्पूजितः श्रुतः ।
स्मृतस्त एव मां नित्यं न त्यजन्ति कदाचन ॥ इति प्रकृत्या
अतो मयि रतिं कुर्यात् सर्वदुःखापहारिणीम् ।
यदि मां प्राप्तुमिच्छन्ति प्राप्नुवन्त्येव नान्यथा ॥ इति ।

तथा

बद्धा एव·········यं हृदयन्त्यविपाश्रितः ।
अतः पशुपतिं देवं भजेत्पाशविमुक्तये ॥ इति ।
तथा विष्णुं प्रति शिववाक्यम् ।

त्वत्सेवनादेव तथा नरः परं पदं प्रपद्यत्यवशः सुदुर्लभम् ॥ इति ।
परं=श्रेष्ठम् । पद्यते ज्ञायत इति पदम् ।
यथा विष्णोः शङ्करस्याथ नाम्ना लोकः शोकं नाश्य मोक्षं प्रयाति ॥ इति च ।

भगवद्गीतास्वपि ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति ।

(अ० ७।श्लो० १४)

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।

---

(१) ज्ञानं यत्तदहैतुकमिति भागवते पाठः ।

स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इति च ।
(अ० १४ श्लो० २६)

तथा—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ इति ।
(अ० ८ श्लो० ८)

विष्णुपुराणेऽपि ।

मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययामिति ।

शान्तिपर्वणि ।

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ इति ।

बृहन्नारदीये—

यन्नामधारणादेव महापातकनाशनम् ।
यं समभ्यर्च्य विप्रेन्द्र परं मोक्षो भवेद् ध्रुवम् ॥ इति ।

गारुडे—

यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदम् ।
तदा यत्नेन महता कुरु गोविन्दकीर्तनम् ॥ इति ।

आदित्यपुराणे—

हरेः सङ्कीर्तनं पुण्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं लोके ह्यपवर्गफलप्रदम् ॥ इति ।

अत्र यद्यपि केषुचिद्वाक्येषु ज्ञाननिर्देशमन्तरेण भक्तेर्मुक्तिहेतुत्वं व्यपदिश्यते, तथापि "क्रिमुक्तश्च विमुच्यते"। "तत्त्वमसि" "अयमात्माब्रह्म"इत्याद्यनेकवाक्यैरनवच्छिन्नानन्दरूपताया मुक्तेः सदातनत्वावगमात्कण्ठगतचामीकरन्यायेनानवाप्तत्वभ्रमनिवृत्तिमात्रस्य साध्यत्वात्तस्याश्च ज्ञानव्यतिरेकेणासम्भवात् वचनान्तरेषु तन्निवेशाच्च तदपि हेतुत्वेनोपसंहर्तव्यम्। "तत्तेजोऽसृजत" इति छान्दोग्यश्रुताविव वाय्वाकाशौ।

अन्ये त्वेवमाहुः। ब्रह्मस्वरूपाणामपि जीवानां त्रिगुणान्तःकरणोपाधिक एव संसारः भावरूपाज्ञानसद्भावे प्रमाणाभावात्। आकाशादिप्रपञ्चस्यापि सत्यत्वाच्च तद्धेतुत्वेनाप्यज्ञानासिद्धिः। "कथमसतः सज्जायेत" इति श्रुतौ प्रपञ्चसत्तया कारणसत्तासाधनाच्च प्रपञ्चसत्ताऽवश्यमाश्रयणीया,

ईश्वरस्य सत्यसङ्कल्पत्वश्रवणाच्च तत्कार्य्यस्य सत्यता, एवञ्च नाशा-ननिवृत्त्यर्थं तावत्तत्त्वज्ञानापेक्षा, नापि जीवगतसंसारनिवृत्त्यर्थम्, अन्तःकरणोपाधिनिवृत्त्यैव तन्निवृत्तेः, जपाकुसुमनिवृत्त्येव स्फटिकलौहित्यस्य न हि जपाकुसुमानुवृत्तौ सत्यपि तत्त्वज्ञाने लौहित्यं निवर्तते । त्रिगुणात्मकान्तःकरणनिवृत्तिश्च भक्त्यैवेत्युक्तं भगवता, "मां च योऽव्यभिचारेण" इति पूर्वोक्तश्लोके । न चैवमात्मज्ञानवैयर्थ्यम्, संशयनिरासेन भक्तिप्रवृत्तावुपयोगात् । अतश्च भक्तेरेव मुक्तिः । न चैवं "तमेव विदित्वाऽतिमृत्युमेती"तिश्रुतिविरोधः । अतिमृत्युपदस्य रूढत्वाभावेन योगेऽवश्यमाश्रयणीये मृत्युमतीत्यैतीति योगावलम्बनेनोपपदविभक्त्याश्रयणापेक्षया यस्यां भक्तौ सत्यां मृत्योरतिक्रमस्तामेतीत्येवं योगावलम्बनेन कारकविभक्त्याश्रयणस्यौचितत्वात् । एवञ्च ज्ञानस्य पूर्वकालताप्रतिपादिका क्त्वाश्रुतिरपि नानुपपन्ना, भक्त्यपेक्षितभजनीयासम्भावनानिवृत्तिहेतुत्वेन तस्य पूर्वकालीनत्वात् ।

नचैवं—

> भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
> ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥
>
> (गी० अ० १८ श्लो० ५५)

इत्यत्र तृतीयाश्रुत्या भक्तिर्ज्ञाने विनियुज्यते, "ऐन्द्र्या गार्हपत्यमुपतिष्ठत" इत्यत्रैन्द्री यथा गार्हपत्योपस्थाने, ततश्च तद्विरोधः स्यादिति वाच्यम् । अत्राभिहितोऽभिपूर्वो जानातिरभिज्ञां पुनःपुनरालोचनाख्यां प्रत्यभिज्ञामभिधत्ते । एवञ्च भक्त्युपकारिपूर्वज्ञानं तद् साध्यभक्त्या पुनःपुनर्जायमानभजनीयासम्भावनानिवृत्तिरूपस्वदार्ढ्यायापेक्ष्यते, एवं सति जायमानानुरागाख्यदृढभक्त्यनन्तरं भगवत्स्वरूपं विशति इत्येवंपरत्वादस्य वाक्यस्य को विरोधः । अत एव "यो वै भूमा तत्सुखम्" आत्मैवेदं सर्वमित्युपक्रम्य" स वा एष एवंपश्यन्नेवंमन्वान एवंविजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवतीति छान्दोगश्रुतौ पश्यनात्मरतिरिति ज्ञानस्यैव भक्त्यपरपर्यायरत्यङ्गत्वं प्रतीयते, दण्डी प्रैषानन्वाहेत्यत्र दण्डस्येव प्रैषानुवचने । सस्वराड् भवतीत्यत्र स्वराट् श्रुत्या व्यवहितात्मरतेरेव पुरुषस्य परामर्शाच्च भक्त्यपरपर्यायरतेरेवफलवत्त्वावगमाज् ज्ञानं प्रति प्राधान्यम् । "ब्रह्मसंस्थोऽमृतत्वमेति"इत्यत्र ब्रह्मणि संस्था रतिर्यस्येत्येवमनुरागभक्तेरमृतत्वहेतुत्वप्रतिपादनाच्च । तस्मिद्धं भक्तिर्मुक्तिशेषभूता न ज्ञानमिति ।

तदिदं वेदान्तानुसारिणो वैष्णवा अनुरागात्मिकायाः फलभक्तेरा-

स्यान्तिकपरमपुरुषार्थत्वेनान्यत्र शेषत्वमसहन्तो न मन्यन्ते । तथाहि । न तावदज्ञाने मानाभावः शक्यो वक्तुम् । "न तं विदाथ य इमा ज जानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ति" ।

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
भिभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

इत्यादिवचनैरावरकत्वेन भेदप्रयोजकत्वेन मोहादिविक्षेपजनकत्वेन च तस्य प्रतिपादनात् । "तन्मनोऽकुरुत" इतिश्रुत्या जन्यत्वेनावगतस्यान्तःकरणस्यानादिभेदोपाधित्वायोगाच्च ।

यदप्युक्तं प्रपञ्चः सत्य इति । तन्न । कार्यात्मकप्रपञ्चस्य भावकार्यत्वेनोपादानापेक्षायाम्, "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः" "दैवी ह्येषा गुणमयी मम माया दुरत्यया" "मायां तु प्रकृतिं विद्यात्" इत्यादिवाक्यावगतमायोपादानत्वसम्भवेऽश्रुतानेकादृष्टपरमाणुकल्पनाया असम्भवात् । मायोपादानकस्य च मायिकव्याघ्रादिवन्मिथ्यात्वावश्यम्भावात् । किञ्च "यतो वा" इत्यादिवाक्यात् "सत्यं खलु, इदं ब्रह्म तज्जलानि"ति वाक्याच्चोत्पत्तिस्थित्याद्याधारत्वेनोपादानत्वं भगवतोऽवश्यं वाच्यम् । निमित्तमात्रत्वे कुलालवत्स्थित्यादिप्रयोजकत्वायोगात्, "स ऐक्षत बहु स्याम्" इतीक्षणाकारायोगाच्च । कुलालादावहं घटः स्यामितीक्षितृत्वादर्शनात्, तस्मात्कार्यानुकूलज्ञानवत्वेन कर्तृभूतस्याप्युपादानत्वमस्त्येव । तदुक्तं "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" [उ० मी० अ० १ पा० ४ सू० २३] इति । "हरिः प्राणभृतामाद्यः स्वयं प्रकृतिरीश्वरः" इति च । तच्चोपादानत्वं न मृदादिवत्सम्भवति, घटादेर्मृद्घट इति मृत् इति मृत्स्वभावतावगमवत्प्रपञ्चस्य चित्स्वभावतानवगमात् । नापि केवलं प्रकृत्याधारत्वेन, घटोपादानमृदाधारस्य भूतलादेस्तथाभावादर्शनात् । अतश्च—

अज्ञानशुक्तितो यद्वद्रजतं तादृगेव सः ।
न दृश्यते मृदः कार्यं तत्स्वभावविलक्षणम् ॥

एवं चाध्यस्तस्य वास्तवं स्वरूपमधिष्ठानमेवेति यद्रजतमभात् सा शुक्तिरितिवत् "सर्वं खल्विदं ब्रह्म" "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते", "वासुदेवः सर्वम्" इति च सामानाधिकरण्यं सङ्गच्छते । विवर्त्तमानत्वेन विवर्त्तमानाविद्याधिष्ठानत्वेन चाविद्यात्मनोरुभयोरप्युपादानत्वाच्चोभयोपादानत्वप्रतिपादकवाक्यविरोधः । तस्माद्

ज्ञाननिवर्तनयोग्यमज्ञानमेव मायाशब्दवाच्यं प्रपञ्चोपादानमिति तत्का-र्यस्याप्यन्तःकरणादिप्रपञ्चस्य ज्ञाननिवर्त्यत्वं लभ्यते । लोके तत्त्व-ज्ञानस्य सविलासाज्ञाननिवर्तकत्वदर्शनात् । अनुरागस्य तु साक्षात्त-न्निवर्तकत्वं न क्वचिद् दृष्टं श्रुतं वेति तदाश्रयणायोगः । एवञ्च, "तत्त्व-विद्यां विततां हृदि यस्मिन्निवेशिते योगी मायामिति", "तेषामेवानु-कम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" इति च सङ्गच्छते। अत्र चैवकारो भिन्नक्रम इत्युक्तम्। उक्तविधो हि पुरुषधुरन्धरः श्रवणकीर्तनादिना जायमाननिरतिशयपरमानन्दैकरस-भगवन्मूर्तिस्फूर्त्यैवानुरक्तः सन्न किञ्चित्कामयते । भक्त्या प्रसन्नस्तु भगवान्स्वयमेव कृपया तच्चेतस्यखण्डाद्वितीयरूपेणाविर्भूतः स्वज्ञाने-नाज्ञानं निवर्तयतीति नाज्ञानतत्कार्यनिवृत्तिं प्रति भक्तेः शेषत्वम्। तदु-द्देशप्रवृत्तकृतिव्याप्यत्वाभावात् । यथामिक्षोद्देशप्रवृत्तकृतिव्याप्यस्य दध्यानयनस्य न वाजिनं प्रति शेषता तद्वत् ।

यच्च कथमसतः सज्जायेतेत्याद्युक्तम् । तन्न । यतः—

> साधकत्वादिदंशस्य वक्तव्या सत्स्वरूपता ।
> तत्सम्बन्धात्तु दृश्यानां पूर्ववत् सत्स्वरूपता ॥
> एवं सदिति विज्ञानं दृश्येष्वेकाविधं भवेत् ।
> लाघवं च तथात्वे स्यात् सत्ताजातेरकल्पनात् ॥

परेषां हि सत्ता जातिरेका नित्या च, द्रव्यादिषु च तत्प्रतिभासो मुख्यः, सामान्यादिषु अमुख्यः । ज्ञानानि चानेकानि द्रव्यादीनाञ्च त-त्सम्बन्धः । स च स्वरूपात्मक इति केचित् । विषयता स्वतन्त्रेत्यन्ये ।

अज्ञानब्रह्मकारणवादिनस्तु ।

स्फुरणं सद्रूपं, तदसत्त्वे व्यवहारासम्भवेन विश्वासिद्धिप्रस-ङ्गात् ।तच्चैकम् , तत्तच्छरीरतत्तद्विषयपरामर्शव्यतिरेकेण स्वरूपतो भेदानुपलम्भात् अत एव नित्यं व्यापकञ्च । कालान्तरे देशान्तरे च व्यवहारदर्शनात् । नैयत्ये च य एवार्थस्तेन संसृज्यते स एव व्यव-हारगोचरो भवति । संसर्गश्च न संयोगः, रूपादौ तदयोगात् , समवाये स्फुरणस्य चाक्षुषत्वप्रसङ्गात् , रूपस्य वा चेतनत्वप्रसङ्गात्(१)। स्वरू-पस्य प्रत्येकपर्यवसन्नत्वेन सम्बन्धत्वायोगात् , अतिरिक्तविषयता-भ्युपगमे तस्या नित्यत्वे सर्वदा सर्वविषयभानप्रसङ्गात् , अन्यत्वे अ-

(१) स्फुरणे रूपप्रतियोगिकसमवायाभ्युपगमे स्फुरणस्य रूपवत्तया चाक्षुषत्वप्रस-क्तिः, रूपे स्फुरणप्रतियोगिकसमवायाभ्युपगमे च रूपस्य चेतनत्वप्रसङ्ग इति भावः ।

मायादिनिष्ठायास्तस्या उपादानान्तराभावेनाभावादेरुपादानत्वेन दुष्टत्वापातात्। अक्लृप्तकल्पनाया अयोगात्। तस्मात्तत्र विषयाणामध्यस्तत्वं वाच्यम्। अत एव दृश्याद्यभावान्तानां सद्रूपप्रकाशेऽध्यासादस्तित्वव्यवहार एकरूपः सङ्गच्छते, अनेनैव चाशयेन श्रुतिः। "कथमसतः सज्जायेत" इति। असतो ह्युपादानत्व उक्तरीत्याऽनिर्वचनीयस्य प्रपञ्चस्य सत्त्वप्रतिभासो न स्यात्, असत्त्वेनैव प्रतिभासः स्यात्। "नासदासीन्नो सदासीत्" "मायां तु प्रकृतिं विद्यात्" इत्यादिना मायिकत्वेनानिर्वचनीयस्य सदधिष्ठानत्वे तु तत्सम्बन्धात्सत्त्वप्रतिभास उपपद्यते पृथिवीसम्बन्धाज्जले गन्धप्रतिभासवत्। अत एव, "यत्र त्रिसर्गो मृषा" इत्यत्र त्रिसर्गः=त्रिगुणात्मकमायाकार्यमतो मिथ्याभूतोऽपि यत्र सदधिष्ठाने अमृषेव भवतीत्युक्तं श्रीधरस्वामिभिः। तस्मात्कथमसतः सज्जायेतेति श्रुतिः प्रपञ्चसत्त्वप्रतिभासेनासत्कारणत्वनिराकरणपराऽवश्यं वक्तव्या न तु प्रपञ्चसत्यत्वप्रतिपादनपरा वाक्यभेदापत्तेरिति। सत्यसङ्कल्पत्वश्रुत्या चेश्वरेच्छाया अन्येनाप्रतिघात उच्यते, स चाङ्गीक्रियत एव।

यदुक्तमन्तःकरणतन्निमित्तसंसारनिवृत्तिर्भक्त्या न तु तत्त्वज्ञानेनेति तत्र तत्त्वज्ञानस्य सविलासाज्ञाननिवर्तकत्वं रजतभ्रमादौ दृष्टम्, कामिन्यनुरागस्य तत्साक्षात्कारहेतुत्वञ्च दृष्टम्।

वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानञ्च तदहैतुकम्॥

इत्यादिना श्रुतं च भक्तियोगस्य ज्ञानहेतुत्वम्। अनुरागस्यान्तःकरणादिनिवृत्तिहेतुत्वं तु न दृष्टमित्याद्युक्तमेव। न च सोपाधिकभ्रमनिवृत्तिस्तत्त्वज्ञानान्न दृष्टेति वाच्यम्। लौहित्यं कालत्रये नास्तीत्येवं बाधरूपायास्तन्निवृत्तेस्तत्त्वज्ञानसाध्यत्वदर्शनात्। न हि जपाकुसुमापगममात्रेणासन्निकृष्टे स्फटिके तादृशी बुद्धिरुदेति। अनिर्वचनीयस्य च संसारस्य निवृत्तिर्बाधरूपैव न तु पराभिमतध्वंसरूपेत्युक्तमविद्यानिवृत्तिनिरूपणे।

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति॥ इति।

स्वतन्त्रध्वंसाङ्गीकारे सकलश्रुतिसिद्धाद्वैतव्याकोपः। आशुतरविनाशित्वेन च स्वत एव तन्निवृत्तेस्तत्रोपाधिनिवृत्त्यनपेक्षणात्। "मां च योऽव्यभिचारेण" इत्यत्र यद्यपि ज्ञानं न श्रुतं तथापि बहुषु वचनेषु तच्छ्रवणात् तदपि हेतुरित्युक्तम्।

यच्चातिमृत्युपदे बहुव्रीह्याश्रयणेन भक्तिपरत्वम् । तन्न । सन्निधानाभावेऽन्यपदार्थत्वेन भक्तेर्ग्रहीतुमशक्यत्वात् । न हि सन्निधानाभावे देवदत्तं चित्रगुपदमुपस्थापयति । तदुक्तं-"सर्वत्र प्रसिद्धोपदेशात् (उत्तमी०अ० १ पा. २ सू० १) इत्यत्र "मनोमयः प्राणशरीर" इति वाक्यगतप्राणशरीरशब्दस्य सन्निहितब्रह्मपरत्वं वक्तुं वाचस्पतिमिश्रैः "समासः सर्वनामार्थः सन्निकृष्टमपेक्षते" इति । असञ्जातविरोधित्वेन प्रथमश्रुतयोरतिमृत्युपदयोः स्वार्थपरत्वे सम्भवति चरमश्रुतविभक्त्यनुरोधेन भक्तिपरत्वकल्पनायोगाच्च । नचैवमिन्द्रपीतशब्देऽपि तत्पुरुषाश्रयणमेव स्यात्, न(१) बहुव्रीह्याश्रयणमिति वाच्यम् । भव[भाग] प्रदानानां सन्निधानात् (२)प्रातःसवनशब्दसामानाधिकरण्यात्, गायत्रच्छन्दस इति बहुव्रीहिप्रायपाठाच्च तदाश्रयणात् । किञ्च नान्यः पन्था इति भक्तौ न मार्गान्तरनिषेधः, भजनीयनिर्णयवद् भक्तिस्वरूपनिर्णयस्य कर्मणाञ्च तत्रोपयोगात् । न च भक्तिव्यतिरेकेण मुक्तौ मार्गान्तरनिषेधः, वाक्यभेदापत्तेः । न हि तमेव विदित्वा भक्तिमेतीत्युक्ते मुक्तौ मार्गान्तरनिषेधः सिध्यति, येनानुवादत्वेन एकवाक्यता स्यात् । अस्मन्मते तु अतिमृत्युमेतीति मुक्तिप्रतिपादनात् तत्र एवकारसिद्धो मार्गान्तरनिषेधः, नान्यः पन्थेत्यनेनानूद्यते । न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादितिवत् [मी० अ० ९ पा० ४ अधि ४ [। एतावांस्तु विशेषः । तत्र मुख्यत्वान्निषेधस्य विधित्वं तदितरस्य चानुवादत्वं स्वीकृत्योभयोरेकवाक्यत्वमित्यूहमुख्यत्वादेवकारसंबद्धत्वं स्वीकृत्येति । अतो न वाक्यभेदः । न च भक्तिप्रतिपादनपक्षेऽपि तं विदित्वैव भक्तिमेति न भजनीयनिर्णयव्यतिरेकेणत्येकवाक्यता सम्भवतीति वाच्यम् । "विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम्" इति अजामिलस्य भजनीयनिर्णयव्यतिरेकेणापि नामसङ्कीर्तनरूपायाः भक्तेः प्रतिपादनात् । तस्मादस्यां श्रुतौ ज्ञानैकसाध्यत्वेन मुक्तिप्रतिपादनमेवाभियुक्तोक्तं युक्तम् । तथा चैतत्समानार्था तैत्तिरीय·

---

(१) तथाच मीमांसातृतीयाध्यायद्वितीयपादीयैकादशाधिकरणे इन्द्रपीतशब्दे बहुव्रीहित्वस्य निर्णीतत्वात् तदधिकरणविरोध इति भावः ।

(२) तदुक्तं शाबरभाष्ये तृतीयाध्यायद्वितीयपादे सप्तविंशतिसूत्रे "मन्द्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु । वसुमद्गणस्य सोमदेव ते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसोऽभिभुत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति ।

श्रुतिः। "तमेव विद्वानमृत इह भवती"ति।

यच्च भक्त्या मामभिजानातीत्यस्य भक्त्या स्ववाक्यार्थे भजनीय-निर्णयोऽपेक्ष्यते, इति व्याख्यातम्। तन्न, वाक्यस्वरसाविरुद्धम्। तथाहि अभिपूर्वको जानातिः प्रत्यक्षज्ञाने वर्त्तते, यां काञ्चन ब्राह्मणवती मिष्टकामभिजानीयादित्यत्र तथा दृष्टत्वात्। तद्विषयत्वेन च निरति-शयपरमानन्दरूपा भगवन्मूर्तिर्मच्छब्दोक्ता सम्बध्यते, भक्तिश्च तृतीया-निर्देशात् करणत्वेन। भक्त्या चाविर्भूतः परमात्मा स्वात्माद्विती-यरूपेण भक्तैरवगम्यते, इत्याशयेनोक्तं ततो मामिति, विशते तदनन्त-रमिति च साक्षात्कारफलनिर्देशः। सोऽयमर्थो वाक्यात् यथाश्रु-तादवगम्यते, न वाक्यार्थादि, लक्षणायां मानाभावात्। यदा तु प्र-करणमालोच्यते तदा नेदं वाक्यं श्रवणकीर्तनादिरूपां साधन-भक्तिं तज्जन्यामनुरागाख्यां फलभक्तिं वाधिकृत्य पठितं, किन्तु ज्ञानयो-गाधिकारिणं प्रति तं योगमधिकृत्य। तथाहि–"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इत्यादिना सत्त्वशुद्ध्यर्थं स्वकर्मानुष्ठानमुद्दिश्य—

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥

[गी० अ० १८ श्लो० ४८]

इत्यनेन शुद्धसत्त्वस्य शमादिपूर्वकं संन्यासं ज्ञानयोगसाधनमुप-दिश्य —

सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे।

[गी० अ० १८ श्लो० ५०]

इति ज्ञानपूर्वकं साधनचतुष्टयसम्पन्नं प्रति निदिध्यासनान्तं ज्ञान-योगमुपदिश्य तत्फलं च प्रमाणासम्भावनादिनिवृत्तिं "ब्रह्मभूयाय क-ल्पते" इत्यनेनाभिधाय—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥

[गी० अ० १८ श्लो० ५४]

इति ब्रह्मज्ञानैकनिष्ठस्य प्रसन्नात्मनस्तदेकाग्रचित्तस्य रागादिवि-क्षेपाभावात् समस्य सतः पुंसः प्राप्यत्वेन सर्वेषु भूतेषु परमात्मभाव-नां सर्वं परमात्मन्यध्यस्तं स एव सत्य इत्येवंरूपां बुद्धिं भक्तिशब्देन निर्दिश्य पठितमेतत् "भक्त्या मामभिजानाति" इति। अतश्चात्र पूर्वो-क्तबुद्धिविशेषस्यैव भक्तिशब्दोक्तस्य फलमुच्यते, न तु श्रवणकीर्तना-देः, तदधिकारेणानुक्तत्वात्। न हि दधिमथ्यादिद्रव्यकं यागमधिकृत्य

पठितं "चित्रया यजेत पशुकामः" इति वाक्यं प्रकृतयागमपहाय चित्रात्वजातिविशिष्टपशुकारकस्य फलसम्बन्धायेह, एवं च ज्ञानोद्देशेन साधनमनुतिष्ठन् तद्बलेन ज्ञानं लभते, इति स्वातन्त्र्योपदेशोऽप्युपपद्यते । श्रवणकीर्तनादिरसिकस्य तु न ज्ञानोद्देशेन तदनुष्ठितिरिति न तल्लाभे स्वातन्त्र्यम् , भगवानेव तु कृपया ज्ञानमस्मिञ्जनयतीत्युक्तमधस्तादिति ।

यदपि छान्दोगश्रुतिपर्यालोचनया ज्ञानस्य भक्त्यङ्गत्वमुदाजहार । तदपि न । "यत्र नान्यत्पश्यति नान्यच्छृणोति" इत्यनवच्छिन्नब्रह्माधिकारे पठितायास्तस्यास्तद्विषयज्ञानस्य सकलप्रपञ्चनिवृत्तिहेतोर्भेदसापेक्षभक्त्यङ्गत्वेन प्रतिपादनेऽसामर्थ्यात् । अत एव श्रुतिः । "यत्र त्वस्य सर्वमात्मैवाऽभूत्तत्केन कं पश्येत्" इति । "स स्वराड् भवति" इति च । स्वप्रकाशचैतन्यरूपस्यैव सततस्फुरणं कण्ठगतचामीकरन्यायेनानवाप्तत्वादिभ्रमनिवृत्तिः । सा च तत्त्वज्ञानसाध्या नत्वनुरागसाध्येत्युक्तम् । तथा च श्रुतिः । "तरति शोकमात्मवित्" इति । "आत्मरतिरात्मक्रीड आत्ममिथुनः" इति तु वस्तुस्वाभाव्येन ज्ञानिनामपि जीवन्मुक्तानां जायमानस्य भगवत्यनुरागस्यानुवादः । यथोक्तम्—

आत्मारामाश्च मुनयो निर्ग्रन्था (१)अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥ इति ।

"ब्रह्मसंस्थोऽमृतत्वमेति" इत्यपि वाक्यमनवच्छिन्नात्मप्रकरणपाठात् परमहंसानां श्रवणादिद्वारा मोक्षप्राप्तिमाह [त्याहुरि] त्यलमतिविस्तरेण । तत्सिद्धं मुक्तिहेतुतत्त्वज्ञाने मार्गद्वयम् , अध्यात्मविचारो भक्तिर्वेति ।

सेयं भक्तिः सत्सङ्गसाध्या । यथोक्तम्—

नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ।
भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥
तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥
संसारेऽस्मिन् क्षणार्धोऽपि सत्सङ्गः शेवधिर्नृणाम् ।
न रोधयति मां योगो न सांख्यं धर्म एव च ॥

(१) लौकिकार्यप्रबन्धधारणरहिता निरपेक्षा इति यावत् ।

न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ।
व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ॥
यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ।
महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥
तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः ।
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ॥
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ।
मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च ॥
त एते साधवः साध्वि ! सर्वसङ्गविवर्जिताः ।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥ इति ।

सेयं भक्तिर्वक्ष्यमाणश्रवणकीर्तनाद्यनेकप्रकारा । तत्र श्रवणादीनां क्वचित्समुच्चयः श्रूयते, क्वचिच्च नैरपेक्ष्यम्,

तत्र समुच्चयस्तावत्—

तस्माद्भारत ! सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ इति ।
शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः
स्मरन्ति नन्दन्ति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं
भवप्रवाहोपरमं पदाम्बुजम् ॥ इति ।

अत्र चैकवाक्यगतत्वाद्दर्शादिवत्समुच्चयावगमः । न चैकोद्देशेनानेकविधाने कथमेकवाक्यतेति वाच्यम् । यथा ह्याक्यजिनोपादानात्पञ्चबागाविधानेऽपि न वाक्यभेदः, तथेहापि । त एवेत्येकेन तच्छब्देन पुंविशेषणत्वेनाऽनेकेषामुपादानात् ।

तथा,

शृण्वतां गदतां शश्वदर्चतां त्वाभिवन्दताम् ।
नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम् ॥ इति ।
तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ इति च ।

तथा ।

तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान् नृणाम् ॥ इति ।

अथ नैरपेक्ष्ये तत्र श्रवणे तावत् ।

पिबन्ति ये भगवत आत्मनः सतां
कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं
व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ इति ।

पानेन ते देवकथासुधायाः
प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं
यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम् ॥ इति च ।

कीर्तनेऽपि ।

तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ।
तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ इति ।

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥ इति च ।

स्मरणेऽपि ।

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि च शं तनोति ।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥ इति ।

विषयान्ध्यायतश्चित्तं विषयेषु विलीयते(१) ।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ इति च ।

पूजनेऽपि ।

यत्पादयोरशठधीः सलिलं प्रदाय
दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अप्युत्तमां गतिमसौ भजते त्रिलोकीं
दाश्वानविक्लवमनाः कथमार्तिमिच्छेत् ॥ इति ।

नूनं विमुष्टमतयस्तव मायया ते
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरुं (२)कुपणोपभोग्य-
मिच्छन्ति यत्स्पर्शजं (३)नरकेऽपि नृणाम् ॥ इति च ।

एवञ्च समुच्चितत्वेन श्रुतानां नैरपेक्ष्यश्रवणं यज्ञादीनामिव सत्त्व-

---

(१) विषज्जत इति श्रीभागवते पाठः ।

(२) कुणपोपभोग्यमिति श्रीभागवते पाठः ।

(३) निरयेऽपीति श्रीभागवते पाठः ।

श्रुतौ श्रवणकीर्तनादीनामनुरागरूपफलभाक्त्विद्वारा भगवन्मूर्तिस्फूर्तौ सम्भवत्समुच्चयं सूचयति। दृष्टार्थत्वस्योभयत्राविशेषात्। यथाह्यात्मैकप्रवणतागम्या चित्तशुद्धिर्यावद्भिः कर्मभिर्भवति तावन्त्येवानुष्ठीयन्ते। एवमुक्तविधा भगवन्मूर्तिस्फूर्तिर्यावद्भिर्भवति तावन्त्यनुष्ठेयानीति। न च नैरपेक्ष्यवाक्यानामाग्नेयादिवाक्यवदुत्पत्तिपरता किं न स्यादिति वाच्यम्। प्रत्येकं फलसम्बन्धश्रवणात्। नाप्यनुवादत्वम्।

श्रुतः सङ्कीर्तितो ध्यातः पूजितश्चादृतोऽपि वा।
नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम्॥ इति।
यानीह विश्वविलयोद्भववृत्तिहेतुः
कर्माण्यनन्यविषयाणि हरिश्चकार।
यस्त्वङ्ग! गायति शृणोत्यनुमोदते वा
भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे॥
इति च वाक्यविरोधात्।
महादेवमहादेवमहादेवेति यो ध्वनिः।
स एव मुक्तिकन्यायाः पाणिग्रहणडिण्डिमः॥ इति।
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
यत्र सङ्कीर्तनेनैव मुक्तबन्धः परं व्रजेत्॥

इति चवकाराविरोधाच्च। अत एवाग्रे यन्निर्वपेद्धकाम इति वत् कर्मान्तरत्वमनन्तरवाक्ये शक्यम्। एवकारश्रवणे हि न कर्मान्तरत्वबुद्धिर्भवतीत्युक्तं "पुनराधेयमेव तस्य प्रायश्चित्ति"(१)रित्यत्र। ततश्च वाशब्दैवकारयुक्तवाक्येभ्यः स्पष्टं निरपेक्षाणां मुक्तिहेतुत्वावगमात्र समुच्चितानामेव साधनत्वम्। एवञ्च येष्वपि पूर्वोक्तेषु "पिबन्ति ये भगवत आत्मनः सतां कथामृतम्" इत्यादिषु नैवकारादिश्रुतः, तेष्वपि यथाश्रुता ज्ञाननिरपेक्षसाधनतापरतैवाङ्गीकार्य्या? न तु तेजः श्रुतौ वाय्वाकाशयोरिव साधनान्तराणामुपसंहारः, यदि समुच्चितसाधनतैव निर्णीता स्यात्तर्ह्युपसंह्रियेतापि, न त्वेवमस्ति, नापि कर्मभेदकल्पना युक्ता, तथासति मूलभूतानेककल्पनागौरवात्। नाप्यनुवादत्वेनानर्थक्यं सम्भवति। "श्रावयेच्चतुरो वर्णान्" इति विध्युपात्तानामानर्थक्यायोगात्। तथा हि। अत्र वाक्ये चत्वारो वर्णाः पुराणवाक्यानि शृणुयुरित्येवं वाक्यार्थ इत्युक्तमभियुक्तैः। एवञ्चाध्ययनकर्मत्वेन श्रुतस्य

(१) एतच्च पूर्वमीमांसीयषष्ठाध्यायचतुर्थपादषड्विंशतिसूत्रव्याख्यानभाष्ये द्रष्टव्यम्।

स्वाध्यायस्यैव श्रवणकर्म्मत्वेन श्रुतानां पौराणवाक्यानां मानर्थक्यं यु- क्तम्। निष्प्रयोजनस्य कर्म्मत्वायोगात्। "पुराणन्यायमीमांसा" इति विद्यास्थानत्वप्रतिपादनायोगाच्च। "पुराणं पञ्चमो वेद" इत्यादिवा- क्यविरोधाच्च। तस्माद्देवताविग्रहन्यायेन पुराणप्रतिपादिततत्तत्संवा- दाश्रवणात् तं तं पुरुषं प्रत्युक्ततत्तद्वाक्यानांज्ञाननिरपेक्षसाधनत्वप्र- तिपादनेनार्थवत्त्वान्नानर्थक्यम्। एवं बोधयितुं प्रयुक्तादपि वाक्यादन्यस्य साधनताबोधो युक्त एव देवदत्तबोधार्थमुक्तात् शिवस्वपथत्वप्रतिपादक- वचनाद्यज्ञदत्तज्ञानम्। अत एव हि एकशाखापवितानामपि "आत्मा वारे द्रष्टव्यः श्रोतव्यः" "तस्माद् ब्राह्मणो पाण्डित्यं निर्विद्य" "शान्तो दान्त" इत्यादीनां संवादभेदाच्छ्रवणविधित्वमुक्तमुत्तरतन्त्रे। प्रतिकल्पञ्च सं- वादाश्रवणान्न वेदापौरुषेयत्वविरोधः। तस्मिद्धं वक्ष्यमाणानेकप्रकारा भक्तिः समुच्चितैकैका वा ज्ञानद्वारा मुक्तिहेतुरिति। तथा च—

गोपालपूर्वतापनीये।

"यो यो ध्यायति रसति भजति सोऽमृतो भवति इत्युपक्रम्य" "किं तद्रूपम् इति ध्येयप्रश्नपूर्वकं "गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रि- तम्। तदिह श्लोका भवन्ति,

सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम्॥
गोपगोपीगवावीतं सुरद्रुमतलाश्रयम्।
दिव्यालङ्करणोपेतं रत्नपङ्कजमध्यगम्॥
कालिन्दीजलकल्लोलसङ्गिमारुतसेवितम्।
चिन्तयञ्चेतसा कृष्णं मुक्तो भवति संसृतेः॥

इत्यनेन निरपेक्षध्यानस्य फलसम्बन्ध उक्तः, ततस्तस्य "पुनार- सनम्" इत्यादिना "जपन्" इत्यन्तेन रसतिशब्दार्थत्वेन जपं व्याख्याय तन्मात्रस्य ब्रह्म सम्पद्यत इति फलसम्बन्धो निर्दिष्टः। तदनन्तरं "भक्ति- रस्य भजनम्। तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन्मनःकल्पनम्" इत्यनेन ध्यानजपाभ्यां फले जनयितव्ये आन्तरालिकः प्रणालिकाविशेषः पूर्वो द्दिष्टभजतिशब्दार्थत्वेन कथितः। तत्रेहामुत्रोपाधिनैराश्येनैवेति विर क्तिरुदिता। तृतीया सहयोगे। अमुष्मिन्निति गोपवेषमित्यादिनोक्तस्य भ- गवत्स्वरूपस्य निर्देशः। मनः कल्पनमिति च तद्विषयानुरागस्फूर्त्तिः। एकारसहितया चोक्ततृतीयया त्रयस्यैककालतायाः। एवञ्च "भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककाल" इत्यस्य मूलमेषा श्रुतिः, एतदेव नैष्कर्म्यम्" इत्यनन्तरवाक्ये चैतच्छब्देन मनः कल्पनशब्दोक्तभ-

भगवन्मूर्तिस्फूर्तिर्निर्दिष्टा। नैष्कर्म्यम्=तत्त्वसाक्षात्कारः। स्फुरन्तीनां भगवन्मूर्तीनामेव तत्त्वरूपेण स्फुरतीत्याशयेन सामानाधिकरण्यम्। एतच्च भगवदनुकम्पयैवेत्येवकारार्थः। चकारः साधनैककालतां चेदिह मुक्तिं सूचयति। तदनया विस्तरोक्त्या "यो यो ध्यायति" इति संक्षेपोक्तिरेव व्याख्याता। तत्रोद्देश्यत्वविधेयत्वसमर्पकयोर्यच्छब्दतच्छब्दयोर्व्यत्यासः। "अमृतो भवति" इत्यत्र चकारस्याध्याहारः। ध्यायति रसतीत्यत्र च पञ्चमलकारत्वम्। तदयमर्थः, य उक्तप्रणाल्याऽमृतत्वकामः स ध्यायेद् जपेद्वेति। एवमुक्तविध्यपेक्षितसत्त्वशुद्धिसाधनत्वेनेश्वरार्पणबुद्ध्या कर्मानुष्ठानं वक्तुमुपक्रमे "कृष्णं तं विप्रा बहुधा यजन्ति" इति। एतावता ग्रन्थेन ध्यानजपयोर्विकल्पमुक्त्वा समुदितानां श्रवणकीर्तनादीनामपि मुक्तिहेतुत्वमुक्तम्। "गोविन्दं सन्तं बहुधाऽऽराधयन्ति" इति। अत्र च बहुधाऽऽराधयन्तीत्यस्य श्रवणकीर्तनस्मरणपादसेवनार्चनवन्दनदास्यसख्यात्मनिवेदनादिभिः सेवन्त इति व्याख्यानमुक्तं तापनीव्याख्याने। अस्य च विधेः फलाकाङ्क्षायां पूर्वोक्तस्य सप्रणालिकस्य फलस्यानुषङ्गेन सम्बन्धः, सन्निधानात्। सत्त्वशुद्ध्यर्थकर्मणाञ्च। न चामनहोमवाक्यवदेतस्याङ्गप्रतिपादकत्वम्(१)। कीर्तनस्मरणरूपत्वेन पूर्वविहितध्यानजपयोरत्रोपादानेनाङ्गाङ्गिभावप्रतिपादनायोगात्। न चात्र विध्यश्रवणम्, पूर्ववत्पञ्चमलकाराश्रयणात्। अत एवान्ते, उपसंहृतं "तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्, तं रसेत्, तं यजेत्, तं भजेत्" इतीति। अत्र हि तं भजेदित्यस्य तमाराधयेदित्यर्थ इत्युक्तमेतद्व्याख्याने। तदनया श्रुत्या सिद्धमेतद्भक्तिरुक्तप्रणालिकया मुक्तिहेतुरिति। एवञ्च भक्त्यध्यात्मविचारयोः पौराणश्रौतत्वेन विषयाशिष्टत्वात् विकल्प इत्यपास्तम्। भगवद्भजनस्याप्युक्तश्रुतिसिद्धत्वात्। सैषा भक्तिरत्यन्तं प्रवर्धिता सत्येव मुक्तिहेतुः। यथोक्तम्—

प्रोक्तेन भक्तियोगेन भजतो माऽसकृन्मुनेः।
कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि॥ इति।

कश्चिच्च भगवत्समीपे गमनमनावृत्तिश्च श्रूयते। "व्रजन्ति तव चरणसरोरुहान्तिकम्" इति। "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति च।

---

(१) स्पष्टं चेदं मीमांसाचतुर्थाध्यायचतुर्थपादीयप्रथमसूत्रे।

ननु तत्समीपगमने को मार्गः। न तावत् धूमादिमार्गः। तस्य कर्मफलभोगाय यद्गमनं तत्सम्बन्धित्वेन श्रुतत्वात्। नापि अर्चिरादिमार्गः। तस्योपासकाविषयत्वात्। ये प्रतीकोपासकास्तेषामनेन मार्गेण विष्णुलोकपर्य्यन्तं गमनमुक्तम्। अहङ्ग्रहोपासकानां तु तद्ग्रेऽपि हिरण्यगर्भलोकपर्य्यन्तं गमनम्, वैकुण्ठादिषु च भगवत्समीपं प्रति गमने नायं मार्गः श्रुतः।

उच्यते।

श्रूयते हि पुराणेषु भगवद्भक्तानां विमानगमनम्, तद्यथा ध्रुवस्य भगवता प्रेषितेन—

एतद्विमानप्रवरमुत्तमश्लोकमौलिना।
उपस्थापितमायुष्मन्नधि रोढुं त्वमर्हसि॥

इत्येवं तद्दूतनिवेदितेन च विमानेन।

त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि॥
परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाऽभ्यगात्।

इति गमनं श्रुतम्।

अर्चिरादिमार्गे हि सम्पिण्डितकारणग्रामत्वेन भक्तानां भोगानुरोधेन भगवान् विमानमार्गं रचितवानिति गम्यते। तत्र गतानां च भगवदनुग्रहात्तत्त्वज्ञानोत्पत्तिर्मुक्तिश्च भवतीति सिद्धं भक्तेर्द्वेधा मुक्तिहेतुत्वम्।

तदयं सङ्क्षेपः।

नानासत्कर्म्मवृन्दाद्गतभवरचितादीश्वरप्रीतिहेतोः
कुर्वन्कर्म्माणि तज्ज्ञाऽऽदरयुतकरणो भक्तिमस्यानुतिष्ठन्।
संसारे रागहानिं फलभजनजनिं मूर्तिबोधं च लब्ध्वा
तल्लोके तत्त्वबोधाद् व्रजति परमिहान्यत्र वेत्यत्र सिद्धम्॥

व्रजस्थलोकनायको बकादिदुष्टनाशकः।
स्वकीयभक्तिविभ्रमया हरिः सदा प्रतुष्यतु॥ २॥

इति श्रीसकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजप्रतापरुद्रतनूजश्रीमहाराजमधुकरसाहसूनुचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीमन्महाराजश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधानिबन्धे भक्तिप्रकाशे सामान्यभक्तिनिर्णयः।

उक्ता द्विधा भक्तिः, अनुरागात्मिका फलभक्तिः, साधनभक्तिश्चे-ति। तत्र फलभक्तिः साधनानुष्ठानादेव सिद्धेति न विधेया, फले विध्य-भावात्। साधनभक्तिस्तु नवधा विहिता।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥
इति पुंसार्पिता विष्णोर्भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥

इतिवचनात्।

श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः।
सेवेज्याऽवनतिर्दास्यं सख्यमात्मनिवेदनम्।
इति पुंसार्पिता विष्णोर्भक्तिश्चेन्नवलक्षणा॥

इति वचनाच्च। तत्र श्रवणं नाम भगवद्गुणकर्मनाम्नां यथा श्रोत्रेण ग्रहणं भवति तादृशोऽवस्थानादिव्यापारः। न तु श्रोत्रजन्यज्ञानमात्र-म्। श्रवणस्य विधेयत्वात्, ज्ञानस्य चाविधेयत्वात्। अस्मिंश्च श्रवणे प्रवृत्तिर्नानाविधकर्मसाध्येत्याशयेनोक्तम्—

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्॥ इति।

तादृशकर्माभावे श्रवणविमुखानां च नीचनिन्दोक्ता।

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥ इति।

संस्तुतः=सदृशः।

तथा—

तान् शोच्यशोच्यानविदोऽनुशोचे
हरेः कथायां विमुखानघेन।
क्षिणोति देवो निमिषस्तु तेषा
मायुर्वृथावादगतिस्मृतीनाम्॥ इति।

अनिमिषः=कालः। वृथैव वाग्गतिस्मृतयः=वाग्देहमनोव्यापारा येषाम्।

अथ तस्य पापक्षयसाधनत्वे—

शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्त्तनः।
हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्॥ इति
को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः।
शुद्धिकामो न शृणुयाद् यशः कलिमलापहम्॥ इति

तथा—

प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्।

धुनाति शमलं कृष्णः सलिलस्य यथा शरत् ॥ इति ।
शुद्धिर्नृणां न तु तथेड्य ! दुराशयानां
विद्याश्रुताध्ययनदानतपःक्रियाभिः ॥
सत्वात्मनामृषभ! ते यशसि प्रवृद्ध
सच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥ इति च ।
अनुरागात्मकफलभक्तिसाधनत्वे—
यस्तूत्तमश्लोकगुणानुवादः
सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं
कृष्णेऽमलां भक्तिमभीप्समानः ॥ इति ।
इत्थं परस्य निजवर्त्मरिरक्षयात्त
लीलातनोस्तदनुरूपविडम्बनानि ।
कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥ इति च ।
अध्यात्मविचारनैरपेक्ष्येण भगवन्मूर्तिस्फूर्तिहेतुत्वे च ।
ज्ञाने प्रयासमुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभि
र्ये प्रायशोऽजित! जितोऽप्यसि तैस्त्रिलोक्याम् ॥ इति ।
तनुवाङ्मनोभिर्नमन्तो, वार्तां सत्कुर्वन्तो ये तैः, अन्यैरजितोऽपि जितोऽसि, तेषां हृद्याविर्भूतत्वात् ।
वैराग्यहेतुत्वे मोक्षास्पृहायां च—
नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किन्त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ॥
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ इति ।
तत्वज्ञानद्वारा मुक्तिहेतुत्वे—
ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र
मात्मप्रसाद उत यत्र (१)गुणेष्वसङ्गः ॥
कैवल्यसंमतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ इति ।

(१) उभयत्र इति पाठान्तरम्, इहामुत्रचेति तदर्थं इति श्रीधरस्वामिनः ।

भगवानेव तत्स्वरूपेणाविर्भवतीत्यत्र—

ये तु त्वदीयचरणाम्बुजकोशगन्धं
जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम् ।
भक्त्या गृहीतचरणाः परया च तेषां
नापैषि नाथ हृदयाम्बुरुहात्स्वपुंसाम् ॥ इति ।

गीयमानगुणनामश्रवणे—

शृण्वन् सुभद्राणि रथाङ्गपाणे
र्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन्विलज्जो विचरेदसङ्गः ॥ इति ।

लोकेऽनुचरितस्य गानायोगाच्छ्रवणविषयेण वक्तव्ये गानयुक्तभगव-
द्विषयप्राकृतसङ्ग्रहार्थं लोके गीतानीत्युक्तम् । पौराणवैदिकसङ्ग्रहार्थश्च
शब्दः । न च "नृत्यगीतवादित्राणि न कुर्य्यान्नाप्यन्येन क्रियमाणानि
द्रष्टुं श्रोतुं गच्छेत्" इति कात्यायननिषेधविरोधः । तस्य "न हिंस्यात्"
इति हिंसानिषेधवत् रागतः प्राप्तविषयत्वात् । विहितः प्राप्तस्य निषेधे
विकल्पापत्तेः । न च देवताविषयकं गानादि रागतः प्राप्तमिति वक्तुं
शक्यम् । तथा सति तद्विषयहिंसादेरपि तथात्वापत्तेः, किञ्च रतिहेतु-
त्वेन गाने तच्छ्रवणे च प्रतिप्रसवोऽपि कात्यायनेनैवोक्तः । "कामं तु-
गीतं गायति नैव गीते वा रमत इति श्रुतेः" इति । परमेश्वरगुणगाने
च न रतिर्जायत इति सकलानुभवसिद्धम् । एतेन भगवद्गानाङ्गनृत्यवा-
दित्रयोरप्यनिषिद्धत्वं ज्ञेयम् । तथाहि । नृत्यवादित्रयोर्निषेधो न ताव-
द्गानसम्बन्धिनोः, तयोर्गाननिषेधेनैव सिद्धेः । न हि यदर्थं यत् तन्नि-
षेधे तत् प्राप्नोति, येन स्वातन्त्र्येण निषिध्येत । तस्मात् स्वात-
न्त्र्येण प्राप्तयोर्नृत्यवादित्रयोरेव निषेधः । एवञ्च गानाङ्गयोरनयोस्तन्नि-
षेधे निषेधवत् तत्प्रतिप्रसवे प्रतिप्रसव इति । वस्तुतस्तु भगवत्सं-
बन्धिनामेषां रागतः प्राप्त्यभावेन न निषेधविषयत्वम् । महाव्रते "दिक्षु
दुन्दुभयो नदन्ति" पत्न्य उपगायन्ति" इति विहितयोरिव दुन्दुभिनादतदु-
पगानयोः, अत एव "ग्राम्यगीतं न शृणुयात्" इत्यत्र भगवद्गीतं तु शृणु-
यादेवेत्युक्तं श्रीधरस्वामिभिः । श्रूयते च भगवत्सम्बन्धिनां नृत्यगीतवादि-
त्राणां विधिर्लिङ्गपुराणेऽम्बरीषमार्कण्डेयसंवादे ।

पुरा त्रेतायुगे कश्चित्कौशिको नाम वै द्विजः ।
अगायत हरिं तत्र लयतालसमोचितम् ॥

इत्यादिना द्विजाधिकारेणाध्यायेकामनुक्रम्याम्बरीषं क्षत्रियं प्रत्यु-

पसंहृतं मार्कण्डेयेन ।

तस्मात्त्वया महाराज विष्णुक्षेत्रे विशेषतः ।
अर्चाग्रं गाननृत्यादि वाद्योत्सवसमन्वितम् ॥
कर्तव्यं विष्णुभक्तैर्हि पुरुषैरनिशं नृप ।
श्रोतव्यश्च त्वया नित्यं स्तोतव्योऽसौ हरिस्त्वया ॥ इति ।
विष्णुक्षेत्रे ततो विद्वान् कारयेद्भक्तिसंयुतः ।
गाननृत्यादिकं चैव विष्ण्वाख्यानकथां तथा ॥
जातिस्मृतिश्च मेधाञ्च परमोन्नतिमेव च ।
प्राप्नोति विष्णुसालोक्यं सत्यमेतन्नराधिप ! ॥ इति ।

तत्रैवाग्निमाध्याये—

ब्राह्मणो वासुदेवाख्या गायमानोऽनिशं नृप ।
हरेः सालोक्यमाप्नोति गाने रुद्राधिको भवेत् ॥
अन्यथा नरकं गच्छेद् गायमानोऽन्यदेव हि ॥ इति ।

ततश्चैतद्वाक्यवशादपि कात्यायननिषेधो रागतः प्राकृतान्यगानविषयः । तथा—

श्रीभागवतेऽपि-

उपगायन्गृणन्नृत्यन् कर्माण्यभिनयन्मम ।
मत्कथाः श्रावयञ् शृण्वन्मुहूर्तं क्षणिको भवेत् ॥

इति विधिः श्रुतः ।

वाराहेऽपि—

गायन्मम यशो नित्यं भक्त्या परमया युतः ।
मत्प्रसादात् स शुद्धात्मा मम लोकाय गच्छति ॥
[अ० १३९ श्लो० २८—२९]
गीयमानस्य गीतस्य यावदक्षरपङ्क्तयः ।
तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥
[अ० १३९ श्लो० २४]

तत्रैवोपाख्यानान्ते—[अ० १३९ श्लो० १०४—११३]

एतत्ते कथितं देवि गायनस्य फलं महत् ।
यस्य गीतस्य शब्देन तरेत्संसारसागरम् ॥
वादित्रस्य प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।
प्राप्तवान् मानुषो येन देवेभ्यः समतां(१) स्वयम् ॥

---

(१) सबकामिति वराहपुराणे पाठः ।

शम्पातालप्रयोगेन सन्निपातेन वा पुनः ।
नववर्षसहस्राणि नववर्षशतानि च ॥
कुबेरभवनं गत्वा मोदते वै यदृच्छया ।
कुबेरभवनाद्भूयः स्वच्छन्दगमनालयः ॥
शम्पादितालसम्पातैर्मम लोकं स गच्छति ।
नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥
मानवो येन गच्छेत्तु छित्वा संसारबन्धनम् ।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः ।
फलम्प्राप्नोति सुश्रोणि ! मम कर्मपरायणः ।
रूपवान् गुणवान् शूरः शीलवान् सत्पथे स्थितः ॥
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥ इति ।

न चात्र विध्यभावः शङ्क्यः । अन्यविधिशेषत्वाभावेन विधिकल्पनावश्यंभावात् ।

बृहन्नारदीये—

देवतायतने यस्तु भक्तियुक्तः प्रनृत्यति ।
गीतानि गायत्यथ वा तत्फलं शृणु भूपते ॥
गन्धर्वराजतां गानैर्नृत्याद्रुद्रगणेशताम् ।
प्राप्नोत्यष्टकुलैर्युक्त आकल्पं मोक्षभाग्भवेत् ॥ इति ।
तालादिकांस्यनिनदं कुर्वन्विष्णुगृहे नरः ।
यत्फलं लभते राजन् ! शृणुष्व गदतो मम ॥
सर्वपापविनिर्मुक्तो विमानशतसङ्कुलः ।
गीयमानश्च गन्धर्वैर्विष्णुना सह मोदते ॥ इति ।

एवञ्च न म्लेच्छितवै म्लेच्छोह वा एष यदपशब्द इति प्राकृतनिषेधोऽपि रागतः प्राप्तविषय एव, नतु भगवद्विषयप्राकृतविषयः । तस्य रागतः प्राप्त्यभावात् । "तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्" इति येन केनाप्युपायेन जायमानभगवद्ध्यानस्य निःश्रेयसोपयोगप्रतिपादनाच्च भगवद्विषयप्राकृतस्यापि भगवद्ध्यानहेतुत्वमनुभवसिद्धम् ।

स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ।
स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत् ॥

इत्यनेन स्पष्टं प्राकृतविधानाच्च । उक्तञ्च वृद्धैः—भगवति द्वेषादिकर्तॄणामपि चैद्यादीनां सद्गतिः सायुज्यादिरूपा श्रूयते ।

वैरेण यं नृपतयः शिशुपालपौण्ड्र
शाल्वादयो गतिविलासविलोकनाद्यैः।
ध्यायन्त आकृतधियः शयनासनादौ
तत्साम्यमापुरनुरक्तधियां पुनः किम्॥ इति।

सा च न द्वेषादेः फलम्, तस्य—

यस्तु नारायणं द्वेष्टि तं विद्यादन्यरेतसम्॥
न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्॥

इत्यादिना निषिद्धत्वात्। किन्तु द्वेषादिजन्याऽऽनुषङ्गिकपरमेश्वरानुस्मरणस्य फलम्। ततश्च द्वेषादिना परमेश्वरानुस्मरणे सद्गतिश्चेत् भाषया भक्त्यानुवादे तच्छ्रवणे च सद्गतिर्भवतीति किं वक्तव्यमिति। किञ्च "कौमार आचरेत्प्राज्ञो धर्मान्" इति बाल्यमारभ्य श्रवणकीर्तनादि विहितम्, "कोऽतिप्रयासोऽसुरबालका हरेः" इत्यादिना च तत्र प्रयासाभाव उक्तः। न च तद्वयसां प्रयासमन्तरेण साधुशब्दज्ञानं भवति। दृश्यते च सर्वदेशेषु भाषया पुराणार्थकथनं तच्छ्रवणञ्च शिष्टानाम्। उक्तञ्च—

तद्वाग्विसर्गो जनताघसंप्लवो
यस्मिन्प्रतिश्लोकमबद्धवत्यपि।
नामान्यनन्तस्य यशोऽङ्कितानि यच्
छृण्वन्ति गायन्ति गृणन्ति साधवः॥ इति

अबद्धवत्यपि=अपशब्दादियुक्तेऽपीति, उक्तम्।

तथा—

वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम्॥ इति।

तत् सिद्धं यथाकथंचिद् यतः कुतश्चिद्भगवद्गुणनामश्रवणं निःश्रेयसहेतुरिति।

गुणकर्मनाम्नां क्वचिन्निरपेक्ष्यं श्रवणे श्रूयते।
निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात्।
क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात्॥ इति।

यस्तूत्तमश्लोकगुणानुवादः, तमेव नित्यं शृणुयादिति च गुणानुवादश्रवणे।

अथ कर्मानुवादश्रवणे—

कर्माणि कर्मकषणानि यदूत्तमस्य
श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन्॥ इति।

नामश्रवणे—

न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापलयः(१)।
यन्नामसकृच्छ्रवणात् पुल्कसकोऽपि विमुच्यते साक्षात्(२) ॥ इति ।
नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्तीति च ।

क्वचित् द्वयोः समुच्चयः श्रूयते ।

यशःकथा भगवतः कथनीयोरुकर्मणः ।
गुणकर्माश्रयाः पुंभिः संसेव्यास्ता मुमुक्षुभिः ॥ इति ।

क्वचित्सर्वेषाम्—

"जन्मानि कर्माणि च यानि लोके गीतानि नामानि" इति ।

अतश्च पूर्ववदत्रापि संभवात्समुच्चय इत्यास्तां तावत् ।

तदयं सङ्क्षेपः—

जातादरः कृष्णकथासु पुण्यैर्गीता इमाः केन च नृत्यतापि ।
भाषानिबद्धाश्च श्रुताश्च वाद्यैः शृण्वन् विमुक्तो भवतीति सिद्धम् ॥
यत्पदसरसिजयुगलं प्रभजति सिद्धिर्भवति समस्तापि ।
स्वगुणश्रवणमहिम्ना तुष्यत्वमुना हरिः कृपालुः सः ॥

* ॥ इति श्रीभक्तिप्रकाशे श्रवणनिर्णयः ॥ *

अथ सङ्कीर्तननिर्णयः ॥

सङ्कीर्तनं नाम भगवद्गुणकर्मनाम्नां स्वयमुच्चारणम् । अत्र च प्रवृत्तिर्नानाविधशुभकर्मसाध्या ।

इदं हि पुंसस्तपसः श्रुतस्य स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।
अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥इति वचनात् ।

ईषद्विरक्तस्य मुक्त्युपयोगिभगवत्संकीर्तनाधिकारे—

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ॥
मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥ इति ।

तथाग्नेये—

अनन्यगतयो मर्त्या भोगिनोऽपि परन्तप ! ।
ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जिताः ॥
सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ।
सुखेन यां गतिं यान्ति न तां सर्वेऽपि धार्मिकाः ॥ इति ।

---

(१) पापक्षय इति श्रीभागवते पाठः ।

(२) संसारादिति श्रीभागवते पाठः ।

सङ्कीर्तनस्य सत्त्वशुद्धिहेतुत्वे—

न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भनम् ॥ इति।

नातः परं कर्म्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्तनात्।
न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ इति।

पाद्मेऽपि।

सकृदुच्चारयेद् यस्तु नारायणमतन्द्रितः।
शुद्धान्तःकरणो भूत्वा निर्वाणमधिगच्छति ॥

एवं शुद्धान्तःकरणस्य कथञ्चिज्जातमपि पातकं सङ्कीर्तनेनैव नश्यति। यथोक्तम्-

तस्मात्प्रमुच्य सुधियो भगवत्यनन्ते
सर्वात्मना विदधते खलु भावयोगम्।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां
स्यात्पातकं तदपि हन्त्युरुगायवादः ॥

सङ्कीर्तनाकरणे निन्दाऽपि श्रूयते—

जिह्वां लब्ध्वापि यो विष्णुं कीर्तनीयं न कीर्तयेत् ॥
लब्ध्वापि मोक्षनिःश्रेणीं स नारोहति दुर्मतिः ॥ इति।

गां दुग्धदोहामसतीं च भार्य्यां देहं पराधीनमसत्प्रजाञ्च।
वित्तं त्वतीर्थीकृतमङ्ग! वाचं हीनां मया रक्षति दुःखदुःखी॥ इति च।

अथ सङ्कीर्तनस्य फलभक्तिजनकत्वेऽपि—

इत्थं हरेर्भगवतो रुचिरावतार
वीर्याणि बालचरितानि च शन्तमानि।
अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो
भक्तिं परां परमहंसगतौ लभेत ॥ इति।

विरक्तिहेतुत्वे—

एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः।
भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥ इति।

भगवन्मूर्तिस्फूर्तिहेतुत्वे—

प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः।
आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ इति।

संसारनिवर्तकत्वे—

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्।
ततः सद्यो विमुच्येत यद् बिभेति स्वयं भयम् ॥ इति।
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः।
यत्र सङ्कीर्तनेनैव मुक्तबन्धः परं व्रजेत् ॥ इति च।

शैवे।

महादेवमहादेवमहादेवेति यो वदेत्।
एकेनैव भवेन्मुक्तिर्द्वाभ्यां शम्भुर्ऋणी भवेत॥ इति।

बृहन्नारदीये।

घोरे कलियुगे प्राप्ते हरिनामपरायणाः।
समस्ताघौघनिर्मुक्ता यास्यन्ति परमां गतिम्॥ इति।
अहो चित्रमहो चित्रमहो चित्रमिदं द्विजाः।
हरिनाम्नि स्थिते लोकः संसारे वर्तते पुनः॥ इति च।

वाराहे।

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥ इति।

भविष्ये।

ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजादयः।
यत्र तत्रानुकुर्वन्तो विष्णोर्नामानुकीर्तनम्।
सर्वपापविनिर्मुक्तास्तेऽपि यान्ति सनातनम्॥ इति।

वामनपुराणे।

ये कीर्तयन्ति वरदं वरपद्मनाभं
शङ्खाब्जचक्रशरचापगदासिहस्तम्।
पद्मालयावदनपङ्कजषट्पदाख्यं
नूनं प्रयान्ति सदनं मधुघातिनस्ते॥ इति।

विष्णुधर्मे।

गोविन्देति समुच्चार्य पदं क्षपितकल्मषः।
क्षत्रबन्धुर्विनष्टात्मा गोविन्दत्वमुपेयिवान्॥ इति।

मुक्तिहेतुत्वञ्च ज्ञानद्वारा—

यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदम्॥

इति गरुडवचनात्,

नामसंकीर्तनादेव तारकं ब्रह्म दृश्यते।

इति च्यवनस्मृतेश्च। सेयमन्तःकरणशुद्धिमारभ्य मुक्तिपर्यन्ता प्रणालिका मुख्यत एवोक्ता—

मात्स्ये—

विष्णोर्नामैव पुंसः शमलमपनुदत्पुण्यमुत्पादयच्च
ब्रह्मादिस्थानभोगाद्विरतिमथ गुरुश्रीपदद्वन्द्वभक्तिम्।
तत्त्वज्ञानञ्च विष्णोरिह मृतिजननभ्रान्तिबीजं च दग्ध्वा
संपूर्णानन्दबोधे महति च पुरुषे स्थापयित्वा निवृत्तम्॥ इति।

अत्र पुण्यशब्देन सत्त्वगता भगवन्मूर्तिस्फूर्तियोग्यतोक्ता । भक्तिशब्देन चानुरागरूपा फलभक्तिः । उत्पादयन्तीति चकारान्मूर्तिस्फूर्तिः । अथवात्म-विचारस्येव भगवन्नाम्नो नापेक्षितसत्त्वशुद्धयर्थं स्वान्यकर्मापेक्षा, नापि अनुग्राह्यप्रमाणान्तरापेक्षा, किन्तु स्वयमेव शोधकं ज्ञानकरणं तादृत्त्या-शयेनैवकारः । रामकृष्णादिशब्दा हि नित्यमभ्यस्यमानाः शक्त्या सगु-णं ब्रह्मोपयन्तो—

रमन्ते योगिनो नित्यं नित्यानन्दे परात्मनि ।
इतिरामपदेनासौ परं ब्रह्माभिधीयते ॥ इति ।
कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इत्येवमनवच्छिन्नं ब्रह्म बोधयन्तस्तद्विषयां बीजभूतामविद्यां निवर्त-यन्तोऽखिलं तत्कार्यभ्रमं निवर्तयन्ति । वाराणस्यां मृतस्य पुंस इव भगवन्महेश्वरोदितो रामशब्दः । यथोक्तं—

वाराहे—

पेयंपेयं श्रवणपुटकैरामनामाभिधानं
ध्येयंध्येयं मनसि सततं तारकब्रह्मरूपम् ॥
जल्पञ्जल्पन् प्रकृतिविकृतौ प्राणिनां कर्णमूले
वीथींवीथीमटति जटिलः कोऽपि काशीनिवासी ॥ इति ।

न च रामशब्दस्य पदत्वात्कथमज्ञाननिवर्त्तकप्रमितिजनकत्वमिति वाच्यम् । त्वं रामोऽसीत्येवं भगवदुक्तरामशब्दस्य तज्जनकत्वोपपत्तेः । नचैवं पूर्वोक्तान्तःकरणकरणत्वविरोधः । यो हि रामरामेत्येवं भगवन्ना-मैव यावदन्तिमसाक्षात्कारं सङ्कीर्त्तयति तं प्रति सन्तुष्टभगवता त्वमेव रामोऽसीत्येवं उपदिश्यमानस्य तस्यैव करणत्वोपपत्तेः । यस्तु श्रवणादि-भक्तिमात्ररसिकस्तच्चित्ते भगवान्स्वयमाविर्भवतीति तादृशाधिकारि-णं प्रति चित्तस्यैव करणत्वमित्यविरोधः । अत एव "मच्चिता मद्गत-प्राणा" इत्यनेकभक्तधर्माधिकारेण "नाशयाम्यात्मभावस्थ" इत्येवोक्तम् । तदित्थमुक्तप्रणालिकया सङ्कीर्तनस्य न मुक्तिहेतुज्ञानहेतुत्वम् । श्रूयते च

"तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्तन । आ-स्य जानन्तो नाम चिद् विवक्तन महस्ते विष्णो सुमतिं भजामहे" इति ।

अस्यार्थः कैश्चिदेवमुक्तः । तमु=प्रसिद्धं । श्रुत्यादिषु पूर्वमन्त्रे च [तमु इति प्रसिद्ध] इत्यर्थको निपातः । जन्ममरणादिसंसारसंतप्तानां कोमलामन्त्रणार्थ इत्यन्ये । स्तोतारः=स्तुध्वम् , गुणसङ्कीर्तनं कुरु-ध्वमित्यर्थः । ननु यज्ञाद्यनुष्ठाने प्रवर्तन्ते, भगवद्गुणसंकीर्तने तु लज्जन्ते,

अत आह । पूर्व्यम्=पूर्वजमित्यर्थः । न हि स्वपूर्वजस्तवने कश्चो-चितेति भावः । ऋतस्य=वेदान्तवाक्यस्य । गर्भ=प्रतिपाद्यं । जनुषा पिपर्तनेति जन्म पूर्णतामितिवक्तव्ये (१)विपरीतानिर्देशश्छान्दसः । एवञ्च स्तुते-र्जन्मसमाप्तिः फलमुक्तं भवति ।

अन्ये त्वेवमाहुः । ऋतस्य=कर्म्मफलस्य "ऋतं पिबन्ता"विति मन्त्रे ऋतशब्दस्य तथा व्याख्यातत्वात् । गर्भ कारणभूतं भ्रान्तिज्ञानम् । जनुषा= जनकेनाज्ञानेन, सहार्थे तृतीया । पिपर्तन=पूरयत समापयतेत्यर्थः । एवञ्च सकार्याज्ञाननिवृत्तिः फलमुक्तं भवतीति । इतिकर्तव्यताकाङ्क्षा-यामाह । यथाविदेति । गुणाहीनामानन्त्येऽपि स्वमतिपरिणामावधि वैदि-कैः पौराणैः संस्कृतैः प्राकृतैर्वा यथाकथञ्चित्संकीर्तननिष्पादनमेवेति कर्तव्यता, व्रीहीनोमेष्विव [पू०मी०अ० ८ पा० ४ अधि० ४] तत्संपादन-मिति भावः । स्तुत्यसम्भवं जानन्तो यूयमस्य परमात्मनो नामचित्= नामापि विवक्तन=वदतेति ।

अन्ये तु जानन्त=इति ज्ञानस्यावान्तरव्यापारत्वसूचनम् । अस्य=वि-ष्णोः, नाम, आ=ईषद्, विवक्तन=वक्त, वदतेति यावत् । चिदित्यव्ययं भगव-द्गुणसङ्कीर्तनात् तत्तद्गुणज्ञानसापेक्षान्नामसङ्कीर्तनस्याल्पायाससाध्यत्वं प्रतिपादयति, फलं तु भक्ष्यमाणिन्यायेनोभयत्र सम्बध्यत इत्याहुः ।

एवं परानुपदिश्य श्रुतयः स्वयमूचुः । एते भजन्तु वा, मा वा, वयं तु तेऽत्र । महः=प्रकाशात्मकं स्वरूपम् । हे विष्णो सुमतिं=शुद्धज्ञानात्मकं भजामहे=सेवामह इति ।

अन्ये त्वेवमाहुः । श्रुतिरुभयविधस्य सङ्कीर्तनस्य फलान्तरं सूचय-न्तीति उपदेष्टव्यान् पुरुषान्प्रति ब्रूते । महः=प्रकाशात्मकम् । ते=तव । सुमतिं=शुद्धमतिम् । भजामहे । विष्णो इति सम्बोधनम्, त इत्येकवचन-ञ्च सङ्कीर्तनकर्तॄणां विष्णुसायुज्याभिप्रायेण । अन्यथा पादत्रयेण पुरुष-सम्बोधनमन्त्यपादेन तु विष्णोः सम्बोधनमित्यसंबद्धं स्यात् । भजामहे इति बहुवचनमितरलोकसाहित्याभिप्रायेण । एवं चाहङ्ग्रहोपासनयेव भगवन्नामगुणसङ्कीर्तनाभ्यां भगवत्सायुज्यं भवतीत्युक्तं भवति ।

तथा च नानापुराणादिवाक्यसङ्ग्रहकरनाममाहात्म्यग्रन्थे--

पातञ्जलसंहितायाम्—

> नृहरे इति यो नित्यं कीर्तयेच्छुद्धबुद्धिमान् ।
> विमुक्तः सर्वपापेभ्यो हरिं सायुज्यमृच्छति ॥ इति

---

(१) करणत्वनिर्देश इत्यर्थः ।

वात्स्यायनसंहितायाम्—

गोघ्नः सुरापो नियतं हरिरित्यसकृद्वदन्।
एनसः स विमुक्तात्मा हरेः सायुज्यमाप्नुयात्॥ इति।

शातातपसंहितायाम्—

नाम्नां मे किल कीर्तनान्मयि नरः सायुज्यमायात्यहो। इति।

एवञ्चोक्तमन्त्रेणापि ज्ञानोद्देशेन सङ्कीर्तनविधानात्सिद्धं तस्य तद्धेतुत्वम्।

ननु "देवाँश्च याभिर्यजते ददाति" इतिवद्स्य मन्त्रत्वान्न विधायकत्वम्, ब्राह्मणगतस्यैवाख्यातस्य विधायकत्वादिति चेन्न। "यस्योभयं हविरार्तिमार्च्छेत्" इत्यस्य सत्यपि ब्राह्मणगतत्वेऽविधायकत्वात्, "वसन्ताय कपिञ्जलानालभेत" इति सत्यपि मन्त्रत्वे विधायकत्वस्याचार्यैरुक्तत्वाच्च(१) अतश्च न ब्राह्मणगतत्वमन्त्रगतत्वे विधायकत्वाविधायकत्वयोः प्रयोजके, किन्त्वपूर्वार्थत्वप्राप्तार्थत्वे। अत एव सत्स्वपि विधिप्रत्ययाभिधानादिलिङ्सयोगवर्तमानापदेशेषु, अपूर्वार्थत्वाद्विधित्वमुक्तम्, "उपरि हि देवेभ्यो धारयति" इत्यत्र "विधिस्तुधारणेऽपूर्वत्वात्" [पू० मी० अ० ३ पा० ४ सू० १५] इति। सङ्कीर्तनस्य च मुक्तिहेतुता न प्रमाणान्तरसिद्धेति युक्तमस्य विधित्वम्। नचैवमस्य वाक्यस्य सङ्कीर्तन विधायकत्वे न स्मारकत्वम्, स्मारकत्व वा न विधायकत्वम्, कस्माद्विधायकत्वस्मारकत्वयोर्विरोधादिति वाच्यम्। "कर्मणा वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात्" [पू० मी० अ० ५ पा० १ सू० ४] इत्यत्र विधीनामपि स्मारकत्वस्याचार्यैरुक्तत्वात्। विधानस्मरणयोः कालभेदेन विरोधाभावाच्च।

उक्तञ्च—

विधिशक्तिर्न मन्त्रस्य नियोगेनापनीयते।
स्वतो विधास्यन् ह्येष नियोगात्स्मारयिष्यति॥
[तन्त्रवार्तिक० अ० २ पा० २ सू० ३०] इति।

न च वाक्य[न]ष्टप्रार्थ्यावाकाङ्क्षो विनियुक्तस्यास्य मन्त्रस्य कथं स्वार्थविवक्षेतिशङ्क्यम्। ब्रह्मयज्ञपारायणादौ विनियुक्तस्यापि स्वाध्यायस्यार्थविवक्षावदुपपत्तेः। किञ्च अन्यपरादप्यस्माद्वाक्यात्सङ्कीर्तनस्य पुरुषार्थहेतुता तावत्प्रतीयते। ज्ञानञ्च स्वतः प्रमाणम्। न चात्र विप्र-

(१) स्पष्टं चेदं मीमांसाद्वितीयाध्यायद्वितीयपादगतषष्ठसप्तमयोर्मन्त्राविधायकत्वमन्त्रनिर्वचनाधिकरणयोः।

लम्भकादिवाक्यवदप्रामाण्यशङ्का, अपौरुषेयत्वात्। न च "यजमानः प्रस्तरः" इतिवत्प्रमाणान्तरविरोधः, येन स्वार्थपरित्यागेन गौणताश्रियेत। नापि "वायुर्वै क्षेपिष्ठा देवता" इतिवदनुवादत्वम्, संवादिप्रमाणाभावात्। न च यत्परः शब्दस्तस्यैवार्थस्य तत्प्रमाणकत्वम्; अस्य च मन्त्रस्यान्यपरत्वे कथं सङ्कीर्तनश्रेयःसाधनतायास्तत्प्रमाणकत्वमिति शङ्क्यम्। प्रत्यक्षानुमानादिजन्यज्ञानस्येव शाब्दज्ञानस्यापि साधकप्रमाणभावमात्रेण प्रामाण्योपपत्तौ तात्पर्यस्यापि तत्प्रयोजकत्वकल्पने गौरवात्। विशिष्टविधेर्विशेषणांशे तात्पर्याभावेऽपि तज्ज्ञानस्य तदंशे प्रमात्वाश्रयणाच्च। कल्पितविशेषणविधेरेव विशेषणे तात्पर्याच्च विशिष्टविधेस्तत्र तात्पर्याभावः। न च श्रुतवाक्यस्य विशेषणपरत्वाभावे कथं विशिष्टपरत्वमिति वाच्यम्। विशेषणविधित्वाभावेऽपि विशिष्टविधित्वस्योपपत्तेः। किञ्च लोकेऽपि न तात्पर्यज्ञानं शाब्दप्रमामात्रोपयोगि, तदन्तरेणापि शाब्दप्रमादर्शनात्(१)। किन्तु क्वचिदसम्भावनानिवृत्त्यर्थमपेक्ष्यते। सा चापौरुषेयत्वादिना सिद्धेति किं तात्पर्येण। तस्मात्सिद्धमेतद्वाक्यबलादपि सङ्कीर्तनस्य मुक्तिहेतुज्ञानजनकत्वमिति।

तदिदं सङ्कीर्तनं संयोगपृथक्त्वन्यायेन [पू० मी० अ० ४ पा० ३ अधि० ३ सू० ५] यज्ञध्यानार्चनफलेऽपि विहितम्।

वैष्णवे बृहन्नारदीये च—

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम्॥ इति।

तथा—

श्रीभागवते गारुडे च।

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात्॥ इति।

अत्र न तावद्ध्यानादयस्तदङ्गत्वेन कृतादयो वा विधेयाः। अनेकविधाने वाक्यभेदप्रसङ्गात्, "यदाप्नोति तदाप्नोति"त्यस्याऽऽनर्थक्यप्रसङ्गाच्च। ध्यानादीनां यच्छब्दोपबन्धेन कीर्त्तनस्य तच्छब्देन निर्देशायोगाच्च। अत एव "धाग्नी पूर्णमासेऽनूच्येत वृधन्वती अमावास्यायाम्" इतिवत् [पू० मी० अ० ३ पा० १ अधि० ११ सू० २३] ध्यानादीनां कृतादिषु व्यवस्थापि न विधेया। तद्विधौ हि कृते ध्यायेत्, यजेत्

(१) अव्युत्पन्नोच्चरितवाक्यज्ञानाद् व्युत्पन्नस्य विनैव वक्तृतात्पर्यज्ञानं शाब्दप्रमित्युत्पत्तेरिति भावः।

त्रेतायामित्येव स्यात्, न तु यदाप्नोति तदाप्नोतीति सङ्कीर्तनस्य ध्यानादिभिः फलैक्यं निर्दिश्येत । कृते ध्यायेदिति व्यवस्थाश्रयणे युगान्तरे तदभावप्रसङ्गाच्च । वाजपेयोऽग्निवामावास्यायाम् । न च युगान्तरे यन्महता प्रयासेन साध्यते तदत्राल्पेनेत्ययं कलिप्रशंसेयमिति वाच्यम् । कलिकालस्याननुष्ठेयत्वेन प्रवृत्त्यविषयत्वात्स्तुतिवैयर्थ्यात् । न च तत्र क्रियान्तरं विधातुमियं तत्स्तुतिरिति वाच्यम् । एतत्समीपे क्रियान्तरविधेरभावात् । नापि तत्सम्बन्धितया कीर्त्तनं विधातुम् । कीर्त्तने फलान्तराश्रवणेन तदपेक्षितफलसमर्पणोपपत्तौ स्तुतिपरत्वायोगात् । न च कीर्तनाश्रितः कालः फलोद्देशेन विधीयत इति वाच्यम् । कीर्त्तनस्य फलान्तरसम्बन्धितया पूर्वं विधानाभावेनाश्रयत्वानुवादायोगात् । अथ—

> मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ।
> सर्वं करोति निश्छिद्रं नामसङ्कीर्तनं तव ॥

"यस्य स्मृत्या" इत्यादिवाक्यपर्यालोचनया कृत्यङ्गस्य सङ्कीर्तनस्य स्तुतिरियमिति नैतत्पुरुषार्थमिति चेत् । न । "सर्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः" इत्यादिना पुरुषार्थत्वस्यावगमात् । तदुभयविधस्यापि "ध्यायन्कृते" इत्यादिना स्तुतिरिति चेन्न । तत्समीपे यागाभावेन तत्स्तुतित्वायोगात् । यथोक्तं, "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति । [पू० मी० अ० १ पा० २ सू० ७] नाप्यनुवादमात्रम् । कस्यचिद्विधेः समीपे यागाभावेन केवलानुवादत्वे आनर्थक्यात् । तस्मादत्र ध्यानादिफलोद्देशेन सङ्कीर्तनं विधीयते । न चानेकफलोद्देशेन सङ्कीर्तनविधानेऽपि वाक्यभेदः स्यादिति शङ्क्यम् । "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इतिवत् "तदाप्नोति" इत्येकेन तच्छब्देनानेकेषामुपादानाद्वाक्यभेदाभावात् । न चैवं तदाप्नोतीत्येतावतैव फलविशेषसमर्पणाद् "ध्यायन्कृते" इत्यादि यदाप्नोतीत्यन्तमनर्थकं स्यादिति वाच्यम् । वैश्वदेव्यामिक्षेत्यत्रामिक्षाशब्दस्य वैश्वदेवीशब्दापेक्षितविशेषसमर्पकत्वेनार्थवत्त्वात् ।

यथाहुः—

> आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
> आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम् ॥ इति ।

न च कलिकालविधाननिमित्तो वाक्यभेदः । तद्विशिष्टकीर्त्तनविधानात् ।

अयं वाक्यार्थः । तत्तद्युगे ध्यानादिभिर्यदवाप्यते तत्फलावनुष्ठितेन

कीर्त्तनेन भावयेदिति। एवं वक्ष्ये सङ्कीर्त्त्येति निर्देशो दार्विहोमन्यायेन सङ्कीर्त्तनसम्पादनमेवेतिकर्त्तव्यता नान्येति सूचनार्थः। तत्सिद्धं ध्यानादिफले सङ्कीर्त्तनं विधीयत इति।

तथा तत्तत्कार्यविशेषसाधनत्वेन तत्तन्नामसङ्कीर्त्तनमुक्तं हेमाद्रौ—

मार्कण्डेयवाक्ये—

कूर्मं वराहं मात्स्यं वा जलसन्तरणे स्मरेत्।
भ्राजिष्णुमग्निजनने जपेन्नाम त्वतन्द्रितः॥
सङ्ग्रामाभिमुखो गच्छन् संस्मरेदपराजितम्।
केशवं पुण्डरीकाक्षं पुष्कराक्षं तथा जपेत्॥
नेत्रबाधासु सर्वासु हृषीकेशं तथैव च।
अच्युतं चामृतं चैव जपेदौषधकर्मणि॥
गरुडध्वजानुस्मरणादापदो मुच्यते नरः।
ज्वरदुष्टशिरोरोगविषवीर्यश्च शाम्यति॥
ग्रहनक्षत्रपीडासु देहबाधाटवीषु च।
दस्युवैरिनिरोधेषु व्याघ्रसिंहादिसंकटे॥
अन्धकारे तथातीव्रे नरसिंहेति कीर्तयेत्।
नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम्॥
वामनं खड्गिनञ्चैव दुःस्वप्नादिषु संस्मरेत्।
अग्निदाहे समुत्पन्ने संस्मरेज्जलशायिनम्॥
बलभद्रञ्च युद्धार्थी कृष्यारम्भे हलायुधम्।
उत्तारणं वाणिज्यार्थी श्रीशमभ्युदये तथा॥
जगतो मङ्गलं विष्णुं माङ्गल्येषु प्रकीर्तयेत्।
उत्तिष्ठन्कीर्तयेद्विष्णुं प्रस्वपन् माधवं नरः॥
भोजने चैव गोविन्दं सर्वत्र मधुसूदनम्।
नारायणं सर्वकालं क्षुतप्रस्खलितादिषु॥
स्नाने देवार्चने होमे प्रणिपाते प्रदक्षिणे।
कीर्त्तयेद्वासुदेवञ्च अनुक्तेष्वपि यादवम्॥
कार्य्यारम्भे तथा राजन् यथेष्टं नाम कीर्त्तयेत्।
सर्वाणि नामानि हि तस्य राजन् सर्वार्थसिद्ध्यै तु भवन्ति पुंसः।
तस्माद्यथेष्टं खलु देवनाम सर्वेषु कार्येषु जपेत्तु भक्त्या॥ इति।

अत्र जलप्रतरणादिषु तत्तन्नामसङ्कीर्त्तनस्य तन्निर्विघ्नसिद्ध्यादिकमेव प्रयोजनं स्पष्टमवसीयते। भोजनादिषु तु विषयसम्बन्धकृततत्प्रवणतानिरासेन भगवत्प्रवणता सङ्कीर्त्तनस्य प्रयोजनम्।

यथोक्तं—

क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते ॥ इति ।

नामसङ्कीर्तनाद्याविष्टचित्तत्वमनुभवसिद्धम् ।

अथ सङ्कीर्त्तनस्य पापक्षयसाधनत्वे नानापुराणवाक्यानि लिख्यन्ते—

श्रीभागवते—

स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ इति ।

यतः=नामोच्चारणात् भगवतस्तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयमिति मतिर्भवति । यद्वा तद्विषया विष्णुविषया नामोच्चारयितुः ।

यद्द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् । इति च ।

पाद्मे ।

यस्तु सङ्कीर्त्तयेन्नित्यं नारायणमनामयम् ।
स पूतो नात्र सन्देहो महापातकसङ्कटात् ॥
यत्र तत्र स्थितो वापि कृष्णकृष्णेति कीर्त्तयेत् ।
सर्वपापविशुद्धात्मा स गच्छेत्परमां गतिम् ॥ इति ।

वैष्णवे—

यन्नाम कीर्तितं भक्त्या विलायनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥ इति ।

बृहन्नारदीये ।

घोरे कलियुगे प्राप्ते हरिनामपरायणाः ।
समस्ताघौघनिर्मुक्ता यास्यन्ति परमां गतिम् ॥ इति ।

आग्नेयपुराणे ।

न भयं यमदूतानां न भयं रौरवादिकात् ।
न भयं प्रेतराजस्य गोविन्देति च जल्पताम् ॥ इति ।

ब्रह्मवैवर्ते ।

हनन्ब्राह्मणमत्यन्तं कामतो वा सुरां पिबन् ।
कृष्णकृष्णेत्यहोरात्रं सङ्कीर्त्य शुचितामियात् ॥ इति ।

वाराहे ।

अभक्ष्यभक्षणात्पापमगम्यगमनाच्च यत् ।
नश्यते नात्र सन्देहो गोविन्दस्य च कीर्त्तनात् ॥
स्वर्णस्तेयं सुरापानं गुरुदाराभिमर्शनम् ।
गोविन्दकीर्त्तनात्सद्यः पापं याति महामुने ॥

तावत्तिष्ठति देहेऽस्मिन्कलिकल्मषसम्भवः ।
गोविन्दकीर्तनं यावत् कुरुते मानवो नहि ॥ इति ।

कौर्मे ।

गोविन्देति सदा भक्त्या येन गीतं महात्मना ।
सहस्रांशेन मुच्येत पापात्तु गुरुतल्पगात् ॥ इति ।

मात्स्ये ।

परदाररतो वापि परापकृतिकारकः ।
विशुद्धो मुक्तिमाप्नोति कृष्णनामानुकीर्त्तनात् ॥

गारुडे ।

गुरुदाराभिगमने स्वजनाभिगमेऽपि यत् ।
तत्पापं याति गोविन्दगोविन्देति च कीर्त्तनात् ॥ इति ।

ब्रह्माण्डे—

महापातकयुक्तोऽपि कीर्त्तयन्ननिशं हरिम् ।
शुद्धान्तःकरणो भूत्वा जायते पङ्क्तिपावनः ॥ इति ।

बृहन्नारसिंहे ।

गोविन्देति वदञ्जन्तुः प्रत्यहं नियतेन्द्रियः ।
सर्वपापविनिर्मुक्तः सुरवद्भासते नरः ॥ इति ।

आदित्यपुराणे ।

हरेः सङ्कीर्त्तनं पुण्यं महापातकनाशनम् । इति ।

वायुपुराणे ।

नमो नारायणायेति यस्तु कीर्त्तयते मुदा ।
गुरुतल्पशतेनापि सद्यस्तेन प्रमुच्यते ॥ इति ।

नन्दिपुराणे ।

सर्वदा सर्वकालेषु ये तु कुर्वन्ति पातकम् ।
नाम सङ्कीर्त्तनं कृत्वा यान्ति विष्णोः परं पदम् ॥ इति ।

हरिवंशे ।

शयनादुत्थितो यस्तु कीर्तयेन्मधुसूदनम् ।
कीर्त्तनात्तस्य पापानि विलयं यान्त्यशेषतः ॥ इति ।

प्रभासपुराणे ।

नाम्नां मुख्यतरं नाम कृष्णाख्यं यत्परन्तप ! ।
प्रायश्चित्तमशेषाणां पापानां मोचकं परम् ॥ इति ।

इतिहासोत्तमे,

स्वप्नेऽपि नामस्मृतिरादिपुंसः क्षयं करोत्याहितपापराशेः । इति ।

भविष्योत्तरे ।

कोटिपापानि लभ्येव स्वल्पानि च बहूनि च ।
न तानि भूयो बाधन्ते हरिनामानुकीर्त्तनात् ॥ इति ।

ननु मन्त्रार्थवादानां प्रमाणान्तरविरोधे सति न स्वार्थे प्रामाण्यम् । "धूम एवाग्नेर्दिवा ददृशे नार्चिः" "यजमानः प्रस्तर" इत्यादौ तथा दर्शनात् । पौराणानां चैषामर्थवादानामस्ति स्मार्तप्रायश्चित्तविरोधः, मन्वादिस्मार्तविधयो हि स्वार्थतात्पर्योपेता गुरुतरप्रयाससाध्यानि द्वादशवार्षिकादीनि तत्तद्दोषनिर्हरणाय विदधति, अल्पप्रयाससाध्यस्य च संकीर्त्तनस्य पापक्षयहेतुत्वे तत्रैव सर्वेषां प्रवृत्तौ स्मार्तविधीनां प्रवर्त्तकत्वं व्याहन्येत प्रवर्त्यपुरुषाभावात् । अतश्चान्यानर्थक्यन्यायेनास्ति तद्विरोधः, विरोधे च नैषां पौराणार्थवादानां स्वार्थे प्रामाण्यमिति कथञ्चिद्भजनीयदेवतास्तावकत्वमाश्रयणीयम्, सर्वेषां पुराणानां भजनीयदेवताप्रतिपादने तात्पर्यात् । न च प्रवृत्त्या ज्ञानोन्नयने तज्जनकत्वेन पदानां कार्यान्वित एव स्वार्थे शक्तिग्रहार्थे[न]सिद्धार्थपरत्वं पुराणानामिति वाच्यम् । पुत्रस्ते जात इति वाक्यश्रवणानन्तरं दृश्यमानमुखविकासादिना हर्षतद्धेतुज्ञानयोरुन्नयने तज्जनकत्वेन सिद्धेऽप्यर्थे शक्तिग्रहसम्भवात् । यद्यपि च "धर्मः प्रोज्झितकैतवोऽत्र परमो" "धर्मे चार्थे च कामे च" इत्यादिधर्मप्रतिपादकत्वोक्तिस्तत्र तत्र धर्मप्रतिपादनस्य देवताप्रतिपादनवदुपलम्भाच्च वेदस्येव भेदेन पुराणानामपि देवतायां धर्मे चास्ति तात्पर्यम् । तथाप्युदाहृतवाक्यानां स्मार्तविधिविरोधेन स्वार्थप्रामाण्यासम्भवात् स्तावकत्वमेवाश्रयणीयमिति न संकीर्त्तनस्य पापक्षयहेतुता । प्रमाणाभावात् । अथ विधिसिद्धमेव संकीर्तनस्य पापक्षयहेतुत्वमित्युच्येत । तन्न । "पापक्षयकामः संकीर्त्तयेत्" इति विस्पष्टविध्यदर्शनात् । स्मार्तविधिविरोधे कल्पनाया अयोगाच्च । यद्यपि च कश्चिद्विधिरुदाह्रियेत । तथापि तद्विहितस्य संकीर्त्तनस्य द्वादशाब्दादेश्च विकल्पव्यवस्थासमुच्चयान्यतराश्रयणेन पापक्षयहेतुत्वं वाच्यम्, उभयोरपि श्रुतिमूलत्वेन प्रामाण्यावश्यंभावात् । तत्र न तावद्विकल्पः । पापक्षये नित्यवच्छ्रवणबाधेन शब्दस्वारस्यभङ्गप्रसङ्गात् । नापि देशविशेषेणाधिकारिविशेषेण वा व्यवस्था, सामान्यतः प्रवृत्तशब्दस्य विशेषलक्षणायां स्वारस्यभङ्गादेव । अतः समुच्चयो युक्तः । न च तत्रापि नैरपेक्ष्यं प्रत्येकवाक्यावगतं भज्येतेति शङ्क्यम् । साधनान्तराभावापरपर्यायस्य नैरपेक्ष्यस्याशब्दार्थत्वात् । संकीर्त्तनादिसाधनतामात्रस्य तदर्थत्वात् । उभयप्रतिपादने वाक्यभेदात् । स च समुच्चयः सङ्कीर्तनस्य स्मार्तप्रायश्चित्तं प्रत्यङ्गत्वेन न तु दर्शादिवत्समप्राधान्येन, नापि प्रायश्चित्तस्य तदङ्गत्वेन । "मन्त्रतस्तन्त्रत" इत्याद्युक्तपुराणवाक्येभ्य एव संकीर्त्तनस्य सकलकर्माङ्गत्वावगमेन द्वादशाब्दादि प्रत्यपि, अङ्गत्वावश्यंभा-

वात् । श्रूयते च विशेषतोऽपि तदङ्गत्वम् ।

श्रीभागवते,

प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ।
न निष्पुनन्ति राजेन्द्र ! सुराकुम्भमिवापगाः ॥ इति ।

अत्र च नारायणपराङ्मुखं न निष्पुनन्तीत्युक्त्या पुनतां तेषां नारायणपरायणत्वमङ्गमुक्तं भवति । तत्परायणत्वञ्च तद्भजनमेवेति भजनविशेषस्य संकीर्त्तनस्य सिद्धं स्मार्तप्रायश्चित्ताङ्गत्वम् । एवञ्च संकीर्तनं प्रति पापक्षयस्य फलत्वनिर्देशोऽप्युपपद्यते । अङ्गानां प्रधानफलेनैव फलवत्त्वात् । नापि गुरुतरप्रयत्नसाध्यस्मार्तप्रायश्चित्तानर्थक्यम् । संकीर्त्तनमात्रेण फलाजननात् । तत्सिद्धं संकीर्त्तनस्य न स्वातन्त्र्येण पापक्षयहेतुत्वमिति ।

अत्रोच्यते ।

उक्तं तावत् "श्रावयेच्चतुरो वर्णान्" "पुराणं न्यायमीमांसाघुपपुराणाद्यैर्वेदार्थमुपबृंहयेत्" इत्यादिवाक्येभ्यः पुराणप्रामाण्यम् । शिष्टैरत्यन्तमाहतत्वाच्च तदादरणीयम् , तत्कर्त्तारश्च व्यासादयोऽत्यन्तं विश्वसनीयाः, अतः स्मृतिवदेव प्रत्यक्षश्रुतिमूलत्वमेषामाश्रयणीयम् , तत्प्रामाण्यम् । न चायमस्ति नियमः, एवंकामशब्दयुक्तालिङ्गादुपनादेव वाक्यात्साध्यसाधनसम्बन्धावगतिरिति । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते, एतावता हैनसा मुक्तो भवति नैशमेनो व्यपोहति" इत्यादौ तदभावेऽपि तदवगतेः । "पूषा प्रपिष्टभाग" इत्यत्राज्ञातविरहेऽपि पेषणस्य यागीयद्रव्यसंस्कारसाधनत्वस्वीकाराच्च । अथ तत्र विधिकल्पनया तदवगति रितिचेत् , प्रकृतेऽपि तथा किं न स्यात्, विधिकल्पकस्यापूर्वार्थत्वस्याविशेषात् , न हि संकीर्त्तनस्य पापक्षयहेतुत्वमवगतपूर्वम् । अथ यन्नामसंकीर्त्तनात्सकलपापक्षयस्तस्य सानुरागं नैरन्तर्येण भजनादिकं न स्यादित्येवं भजनीयस्तुत्या भजनविधिशेषत्वसम्भवे किं विधिकल्पनयेति चेत् । भजनविध्यैकवाक्यत्वाभावेन स्तावकत्वायोगात् । उपक्रमोपसंहाराभ्यां, अजामिलोपाख्यानाद्यैः संकीर्त्तनमात्रपरत्वावगमाच्च । उक्तानेकपुराणवाक्येषु संकीर्त्तनस्य पापक्षयहेतुत्वं गतिसामान्याच्च । संकीर्त्तनमेव स्तूयत इति चेत् । न । अविधीयमानस्य स्तुत्ययोगात् । स्तुत्युन्नीतस्तस्य विधिरिति चेत् । एवं तर्हि विधीयमानस्य फलाकाङ्क्षायां रात्रिसत्रन्यायेन अर्थवादिकफलकल्पनवत्पापक्षयफलत्वकल्पनात्सिद्धं संकीर्त्तनस्य तद्धेतुत्वं, स्मार्तविधिविरोधे फलकल्पना नोत्तिष्ठतीति चेत्, न । तथा सति फला-

भावेऽन्यथावाक्यवैयर्थ्यापत्तेः । न च तदुक्तम् । अनन्तरमेव प्रामाण्यस्योक्तत्वात् । अनुपदश्च विरोधस्य परिहरिष्यमाणत्वात् । दृश्यन्ते च संकीर्त्तने प्रत्यक्षा विधयः । पाद्मे तावद् यत्रतत्र स्थितो वेत्यादिरुक्तः । श्रीभागवतादौ च श्रोतव्यः कीर्तितव्यश्चेत्यादिः ।

वायुपुराणेऽपि—

यावज्जीवं प्रणवमथवावर्त्तयेद्वेत्रियं वा
याजुर्वेद्यं वसतिमथवा वारणस्यां विदध्यात् ।
हित्वा लज्जां कलिमलकुलच्छेदनानीरयेद्वा
विष्णोर्नामान्यनिशममृतप्राप्तिरेवं चतुर्द्धा ॥ इति ।

नन्वजामिलोपाख्यानादौ विहितस्यापि संकीर्त्तनस्य "मन्त्रतस्तन्त्रतश्छिद्रम्" इत्याद्युक्तपुराणवाक्यैरन्यशेषत्वावगमाद् वायुपुराणस्थवाक्ये न चामृतप्राप्तिहेतुत्वप्रतीतेर्न स्वातन्त्र्येण पापक्षयफलत्वकल्पनोचिता, यथाऽनारभ्याधीतस्यापि प्रवर्ग्यस्य "पुरस्तादुपसदां प्रवर्ग्येण प्रचरन्ति" इति प्राकरणिकवाक्येन ज्योतिष्टोमाङ्गत्वावसायान्न फलं कल्प्यते तद्वदिति चेन्न ।

सर्वेषामप्यघवतामिदमेव तु निष्कृतम् ।
नाम व्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥
[श्रीभा० स्कन्ध० ६ अ० २ श्लो० १०] इति ।

एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ।
यदा नारायण इति जगाद चतुरक्षरम् ॥
[श्रीभाग० स्कन्ध० ६ अ० २ श्लो० ८]

नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥
[श्रीभा० स्कन्ध ६ अ० ३ श्लो० २३]

इति चैवकारश्रुत्यैव पापक्षयं प्रति स्वातन्त्र्येण हेतुत्वावगमात् । एवकारार्थस्य चाप्राप्तत्वेनानुवादायोगात् । वर्त्तमानापदेशस्य चाङ्गत्वबोधकवाक्येष्वप्यविशेषात् । तथा—

विष्णुपुराणेऽपि ।

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

इति परशब्दश्रुत्या स्वातन्त्र्यमवगम्यते । न ह्यङ्गस्य प्रधानात्परत्वं युज्यते । अनुस्मरणशब्देन च संकीर्त्तनमुच्यते ।

क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् ।
क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥

इति वाक्यशेषे संकीर्तनस्तवनात्। न ह्यन्यद्विधीयतेऽन्यत्स्तूयत इत्युक्तं साम्प्रदायिकैः। "प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्" इत्यत्रैकशब्दोऽपि नैरपेक्ष्यं सूचयति। अङ्गाङ्गिनोः समुच्चये तन्न युज्येत। तथा—

विष्णुधर्मे।

अथ पातकभीतस्त्वं सर्वभावेन भारत।
विमुक्तान्यसमारम्भो नारायणपरो भव॥

इति वाक्यमपि प्राधान्ये सङ्गच्छते। अङ्गत्वे प्रधानारम्भत्यागायोगात्। तथा हि अत्र कैवल्यशब्देन न साधनान्तराभाव उच्यते, तस्य भक्तेश्च विधाने वाक्यभेदात्। तद्विशिष्टविधाने साधनान्तरविशिष्टायास्तस्या अघक्षयहेतुत्वं न स्यात्। किन्तु कार्य्याऽव्यवहितपूर्वक्षणमात्रवृत्तित्वापरपर्यायं पुष्कलत्वमभिधीयते। न च तदङ्गत्वे सम्भवति। अङ्गस्य कार्य्योपयोगिप्रधानोपकारजनकोपकारजनकस्य कार्याव्यवहितपूर्वक्षणैकवृत्तित्वायोगात्। तच्च केवलशब्दवाच्यपुष्कलत्वं न तावद्भक्त्युद्देशेन विधीयते। अघक्षयं प्रति भक्तेस्तां च प्रति कैवल्यस्य विधौ वाक्यभेदात्। अघक्षयं प्रति गुणभूतायाः कैवल्यं प्रति प्राधान्ये वाजपेयाधिकरणोक्तवैरूप्यप्रसङ्गाच्च। [पू० मी० अ० १ पा० ४ अधि० ६] नाप्यघक्षयोद्देशेन तस्य भक्तेश्च विधानम्, वाक्यभेदात्। नापि तद्विशिष्टा भक्तिर्विधीयते, सोमविशिष्टयागविधान इव मत्वर्थलक्षणापत्तेः। नाप्यारुण्यैकहायनीविशिष्टक्रयवत्(१)उभयविशिष्टाघक्षयविधानम्। तस्य फलत्वेनाविधेयत्वात्। किन्तु पुष्कलत्वभक्तिविशिष्टमेकं कारकं विधीयतेऽघक्षयोद्देशेन। "अग्नये शुचये" इतिवत्। अतश्चाघक्षये भक्तिः पुष्कलं कारणमिति फलितो वाक्यार्थः, अग्निः शुचिर्देवतेतिवत्। ततश्च केवलाया भक्तेः पापक्षयोद्देशेन विधानात् सिद्धा स्वातन्त्र्येण तद्धेतुता सङ्कीर्तनस्य। एवञ्चोदाहृतानेकपुराणवाक्यानामपि मुख्यया वृत्त्या सङ्कीर्तनस्य पापक्षयसाधनत्वप्रतिपादकत्वे सम्भवति न स्तावकत्वमाश्रयणीयम्, श्रौते सम्भवति लक्षणाया अन्याय्यत्वात्। यत्तु "मन्त्रतस्तन्त्रत" इत्यादिवाक्यैः सङ्कीर्तनस्य कर्म्माङ्गत्वमुक्तम्, तन्नानिष्टम्। "दध्ना जुहोति" "दध्नेन्द्रियकामस्य जुहुयात्" इतिवत्संयोगपृथक्त्वन्यायसम्भवात्। "प्रायश्चित्तानि चीर्णानि" इति तु वाक्यं नाङ्गत्वमवगमयति। किन्तु नारायण-

(१) पू० मी० अ० ३ पा० १ अधि० ६ सू० १२।

पराङ्मुखं पुनन्ति सन्ति नितरां न पुनन्ति सवासनं पापक्षयं न कुर्वन्तीति प्रतिपादयति । अन्यथा निरित्युपसर्गानर्थक्यात् । अत एव "कर्म्मणा कर्म्मनिर्हारो न ह्यात्यन्तिक इष्यत" इत्यत्रात्यन्तिकग्रहणं कृतम् । अत एव कृतप्रायश्चित्तानामपि समयान्तरे पुनः पापे प्रवृत्तिर्दृश्यते । तत्संस्कारस्य विद्यमानत्वात् । न ह्यस्माकमनुभवक्रियाभ्यामेव संस्कारो जायत इति मन्त्रम् । अनुभवत्वक्रियात्वयोरननुगतत्वेन संस्कारकारणतानवच्छेदकत्वात् संस्कारमाधाय नश्यतीत्यस्ति पापसंस्कारः । श्रूयते च—

विष्णुपुराणे ।

हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मौ नृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥ इति ।

तद्भाविताः=तद्वासनावासिता इत्युक्तं साम्प्रदायिकैः । स च संस्कारो ब्रह्मविद्यया निवर्त्तते विशिष्टभक्त्या वा, न तु प्रायश्चित्तादिनेत्याशयेनोक्तं न निष्पुनन्तीति । न त्विदं वाक्यं भक्तेरकृत्वं प्रतिपादयतीति सिद्धं स्वातन्त्र्येण सङ्कीर्त्तनस्य दुरितनिवृत्तिहेतुत्वम् ।

नन्वेवं सति स्मार्तप्रायश्चित्तविधीनामानर्थक्यं स्यादिति चेत् ।

अत्र केचिदाहुः ।

स्मार्तप्रायश्चित्तानां बह्वायाससाध्यत्वात् यानि गुरुतरब्रह्महत्यादिदुरितानि तन्निवर्तकत्वम् । कामतः प्रकाशं कृततन्निवर्त्तकत्वं वाऽऽश्रयणीयम् । भगवत्सङ्कीर्तनस्य तु अल्पायाससाध्यत्वेनाकामतो रहस्यानुष्ठितप्रकीर्णकाद्यल्पदुरितनिवर्त्तकत्वमिति न कस्याप्यानर्थक्यमिति ।

तदयुक्तमित्याचार्य्याः । "स्तेनः सुरापो मित्रध्रुक्" इत्याद्यनेकोदाहृतवाक्यैः स्पष्टं महापातकादिनिवर्तकत्वाभिधानात् ।

कोटिपापानि सन्त्येव स्वल्पानि च बहूनि च ।
न तानि भूयो बाधन्ते हरिनामानुकीर्त्तनात् ॥

इति भविष्योत्तरवाक्येऽविशेषेण सकलपापनाशकत्वाभिधानाच्च । न चैषामबुद्धिपूर्वानुष्ठितविषयत्वम् ।

हनन्ब्राह्मणमत्यन्तं कामतो वा सुरां पिबन् ।

इतिब्रह्मवैवर्त्तवचने कामतः कृतस्यापि निवृत्त्यभिधानात् । नापि रहस्यविषयत्वम् । "प्रसभं वा सुरां पिबन्" इति वह्निपुराणवचने प्रकाशमनुष्ठितस्यापि नाशोक्तेः, "इतस्ततोऽप्युपाविन्ये(१)न्यायतोऽन्यायतो·

(१) यतस्ततश्चोपविन्ये इति श्रीभागवते पाठः ।

यन"मित्यादिना प्रकारां बुद्धिपूर्वं महापातकमनुतिष्ठतोऽप्यजामिलस्य नामसङ्कीर्त्तनेन तन्निवृत्तिप्रतिपादनाच्च । विष्णुधर्मे च तादृशस्यैव क्षत्रबन्धोः सङ्कीर्त्तनमात्रेण परमपूतत्वाभिधानात् ।

विष्णुपुराणेऽपि—

पापे गुरूणि गुरुणि स्वल्पान्यल्पे च तद्विदः ।
प्रायश्चित्तानि मैत्रेय जगुः स्वायम्भुवादयः ॥
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

इत्यविशेषेण सकलाघनिवर्तकत्वोक्तेः । अत्र चानुस्मरणशब्दस्य सङ्कीर्त्तनपरत्वमुक्तमधस्तात् । स्मरणशब्दप्रयोगस्तु मानसमपि भगवन्नाम्नोऽनुसन्धानं समस्तमघं विलापयतीत्याशयेन कृतः । एतेनैतदप्यपास्तम् । कृष्णशब्दो योगवृत्त्या परब्रह्मपरः, "कृषिर्भूवाचक" इत्यादिवचनात् , अनुस्मरणशब्देन च पुनः पुनश्चिन्तनरूपं निदिध्यासनमुच्यते, तस्य च तत्वज्ञानप्रतिबन्धकदुरितनिवृत्तिजनकत्वाभिधानम् , परत्वं च सकलाघनिवर्त्तकब्रह्मविद्याफलत्वादिति । "क जपो वासुदेवे"ति वाक्यशेषविरोधात् । कृष्णशब्दस्य नन्दनन्दनमूर्तिरूढत्वेन तस्या एव प्रथमप्रतीतेश्च । अतश्चैतद्वाक्यं संकीर्त्तनस्याखिलपापविध्वंसकत्वं प्रतिपादयतीति न युक्तेयं व्यवस्था ।

अन्ये तु महाभागा एवमाहुः । श्रद्धाभक्तिज्ञानसम्पन्नस्य सङ्कीर्त्तनेऽधिकारः । तद्रहितस्य तु स्मार्तप्रायश्चित्ते । तथा हि । श्रद्धा नाम सङ्कीर्त्तनस्य पापक्षयसाधनतां प्रतिपादयत्सु पौराणवचनेषु दृढतरो विश्वास इदमित्थमेवेति , एवंविधश्च निश्चयः शास्त्रीयेऽर्थे सर्वत्रेष्यते । तथाचोक्तं भगवता—

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ इति ।

[गी० अ० ४ श्लो० ४०]

तथा—

ब्रह्मसंहितायाम् ।

यन्नामकीर्त्तनफलं विविधं निशम्य
न श्रद्दधाति मनुते यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरं विविधार्तिनिपीडिताङ्गम् ॥

इति वाक्यमश्रद्धस्य दुःखप्राप्तिं प्रतिपादयच्छ्रद्धाया उपयोगितामाह । तथा कात्यायनसंहितायां शिवधर्मोत्तरे च यथाक्रमम् ।

अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः॥
स पापिष्ठो मनुष्याणां निरये पतति स्फुटम्।
विधिवाक्यमिदं सर्वं नार्थवादः शिवात्मकम्।
लोकानुग्रहकर्ता यः स मृषार्थं कथं वदेत्॥

इति वाक्यपर्य्यालोचनयापि श्रद्धावतोऽधिकारो गम्यते। एवं "यन्नामकीर्त्तनं भक्त्या" इति विष्णुपुराणवचनं भक्तिमतः कीर्त्तनात्पापक्षयं ब्रवीति। अत्र भक्तिशब्देन भगवदनुराग उच्यते न साधनभक्तिः, तस्याः सङ्कीर्त्तनशब्देनोक्तेः। "भक्त्या सञ्जातया भक्त्या" इत्यत्रानुरागेऽपि भक्तिशब्दप्रयोगाच्च। तथा—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषुतेष्वच्युताभक्तिरच्युतास्तु सदा त्वयि॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु॥

इतिपूर्वश्लोकप्रार्थिताया भक्तेरुत्तरश्लोके प्रीतिशब्देन व्यवहाराच्च। तत्र त्वयि भक्तिरविच्युतास्त्वित्युक्ते कीदृशी सेत्याकाङ्क्षायां, अविवेकिनां विषयेषु यादृशी प्रीतिस्तादृशी त्वद्विषया प्रीतिरस्त्वपैतु मेतिनिर्देशेन प्रीतिः सेत्युक्तं भवति। न च हेमाप! लक्ष्मीपते! या विषयेषु प्रीतिः सा मे हृदयादपसर्पत्विति निर्देशेन विरक्तिप्रार्थनमेवोत्तरश्लोकार्थः किन्न स्यादिति वाच्यम्। उभयप्रार्थने हि भगवताप्युभयविषयोऽनुग्रहः कृतः स्यात्। "भक्तिर्मयि तवास्त्येव भूयोऽप्येवं भविष्यति इति तु भक्तिमात्रानुग्रहो दृश्यते। अतः प्रीतिशब्देन भक्तिरेवोत्तरश्लोके व्यवहृतेति सिद्धं विष्णुपुराणवचनात् प्रेमरूपाया भक्तेरधिकारिविशेषणत्वम्। तथा "केचित्केवलया भक्त्या वासुदेवपरायणा" इत्यत्रापि वासुदेवपरायणानामेव भक्तिरघक्षयसाधनमित्युक्तम्। एवं "यतस्तद्विषया मतिः" "तदुत्तमश्लोकगुणोपलम्भनम्" इतिवचनाभ्यां भगवद्विषयकज्ञानमप्यधिकारिविशेषणमवसीयते, सङ्कीर्त्तनमात्रस्य तद्विषयत्वादेरानर्थक्यापातात्।

तथा—

यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः॥
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते॥

इत्यपि वाक्यं चिन्तनमात्रस्य मुक्तिहेतुत्वोपन्यासेन संकीर्त्तनस्याघनाशकत्वे चित्रताबुद्धिं परिहरच्चिन्तनसापेक्षस्य तस्याघनाशकत्वं दर्शयति। कीर्त्तनमात्रस्य तु नाशकत्वे सत्यपि चिन्तनस्य मुक्तिहेतुत्वे चित्रताबुद्धिः स्यादेव। उभयोः परस्परनिरपेक्षयोर्भगवद्भक्तित्वाविशेषात्। द्वादशाब्दादिनाद्यस्येषत्प्रयत्नसाध्यसङ्कीर्त्तननाश्यत्वासम्भवाच्च। महाफलज्ञानसहकृतत्वे तु भवति चित्रबुद्धिपरिहार इति सिद्धं ज्ञानस्याधिकारिविशेषणत्वम्। तस्मादुक्तव्यवस्थया न स्मार्तप्रायश्चित्तानर्थक्यमिति।

अपरे पुनराचार्या भगवदनुग्रहावगतभगवन्नाममाहात्म्या एवमाहुः। द्विविधमधिकारिविशेषणम्। अर्थसिद्धं, श्रुत्येकसिद्धञ्च। तत्राद्यं कर्मस्वरूपसिद्धावुपयुज्यते। यथा सामर्थ्यविद्वत्त्वादि। न ह्यसमर्थेनाविदुषा शक्यते कर्म्म कर्तुम्। द्वितीयं तु फलसिद्धौ यथा राजत्वादि, न हि तद्विना कर्म्मस्वरूपं न सिध्यति, अन्येन त्वनुष्ठितात्फलं न भवति। इदमेवमितिनिश्चयस्तु न श्रुत्येकसिद्धमधिकारिविशेषणम्। "राजा राजसूयेन यजेत" इतिवत्तादृशनिश्चयवान् कुर्य्यादिति श्रुत्यभावात्, बहुवित्तव्ययाऽऽयाससाध्ये कर्म्मण्यन्वयव्यतिरेकाभ्यां प्रवृत्तिहेतुत्वेन तदुपयोगावधारणाच्च। अत आर्थिकमस्य तत्राधिकारनिमित्तत्वम्। संकीर्त्तने त्वीषत्प्रयत्नसाध्यत्वात् तादृशनिश्चयमन्तरेणापि प्रवृत्तिसिद्धेर्न तस्याधिकारनिमित्तत्वम्। यत्तु "अज्ञश्चाश्रद्दधानश्च" इतिवचनम्, तदज्ञस्येवाश्रद्दधानस्यापि प्रवृत्त्यभावमात्रपरम्। "यन्नामकीर्त्तने" त्यादिवाक्यत्रयं त्वर्थवादबुद्धिनिषेधपरं न श्रद्धावतोऽधिकारप्रतिपादनपरम्। यद्यपि च—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥

[गी० अ० १७ श्लो० २८]

इति वाक्यं सर्वकर्म्मसु श्रद्धायाः फलोपयोगितामाह। तथा चोक्तं श्रीधरस्वामिभिः यतस्तत्प्रेत्य लोकान्तरे न फलति विगुणत्वादिति।

श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥

इति च विस्पष्टमेव श्रद्धायाः पुरुषविशेषणत्वम्। तथापि संकीर्त्तनेन पापक्षये जनयितव्ये न श्रद्धानियमः। यथोक्तम्—

प्रभासपुराणे,

मधुरमधुरमेतन्मङ्गलं मङ्गलानां
सकलनिगमवल्लीसत्फलं चित्स्वरूपम्।

सकृदपि परिगीतं श्रद्धया हेलया वा
भृगुवर ! नरमात्रं तारयेत्कृष्णनाम ॥ इति ।

अत्र तारयेदिति पापक्षयनिर्देशो न मुक्तेः, तस्या आवृत्तिसापेक्षत्वेन सकृदिति निर्देशायोगाच्च ।

वाराहेऽपि,

गोविन्देत्युक्तिमात्रेण हेलया कलिवर्तिनाम् ।

पापौघोविलयं यातीति—

श्रीभागवते ।

पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ।
हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ इति ।

[श्रीभा० स्कन्ध ६ अ० २ श्लो० १५]

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ इति च ।

[श्रीभा० स्कन्ध ६ अ० २ श्लो० १४]

नचैतेषां स्वार्थापरत्वम् । अजामिलोपाख्यानादेरुपक्रमोपसंहाराभ्यामेतदर्थपरत्वात्, विध्यन्तराशेषत्वाच्च, गतिसामान्याच्च । एतेन भक्तिज्ञानयोर्नियमोऽपि प्रत्युक्तः । भगवत्यनुरक्तस्य तद्विषयज्ञानवतश्च तस्मिन्हेलनायोगात् ।

गोविन्देति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितम् ।
दहते सर्वपापानि युगान्ताग्निरिवोत्थितः ॥

इति वाराहवचनाच्च ।

अज्ञानादथ वा ज्ञानादुत्तमश्लोकनाम यत् ।
सङ्कीर्त्तितं मघं पुंसो दहेदेधो यथानलः ॥

[श्रीभा० स्कन्ध ६ अ० २ श्लो० १८]

यथाऽगदं वीर्य्यतममुपभुक्तं यदृच्छया ।
अजानतोऽप्यात्मगुणं कुर्य्यान्मन्त्रोऽप्युदाहृतः ॥

[श्रीभा० स्कन्ध० ६ अ० २ श्लो० १९]

इति भागवतवचनाच्च । अत्र मन्त्रो नामात्मकः, तथा स्वकार्यं कुर्य्यादेव, न हि वस्तुशक्तिः श्रद्धादिकमपेक्षत इत्यर्थः, इत्युक्तं श्रीधरस्वामिभिः । अनुरागरूपायाश्च फलभक्तेः साधनभक्त्यनन्तरं पापक्षये सति जायमानत्वनिर्देशेनाधिकारिविशेषणत्वायोगः । यत्तु "यन्नाम कीर्त्तिते भक्त्ये"ति वाक्यमुपन्यस्तम्, तदप्यनुत्तममिति विशेषणादनुरागयुक्तसङ्कीर्त्तनस्य सर्वात्मपापक्षयहेतुताप्रतिपादनपरम्, पापक्षयमात्रे तु न

तदपेक्षा उक्तानेकवाक्येभ्यः। "केचित्केवलया भक्त्या" इत्यपि वाक्यं सवासनपापक्षयहेतुपरम्।

कश्चिन्निवर्त्ततेऽभद्रात्कश्चिच्चरति तत्पुनः।
प्रायश्चित्तमतोऽपार्थं मन्ये कुञ्जरशौचवत्॥ इति।

[श्रीभा० स्क० ६ अ० १ श्लो १०]

तस्यैव पुरा पृष्टत्वात्। अतश्च वासुदेवपरायणानामघक्षयमात्रहेतुत्वेनात्र भक्तिर्विधीयते। "आकाशस्तल्लिङ्गात्" [उ०मी० अ० १ पा० १ सू० २२] इत्यनेन न्यायेन प्रश्नप्रतिवचनयोर्वैरूप्यस्याभ्याय्यत्वात्। पूर्वोक्तरीत्या पौष्कल्याभिधायकमुख्यकेवलशब्दविरोधाच्च, न हि वासुदेवपरायणत्वसापेक्षत्वे पौष्कल्यं युज्यते। नापि पापक्षयमात्रभक्तेः पुष्कलकारणतामात्रप्रतिपादकमेतत्, प्रश्नवैरूप्यादेव। नापि कार्त्स्न्यशब्दश्रवणात्सवासनपापक्षयोक्तेर्भक्तेः पुष्कलकारणताप्रतिपादनपरत्वम्।

गोविन्देति वदन् जन्तुः प्रत्यहं नियतेन्द्रियः।
सर्वपापविनिर्मुक्त—

इति पूर्वोदाहृतबृहन्नारसिंहवाक्ये उपसर्गद्वयप्रतिपादितसवासनाघक्षयमुद्दिश्याऽऽवृत्तिनियतेन्द्रियत्वविधानेन भक्तेस्तत्र पौष्कल्यायोगात्। न च—

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥

इत्युदाहृतवाराहवचनान्मोक्षाख्यसवासनपापक्षयेऽपि नावृत्त्यपेक्षेति शङ्क्यम्। मोक्षप्राप्तिहेतुं भक्तिमार्गं गम्यतेऽनेनेति व्युत्पत्त्या गमनशब्देन निर्दिश्य तं प्रत्याधिकारसम्पादकत्वेन परिकरबन्धनशब्दसूचितः पापक्षयस्तेन पुंसा कृत इत्येवमर्थत्वात्तस्य। यच्च "एकेनैव भवेन्मुक्तिर्द्वाभ्यां शम्भुरृणी भवेत्" इति शैवे वचनं तत्रापि त्रिर्महादेवशब्दोक्तिरभ्यासोपलक्षणार्था। उच्चार्यमाणानेकनामव्यक्तीनां च सत्यामपि प्रत्येकमज्ञाननिवर्त्तकज्ञानजननशक्तावन्त्ययैव प्रतिबन्धकदुरिताभावाज्ज्ञानमुत्पद्यते। इतराभ्यस्तु महत्प्रयोजनसमर्थाभ्योऽपि तदलाभान्महत्परसेवाकर्तुरल्पफललाभे राजेव शम्भुरृणी भवेदित्यर्थः। नापि वासुदेवपरायणत्वमुद्दिश्य भक्तेः पुष्कलकारणत्वमुच्यते। "अघं धुन्वन्ति" इत्यादेरानर्थक्यात् प्रश्नवैरूप्यात्, वासुदेवपरायणपदोदितायाः फलभक्तेः "इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या" इत्यावृत्तिसाध्यत्वावगमाच्च। नापि फलभक्तेः सवासनपापक्षयहेतुता प्रतिपद्यते। "केवलया" इत्यादेरानर्थक्यात्। तस्माद्यथा सवासनया पापक्षयहेतुर्विमर्शनाख्यः साङ्गः

पूर्वश्लोकेषु दृष्टान्तत्वेनोक्तः एवमिहापि तस्त्रेत्यन्तरं साङ्गं दार्ष्टान्तिकत्वेन तात्पर्य्यवृत्त्या प्रतिपाद्यते । तत्र कार्त्स्न्यशब्देनाघक्षयस्य सवासनत्वनिर्देशः । वासुदेवपरायणशब्दस्तु वासुदेव एव परमयनमाश्रयश्चित्तवृत्तेर्येषामित्येवं तदेकनिष्ठत्वं वदन् तदनुरागरूपां फलभक्तिमाह, तदनुरागं विना तदेकनिष्ठत्वायोगात् । अनुरागोत्पत्तिश्च नास्ति पापक्षये भवतीति तत्साधनं समर्पयितुं केवलया भक्त्येत्युक्तम् । समर्पणप्रकारस्तु पूर्वमुक्तः । एवञ्च भक्त्यैकसाध्ये पापक्षये सत्युत्पन्नो भगवदनुरागः सवासनं पापं धुनोतीत्येवं शिष्टानुरागस्य सवासनपापक्षयसाधनत्वपरमेतद्वाक्यं नत्वनुरागस्य संकीर्त्तनेन पापक्षये जनयितव्येऽङ्गत्वप्रतिपादनपरमिति सिद्धम् ।

ये अपि "यतस्तद्विषया मतिः" इति। "तदुत्तमश्लोकगुणोपलम्भनम्" इति वचने ज्ञानवतोऽधिकारे प्रमाणत्वेनोपन्यस्ते । तत्रापि ज्ञानवतां "सुनिष्कृतं ज्ञानवतोदाहृतै"रिति न स्पष्टं श्रूयते । कल्पना च "सर्वेषामप्यघवता"मित्युपक्रमविरुद्धा । न चानर्थक्यमनयोः । उक्तार्थोपपत्तिप्रदर्शनार्थत्वात् । यत इत्यस्य तत्रैव स्वारस्यात् । यतो नामोच्चारणादुच्चारयितृविषया भगवतो मतिर्भवति मदीयोऽयं मया सर्वतो रक्षणीय इति । उच्चारयितुर्वा भगवद्विषया तद्गुणविषया वा मतिर्भवति । तत इदमुत्कृष्टं निष्कृतमित्युपपत्तिः । किञ्च संकीर्त्तनस्य प्राप्तस्य तेनाघनिवृत्तिसम्बन्धे ज्ञानगुणसम्बन्धे च वाक्यं भिद्येत । "दध्नेन्द्रियकामस्य जुहुयात्" इत्यत्र होमस्येव दधीन्द्रियसम्बन्धे । "जगाद चतुरक्षरम्" इत्यक्षरग्रहणं चाक्षरोच्चारणमेव पापं नाशयति न तु स्वजन्यमतिसापेक्षमिति दर्शयति । अन्यथा "यदा नारायणेत्येतज्जगाद" इत्येवावक्ष्यत् । "अज्ञानादथवा ज्ञानात्" इति चास्मिन्प्रकरणे ज्ञानानपेक्षत्वस्य विस्पष्टमुक्तत्वान्न ज्ञानवत एवाधिकारकल्पना युक्ता ।

एतेन "यस्मिन् न्यस्तमति"रित्यत्राप्येषा निरस्ता । प्रत्यक्षवचनविरोधे तदयोगात् । प्रकारान्तरेण चित्रताबुद्धिपरिहारसम्भवाच्च । तथा हि । अत्र नरकशब्देन न दुरितफलनिर्देशः । वक्ष्यमाणाघनिवृत्त्यैव तन्निवृत्तेः सिद्धत्वेन पृथगवचनीयत्वात् । किन्तु नराणां कामित्येवं व्युत्पत्त्या "युवा स्यात् साधुयुवा" इति श्रुतिप्रतिपादितो मानुषः सार्वभौमानन्द उच्यते । तं यस्मिन् न्यस्तमतिर्निवेशितबुद्धिर्न याति न प्राप्नोति । तस्य "शतायुर्वै पुरुष" इति श्रुतेः प्रत्यक्षेण वा विनश्वरत्वस्य तुच्छत्वेन महाफलभगवच्चिन्तनफलत्वायोगात् । तर्हि "ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द" इति श्रुतिसिद्धो हैरण्यगर्भ-

नन्दः फलं तत्राह "यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः"
इति । तस्याप्यल्पत्वमेवोपासनाजन्यस्यानित्यत्वेन हरिचिन्तनमहन्महिमा
ननुरूपत्वात् । अनित्यत्वञ्च "तद्यथेह कर्म्मचितो लोकः क्षीयत एव
मेवामुत्र पुण्यचितो लोकः क्षीयते" इति वचनात् । किं तर्हि फलमत
आह । "मुक्तिश्चेतसि यः स्थितोऽमलधियां पुंसां स्वयात्यव्ययः" अत·
श्चामलत्वनिर्देशेन पापक्षयस्य मुक्तिं प्रति शेषत्वान्न महाफलत्वमिति सू·
चितम् । पुंसां चेतसि स्थितोऽव्यय इति प्रसिद्धदातृवैलक्षण्यं ध्वनितम्,
लोके दातारः स्वमनसि स्थितेभ्यो धनं प्रयच्छन्तो व्ययन्ति अयं पुनः
प्रतिगृहीतृहृदयेऽवस्थित एव मुक्तिं प्रयच्छन्नव्येति, एवं केवलमनः
साध्यचिन्तनस्य पापक्षयेनापि साध्या मुक्तिर्यत्र फलं तत्र यन्मनसा
ध्यायतीति न्यायेनेन्द्रियद्वयसाध्यसंकीर्त्तनस्य पापक्षयः फलमिति न
चित्रमित्याह । "किं चित्र"मित्यादिना । एवमस्य वाक्यस्य चित्रता·
बुद्धिनिरासपरत्वे सम्भवति न ज्ञानवतोऽधिकारकल्पना युक्ता । "सां·
केत्यम्" इत्यादिवचनविरोधात् । ननु श्रद्धादिविहीनं संकीर्त्तनमासन्न·
मरणस्यैव पापक्षयहेतुभूतं किं न स्यात् । "एतावतालमघनिर्हरणाय
पुंसाम्" "संकीर्त्तनं भगवतो गुणकर्म्मनाम्नाम्" । "विक्रुश्य पुत्रमघवान्
यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम्" इत्यत्र म्रियमा
णत्वस्य श्रूयमाणत्वात् । तथा, यस्यावतारगुणकर्म्मविडम्बनानि नामा·
नि येषु विगमे विवशा गृणन्ति" "तेऽनेकजन्मशमलं सहसैव हित्वा सं
यान्त्यपावृतमृतं तमजं प्रपद्ये" इत्युक्तिषु विगमश्रवणाच्च, एवं साङ्के·
त्यादि वाक्यान्यपि समानप्रकरणस्थानि, तत्समानार्थानि च पुराणा
न्तरगतानि वाक्यानि म्रियमाणाधिकाराण्येव, ततश्च स्मार्त्तं प्रायश्चित्तं
जीवतः पापक्षयहेतुः सङ्कीर्तनं तु म्रियमाणस्येति चेत् । न । "तावत्ति·
ष्ठति देहेऽस्मिन्कलिकल्मषसम्भवम्" इति वाराहवचने गोविन्दसङ्कीर्त·
नस्य सत्येव देहे पापक्षयहेतुत्वश्रवणात् । अत्र हि गोविन्दसङ्कीर्त्त·
नावधिकं पापावस्थानमित्युक्तम्, यदि च कृतेऽपि गोविन्दकीर्त्तने
जीवतः पापं तिष्ठेत्, तदवधिकत्वप्रतिपादनं विरुध्येत । श्रूयते च-

गच्छन् तिष्ठन् स्वपन् वापि पिबन्भुञ्जन् हसँस्तथा ।
कृष्णकृष्णेति सङ्कीर्त्य मुच्यते पापकञ्चुकात् ॥

इति वचने वाशब्देन जीवतो यस्यां कस्यांचिदप्यवस्थायां स·
ङ्कीर्त्तनेन पापक्षयः । किञ्च सङ्कीर्त्तनस्य पापक्षये जननीये म्रि·
यमाणत्वापेक्षायां "कोचित्केवलया भक्त्या" इत्युक्तं पौष्कल्यं व्याहन्ये·

त। न च विस्पष्टं श्रूयते म्रियमाणानामेवाघक्षयकरं सङ्कीर्तनमिति। कल्पना चोकालिकप्रमाणविरोधे न सम्भवतीत्युक्तम्। "एतावताल"मित्यस्य तु स्वारस्येन प्रतीयमानोऽर्थोऽन्य एवाभियुक्तैरुक्तः। तथा हि। अलं शब्दस्तावद् द्वार्थः, पर्य्याप्तिवचनो निवारणवचनश्च। तत्रास्य पर्य्याप्तिवचनत्वेऽलं मल्लो मल्लायेतिवदेतावदलमिति प्रथमा स्यात्, तृतीयान्तत्वश्रवणात्तु, अलमतिप्रसङ्गेनेतिवन्निवारणार्थः। एवं चाघक्षयायैतावन्न कर्त्तव्यमित्यर्थः। किं तदित्याकाङ्क्षायामाह। "सङ्कीर्त्तनं भगवतो गुणकर्मनाम्ना"मिति। तेषां प्रत्येकं सम्यक्कीर्त्तनस्य सवासनपापक्षयद्वारा मुक्तिहेतुत्वेन पापक्षयमात्रे समुदितानां वैयर्थ्यात्। तस्य यथाकथंचिदुच्चरितान्यतरमात्रसाध्यत्वात्। तदाह विक्रुश्येति। उद्यतदण्डपुरुषदर्शनेनोत्पन्नभयतयाक्रोशपूर्वकं न तु स्वपरमनोह्लादनहेतुसुललितम्, तत्रापि पुत्रबुद्ध्या न भगवद्बुद्ध्या, तदपि म्रियमाणत्वेन शिथिलगात्रत्वाच्च स्पष्टम्। तथा प्रसिद्धमहापातकोऽजामिलोऽपि न तु यथाकथञ्चित्प्रमादजातपातकः, सोऽपि मुक्तिमत्वघक्षयमात्रमिति। एवञ्चाघक्षये समुदितानां वैयर्थ्यपरमिदं वाक्यम्। न तु म्रियमाणत्वस्याधिकारिविशेषणत्वपरमपि, वाक्यभेदात्। "यस्यावतारे"त्यपि वचनमसुविगमावस्थायां सङ्कीर्त्तनस्य पापक्षयद्वारा मुक्तिहेतुतामाह न तु तदवस्थान्तरे पापक्षयहेतुतां निराकर्त्तुमिष्टे, उक्तवचनाविरोधात्। अन्यथा विवशत्वश्रवणात् तस्यामप्यवस्थायां तदभावे कृतात्सङ्कीर्तनात्पापक्षयो न स्यात्। "गच्छंस्तिष्ठन्" इत्याद्यवस्थाश्रवणाच्च तदितरावस्थायां कृतस्य तस्य तद्धेतुत्वं न स्यात्। तस्मान्नेयमपि व्यवस्था।

अथ—

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।
प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम्॥

इति वचनादननुतप्तविषयं स्मार्तप्रायश्चित्तम्। इतरविषयं तु प्रकृतमिति चेत्। न। स्मार्तप्रायश्चित्तेऽप्यनुतापश्रवणात, साङ्केत्यादिवचनविरोधाच्च। उत्कृष्टत्वपरैकशब्दवत्युक्तवचने च सवासनपापक्षयेऽनुतापापेक्षोक्तेः। नापि देशकालाद्यपेक्षया व्यवस्था।

चक्राङ्कितस्य नामानि सदा सर्वत्र कीर्त्तयेत्।
नाशौचं कीर्तने तस्य स पवित्रकरो यतः॥

इति विष्णुधर्मवचनात्।"यत्र तत्र स्थितो वापी"ति पाद्मवचनाच्च। नचैवं सर्वेषामत्रैव प्रवृत्तेः स्मार्तविधीनामानर्थक्यम्। बहुतरदुर्वासना·

वशेन भगवन्नामविमुखानां तत्रैव प्रवृत्तेः। दृश्यन्ते हि तादृशा अपि बहवः पुरुषाः। एवञ्च स्मार्तविधिविरोधाभावेन मन्त्रार्थवादेभ्योऽध्यवगम्यमाना सकृत्कीर्त्तनस्याघक्षयहेतुतावश्यमङ्गीकार्या देवताविग्रहन्यायात्। तस्माद्यदा कदाचिद्यत्र कुत्रचित्कृतश्रद्धाभक्तिज्ञानानुतापशुद्धिरहितेनापि सकृदुदितं भगवन्नाम प्रारब्धमदृष्टवमानमबलानुष्ठितपापेतरदखिलमंहो निवर्त्तयति। प्रारब्धस्य तस्य "तावदेव चिरम्" इति भोगैकनाश्यत्वावगमात्। इतरयोरप्यंहसोः कीर्त्तनानाश्यत्वश्रवणेन भोगैकनाश्यत्वात्। यथोक्तं—

पाद्मे-

सतां निन्दानाम्नः परममपराधं वितनुते यतः ख्यातिं यातं कथमु सहते तद्विगर्हामिति ? ।

नाम्नो बलाद्यस्य हि पापबुद्धिर्नविद्यते तस्य यमैर्विशुद्धिः। इति च।

म्रियमाणेन तु येन केनचित्सकृदुक्तमपि तत् अंहो निवृत्तिं जनयत्काशीमरणन्यायेन मुक्तिं जनयति। "यस्यावतारे" इत्युक्तवत्। श्रद्धादिसम्पन्नेन तु अभ्यस्यमानं भगवन्नाम सवासनपापक्षयं जनयदन्ते नामोच्चारणाभावेऽपि मुक्तावुपयुज्यते। उक्तं हि—

सत्यं ब्रवीमि मनुजाः स्वयमूर्ध्वबाहु
र्यो मां मुकुन्दनरसिंहजनार्दनेति।
जीवो जपत्यनुदिनं मरणे ऋणीव
पाषाणकाष्ठसदृशाय ददामि मुक्तिम्॥ इति।

तथा साधनचतुष्टयसम्पन्नस्यानुष्ठितश्रवणमननस्यापि कुतश्चित्प्रतिबन्धाद्भगवति वेदान्तप्रतिपादितस्वरूपे चेतोऽनवतारे भगवन्नामसङ्कीर्त्तनं प्रतिबन्धनिवृत्त्या तत्वज्ञानोत्पत्तावुपयुज्यते। यथोक्तम्—

नक्तं दिवा च गतभीर्जितनिद्र एको
निर्विण्ण ईक्षितपथो मितभुक् प्रशान्तः।
यद्यच्युते भगवति स्वमनो न सज्जे
न्नामानि तद्रतिकराणि पठेदलज्जः॥ इति।

अत्र च निर्विण्णत्वादिसङ्कीर्त्तनं तेषामाश्रमधर्मत्वात्। अन्येषां तु आश्रमान्तरवतां न तदपेक्षणम् "अनन्यगतयो मर्त्या भोगिनोऽपि" इत्यादिना तद्रहितानामपि भगवन्नामैकनिष्ठानां मुक्तिश्रवणात्। "सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पका" इति नाममात्रैकनिष्ठानां सर्वानपेक्षताप्रतिपादनाच्च। उक्तञ्च भगन्नामकौमुदीकारैः।

आकृष्टिः कृतचेतसां सुमहतामुच्चाटनं चांहसा
माचाण्डालममूकलोकसुलभं वश्यश्च मुक्तिश्रियः ॥
नो दीक्षां न च दक्षिणां न च पुरश्चर्य्यां मनागीक्षते
मन्त्रोऽयं रसनास्पृगेव फलति श्रीरामनामात्मकः ॥ इति ।

तस्मिन्निदं संकीर्त्तनस्य मुक्तिफलत्वं पापक्षयाद्यनेकफलत्वं चेत्यास्तामेतद्, भगवन्नाममहिम्नो ब्रह्मादिभिरपि साकल्येन वक्तुमशक्यत्वात् ।

अयञ्च संक्षेपः ।

विश्वासमकृत्यर्थधियामभावे कदापि कुत्रापि कथञ्चनापि ।
उक्तं सकृन्नाम हरेर्हरीति ध्वंसं प्रकुर्यादखिलाघराशेः ॥ १ ॥
कृष्णेति रामेति शिवेति शब्दान्विश्वासयुक्तस्तु सदाभ्यसेद्यः ।
लब्ध्वा परां भक्तिमथ प्रबोधं मुक्तः स भूयादिति सिद्धमत्र ॥ २ ॥

कंसध्वंसनहेतुर्दुस्तरभवजलनिधेर्दृढः सेतुः ।
जनको यश्च विधातुस्तुष्टोऽनेन स हरिर्भवतु ॥ २ ॥

इति सङ्कीर्त्तनानिर्णयः ॥

॥ अथ स्मरणनिर्णयः ॥

तत्र स्मरणं नाम भगवन्नामरूपादीनामनुसन्धानध्यानापरपर्य्यायो मानसो व्यापारविशेषः । तच्च कर्तव्यत्वेनोक्तं—

पाद्मे ।

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ इति ।

स्मरणे च प्रवृत्तिर्नानाविधसत्कर्मसाध्येति दर्शयितुं तत्तद्विधीनामेतत् किङ्करत्वमुक्तम् । निषेधानां किङ्करत्वोक्तिरपि तन्निषेध्यानामेतत्प्रवृत्तिप्रतिबन्धकत्वात् । स्मरणस्यात्यन्तं सत्वशोधकत्वमुक्तं भागवते ।

विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ इति ।
[श्रीभा० स्क० १२ अ० ३ श्लो० ४८]

तस्य भगवन्मूर्त्तिभक्तिवैराग्यज्ञानहेतुत्वमपि ।

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि च शं (१)तनोति ।

---

(१) शमं तनोतीति श्रीभागवते पाठः ।

सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानञ्च विज्ञानविरागयुक्तम् ॥ इति ।
[श्रीभा० स्क० १२ अ० १२ श्लो० ५४]

ज्ञानं=मूर्तिस्फूर्तिः । विज्ञानं=सविलासाविद्यानिवर्तकम् । अत्यन्तसत्त्वशुद्ध्यादिकं च स्मरणावृत्त्या भवतीत्याशयेन पाद्मे सततशब्दः । अत एव—

विष्णुपुराणे ।

विष्णुसंस्मरणादेव समस्तक्लेशसंक्षयः ।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते ॥
तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो मुने ।
न याति नरकं शुद्धः संक्षीणाखिलकल्मषः ॥ इति ।

ननु पाद्मवैष्णवयोर्विष्णोः कर्मत्वनिर्देशेन स्मरणस्य तदर्थता प्रतीयते । विष्णुश्च मन्त्रवर्णेनोपांशुयाजार्थत्वेनावगत इति स्मरणं तद्वारोपांशुयाजाङ्गम् , उत्तमप्रयाजादिगतविष्णुस्मरणवत् । एवञ्च स्मरणस्य परार्थत्वान्मुक्त्यादिफलश्रुतिरर्थवादः, अपापश्लोकश्रवणवदिति चेत् ।

न विधिशब्दस्य मन्त्रत्व इति न्यायेन [पू० मी० अ० १० पा० ४ अधि० १४ सू २३] मान्त्रवर्णिकविष्णुशब्दद्वारैव विष्णोः कर्माङ्गत्वात् । यथा "हृदिस्थे भगवत्यनन्ते" "अविस्मृतिः कृष्णपदारविन्दयो"रिति च शब्दान्तरेणाप्यर्थं निर्दिश्य स्मरणविधानात् उत्तमप्रयाजादिषु तु विष्णुशब्देनैव क्रियमाणस्मरणस्य युक्तमङ्गत्वम् । पदारविन्दयोरत्यन्तं कर्मानङ्गत्वाच्च न तत्स्मरणं तदुपयोगि । विष्णुस्मरणमात्रस्योपांशुयाजार्थता, इतरस्य तु मुक्त्याद्यर्थतेति चेत् । न । तादर्थ्यद्वयकल्पने मूलभूतश्रुतिद्वयकल्पनायां गौरवप्रसङ्गात् । पुराणवाक्यस्य स्वातन्त्र्येण प्रामाण्याभावात् । सर्वविधिनिषेधानां किङ्करत्वप्रतिपादनस्यात्यन्तं निरालम्बनत्वापाताच्च । उपांशुयाजस्य स्वर्गार्थत्वेन स्वर्गस्य विघ्नत्वप्रतिपादनायोगाच्च । एवकारश्रुतेर्मुक्त्युक्तेश्चात्यन्तं वैयर्थ्यापाताच्च सर्वकर्मणाञ्च विष्णुप्रीत्यर्थत्वाच्च कर्मत्वनिर्देशो विरुध्यते तस्मात्सत्पुराणाञ्जस्यपर्य्यालोचनयाऽऽवर्त्यमानभगवत्स्मरणस्य स्वातन्त्र्येण मुक्तिहेतुत्वमाश्रयणीयम् । श्रूयते चैतद्गोपालतापनीये ।

सदा मां संस्मरन्ब्रह्म मत्पदं याति निश्चितमिति ।

कैवल्योपनिषद्यपि ।

उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्॥इति।

अत्र भूतयोनिः=परमात्मा । अदृश्यत्वादिगुणको, धर्मोक्तेरिति न्यायात् । सकृत्स्मरणं तु संकीर्तनवत्पापक्षयहेतुः । यथोक्तं—

श्रीभागवते ।

सकृन्मनः कृष्णपदारविन्दयो
र्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ इति ।

[श्रीभा० स्क० ६ अ० १ श्लो० १९]

मनो निवेशने हेतुस्तद्गुणरागीति । भगवद्गुणेषु रागो यस्य तत्, तथा । गुणाश्च तत्र तत्रोक्ताः ।

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन्गोपवृन्दै
र्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥

[श्रीभा० स्क० १० अ० २१ श्लो० ५]

तं गोरजःछुरितकुन्तलबद्धबर्ह
वन्यप्रसूनरुचिरेक्षणचारुहासम् ।
वेणुं क्वणन्तमनुगैरनुगीतकीर्त्तिं
गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥

श्यामं हिरण्यपरिधिं वनमाल्यबर्ह
धातुप्रवालनटवेषमनुव्रतांसे ।
विन्यस्तहस्तमपरेण धुनानमब्जं
कर्णोत्पलालककपोलमुखाब्जहासम् ॥

[श्रीभा० स्क० १० अ० २३ श्लो० २२]

कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ इति ।

[श्रीभा० स्क० १० अ० ३५ श्लो० २०]

तथा—

प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ।
करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ॥ इति ।

[श्रीभा० स्क० ७ अ० ८ श्लो० २०–२१]

तथा—

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम् ॥

वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा रोपितभ्रूविजृम्भ
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कौसलेन्द्रोऽवताद्वः ॥ इति ।

बृहन्नारदीयेऽपि सकृत्स्मरणस्याघघातकतोक्ता ।

सकृत्संस्मरणाद्विष्णोर्नश्यन्ति क्लेशसञ्चयाः ॥ इति ।

पाद्मेऽपि—

प्रयाणे चाप्रयाणे च यन्नामस्मरतां नृणाम् ।
सद्यो नश्यति पापौघो नमस्तस्मै चिदात्मने ॥ इति ।

शुचित्वाद्यनपेक्षत्वञ्चोक्तं—

भविष्ये—

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेद्देवमीशानं न स पापेन लिप्यते ॥ इति ।

विष्णुरहस्ये—

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥ इति ।

स्मरणप्रकारश्च—

श्रीभागवते ।

एकैकशोऽङ्गानि धियानुभावयेत्
पादादियावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत्
परं परं शुध्यति धीर्यथायथा ॥ इति ।

[श्रीभा० स्कन्ध० २ अ० २ श्लो० १३]

म्रियमाणतादशायां तु भगवत्स्मरणमेकमप्यनेकधर्मसाध्यं मुक्तिहेतु च ।

एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ।
जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥

[श्रीभा० स्कन्ध० २ अ० १ श्लो० ६)

तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो याहि परां गतिम् ॥

[श्रीभा० स्क० १२ अ० ३ श्लो० ४९]

म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ।
आत्मभावं नयत्यङ्ग सर्वात्मा सर्वदर्शनः(१) ॥

[श्रीभा० स्क० १२ अ० ३ श्लो० ५०]

---

(१) सर्वसंश्रयः, सर्वसंभव इति च पाठान्तरम् ।

इतिवचनेभ्यः—

तदिदं भगवत्स्मरणं चाद्विरतादात्कर्मसाद्गुण्यार्थमपि ।

न्यूनातिरिक्तताप्तिद्धौ कलौ वेदोक्तकर्मणाम् ।
हरिस्मरणमेवात्र सम्पूर्णं फलदायकम् ॥
हरिस्मरणनिष्ठानां हरिपूजारतात्मनाम् ।
सर्वं समस्तकर्माणि यान्ति सम्पूर्णतां द्विजाः ॥

इति बृहन्नारदीयोक्तेः । प्रतिकर्मावृत्तित्वमभिप्रेत्य निष्ठरतशब्दोक्तिः । अनन्तरवचनात् "यस्य स्मृत्ये"ति वचनाच्च स्मरणस्य पूजाकीर्त्तनाभ्यां समुच्चये प्राप्ते केवलस्मरणस्यापि साद्गुण्यकरत्वज्ञापनायैवकारः । समुच्चयनैरपेक्ष्ये शक्ताशक्ताधिकारिभेदेन पञ्चत्यवैगुण्यवैगुण्यभेदेन वा व्यवस्थापनीये । बहुवचनं कर्मसम्बन्धिसकलपुरुषाभिप्रायेण । फलान्तरार्थमप्युक्तं—

गोपालोत्तरतापनीये ।

व्रजस्त्रियां यमुनापारवासिने दुर्वाससे भैक्ष्यं दातुमुद्यतानां यमुनातरणोपायं कृष्णेति ब्रह्मचारीतिस्मरणमुपदिश्य श्रुतम् "यं मां स्मृत्वाऽगाधा गाधा भवति, यं मां स्मृत्वाऽपूतः पूतो भवति, यं मां स्मृत्वाऽव्रती व्रती भवति, यं मां स्मृत्वा सकामो निष्कामो भवति, यं मां स्मृत्वाऽश्रोत्रियः श्रोत्रियो भवतीति दिक् ।

सकृत्स्मृतो योऽखिलपापहन्ता स्मृतोऽसकृद्यश्च विमुक्तिदाता ।
विश्वोद्भवावस्थितिनाशकर्त्ता तुष्टः स भूयाद्यमुनाविहर्ता ॥ १ ॥

इति कामस्मरणनिर्णयः ।

अथ पादसेवननिर्णयः ।

पादसेवनं नाम भगवत्परिचर्य्या, चमरान्दोलनपर्वमहोत्सवाद्यनेकरूपा । सा च सामान्यतः कर्तव्यत्वेनोक्ता ।

श्रीभागवते—

को नु राजन्निन्द्रियवान् मुकुन्दचरणाम्बुजम् ।
न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ॥ इति ।

[श्रीभा० स्क० ११ अ० २ श्लो० २]

अत्र च नैव वैगुण्यशङ्केत्युक्तं तत्रैव—

मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावात् सर्वात्मना(१) यत्र निवर्तते भीः ॥ इति ।

[श्रीभा० स्क० ११ अ० २ श्लो० ३३]

---

(१) विश्वात्मनेति श्रीभागवते पाठः ।

अस्यान्तः करणशोधकत्वे—

यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित्॥इति
[श्रीभा० स्क० ४ अ० २१ श्लो० ३१]

वैराग्यादिहेतुत्वे संसारदुःखनिवर्तकत्वे च—

विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान् ।
यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥ इति ।
[श्रीभा० स्क० ४ अ० २१ श्लो० ३२]

तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ।
तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः ॥
[श्रीभा० स्क० ३ अ० ९ श्लो० ६]

इति च ।

पुरुषार्थचतुष्टयहेतुत्वे—

धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ।
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥ इति ।

एवञ्च सर्वापि भगवत्परिचर्योक्तप्रणालिकया मुक्तिहेतुरिति सिद्धम् ।

अथ सांवत्सरिकास्तद्विशेषाः ।

तत्र फाल्गुनकृष्णप्रतिपदि श्रीभगवतो दोलोत्सवः कार्यः ।

चैत्रे मासि सिते पक्षे एकादश्यां नरोत्तमः ।
दोलारूढं महाविष्णुं कुर्यात्कृत्वा महोत्सवम् । इत्यपि क्वचित् ।

एतन्महिमा चोक्तो—

गारुडे ।

दोलारूढं प्रपश्यन्ति कृष्णं कलिमलापहम् ।
अपराधसहस्रैस्तु मुक्तास्ते घूर्णने कृते ॥
आन्दोलनदिने प्राप्ते रुद्रेण सहिताः सुराः ।
कुर्वन्ति प्राङ्गणे नृत्यं गीतं वाद्यञ्च हर्षिताः ॥
तावत्तिष्ठन्ति पापानि जन्मकोटिकृतान्यपि ।
यावन्नान्दोलयेद् भूप कृष्णं कंसविनाशिनम् ॥
दोलास्थितस्य कृष्णस्य येऽग्रे कुर्वन्ति जागरम् ।
सर्वपुण्यफलावाप्तिर्निमेषेणैव जायते ॥
दोलास्थितं तु ये विष्णुं पश्यन्ति मधुमाधवे ।
क्रीडन्ते विष्णुना सार्द्धं वैकुण्ठे देववन्दिताः(१) ॥

---

(१) देवपूजिता इति पाठान्तरम् ।

तस्मात्सर्वप्रयत्नेन दोलायात्रामहोत्सवः ।
कार्य्यः सर्वफलावाप्त्यै सर्वपापहरः शुभः ॥ इति ।

तथा चैत्रशुक्लद्वादश्यां दमनकोत्सवः ।

यथोक्तं तत्रैव—

चैत्रे मासि तथा विष्णोः कार्य्यो दमनकोत्सवः ।
वैष्णवैर्विष्णुभक्त्या च जनतानन्दवर्द्धनः ।
देवानन्दसमुद्भूता दिव्या दमनमञ्जरी ॥
निवेद्या विष्णवे भक्त्या सर्वपुण्यफलेप्सुभिः ॥ इति ।

रामार्च्चनचन्द्रिकायाम्—

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम् ॥
पारणाहे न लभ्येत द्वादशी घटिकापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥ इति ।
माधवे दमनारोपो मधौ न विहितो यदि ।
वैशाख्यां श्रावणे भाद्रे कर्त्तव्यं वा तदर्पणम् ॥ इति च ।

अथ प्रयोगः ।

उपवासदिने प्रातः स्नानादि निर्वर्त्य दमनकारामं गत्वा क्रमेण त-मादाय चन्दनादिना तत्रैव तं प्रपूजयेत् । श्रीकृष्णपूजार्थं त्वां नेष्यामीति सम्प्रार्थ्य प्रणमेत् । यथादैवतमन्यत्रोहः । तत उत्पाट्य कारुहस्ते दत्वा तस्मै मूल्यदानपूर्वकं तत आदाय पञ्चगव्येनाभिषिच्य शुद्धोदकेन प्रक्षाल्याशोकमूले स्थण्डिले स्थापयित्वा तस्मिन्दमनकेऽशोककाल-वसन्तकामान् गन्धाद्यैः प्रपूजयेत् । शुचौ देशे काममात्रं पूजयेदित्यन्ये ।

अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥

इत्यशोकम् ।

सृष्ट्यादिकालपर्य्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥

इति कालम्—

वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताप्रिय ।
सहस्रमुखसंवाह ! कालरूप ! नमोऽस्तु ते ॥

इति वसन्तम्—

काम ! भस्मसमुद्भूत ! रतिबाष्पपरिप्लुत !

ऋषिगन्धर्वदेवादिविमोहक ! नमोऽस्तु ते ॥ इति कामम् ।

एवञ्चतुरो देवांस्तत्र सम्पूज्य—

नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥

इति दमनकमुपतिष्ठेत् । तत ओं कामाय नम इति मन्त्रेण सपरिवारमन्मथरूपिणं दमनं गन्धादिभिस्तत एवोद्भूतदमनेन पूजयेत् । ततो धौतनववाससाऽऽच्छाद्य नवे वैणवे पटले निधाय मङ्गलवाद्यगीतपुरुषसूक्तादिवेदघोषेण स्वगृहमानयेत् । ततो रात्रौ देवं सम्पूज्य तदनुज्ञया दमनाधिवासनं कुर्य्यात् । तादित्थं देवस्य पुरतः स्थण्डिलमुपलिप्य तत्राष्टदलं कमलं कृत्वा सितपीतकृष्णरक्तवर्णैः सम्पूर्य तद्बहिश्चतुष्कोणं विधाय पीतवर्णेन सम्पूर्य तद्बहिर्वर्तुलमण्डलत्रयं विधाय श्वेतरक्तपीतैः सम्पूर्य्य तद्बहिश्चतुष्कोणं विधाय रक्तवर्णेन पूरयेत् , सर्वतोभद्रं वा सम्पादयेत् । उपरि पञ्चवर्णं वितानं कुर्यात् । उक्तमण्डले शुद्धोदकपूर्णं हेमरत्नफलयुतं कुम्भं निधाय तस्मिन् दमनपटलं संस्थाप्य—

पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ।
दमन त्वमिहागच्छ सान्निध्यं कुरु ते नमः ॥

इति दमनके तत्र तद्देवतामावाहयेत् । ततो दमनपूर्वभागे क्लीं कामदेवाय नमः । ह्रीं रत्यै नमः । इति रतिसहितं कामदेवं गन्धादिभिः पूजयेत् । क्लीं भस्मशरीराय नमः । इत्याग्नेय्याम् । क्लीमनङ्गाय नमः । इति दक्षिणस्याम् । क्लीं मन्मथाय नमः । इति नैर्ऋत्याम् । क्लीं वसन्तसखाय नमः । इति वारुण्याम् । क्लीं स्मराय नमः । इति वायव्याम् । क्लीमिक्षुचापाय नमः । इति कौवेर्य्याम् । क्लीं पुष्पबाणाय नमः । इतीशान्याम् । ह्रीं रत्यै नम इत्यस्य सर्वत्रानुषङ्गः । ततः "तत्पुरुषाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात्" इति कामगायत्र्या दमनमष्टोत्तरशतमभिमन्त्र्य, गन्धादिभिः सम्पूज्य, इदमन्त्रेण पुष्पाञ्जलिं निवेद्य,

नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मन्थाय जगन्नेत्रे रतिप्रिय नमोऽस्तु ते ॥

इति नमस्कुर्यात् ।

ततः—

क्षीरोदार्णवमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥

इति परमेश्वरं प्रार्थ्य, पुष्पाञ्जलिं दत्वा, दमनं सर्वतो रक्षन् गीता-

दिना रात्रिमतिवाहयेत् । इत्यधिवासनम् ।

प्रातर्नित्यपूजान्तं विधायानेकोपचारैः पुनः सम्पूज्य दमनमञ्जरीं सदूर्वां गन्धाक्षतयुक्तां मूलमन्त्रेणाभिमन्त्र्य कराभ्यां गृहीत्वा—

देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ।
हृत्स्थान् पूरय मे विष्णो कामान्कामेश्वरीप्रिय ।
इमं दमनकं देव गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन्परिपूरय ॥

इतिजप्त्वा मूलमन्त्रेण भगवत्यर्पयेत् । ततो यथाशोभं दमनकमारोप्य भगवन्तं प्रार्थयेत् ।

मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ! ॥
वनमालां यथादेव कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजां च हृदये वह ॥
जानताजानता वापि न कृतं यत्तवार्चनम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥ इति ॥

ततो देवं नमस्कृत्य गुरुं दमनेन वस्त्रादिना च सम्पूज्य भगवति कर्म निवेद्य स्वयं च तत्प्रसादत्वेन दमनशेषं धृत्वा द्विजान्सम्पूज्य भोजयेत् । स्वयं च बन्धुभिः सह भुञ्जीतेति । इति दमनोत्सवः ।

अथ जलक्रीडोत्सवः ॥

गारुडे—

निक्षिप्य जलपात्रे तु मासे माधवसंज्ञके ।
माधवं येऽर्चयिष्यन्ति देवतास्ते नरा भुवि ॥
स्वर्णपात्रेऽथवा रौप्ये ताम्रे वा मृन्मयेऽपि वा ।
तोयस्थं योऽर्चयेद्देवं शालिग्रामसमुद्भवम् ॥
प्रतिमां वा महाभाग तस्य पुण्यमनन्तकम् ।
तस्मात्त्वेष्ठ सदा भूप ! तोयस्थं योऽर्चयेद्धरिम् ॥
वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥ इति ।
द्वैवः कालविकल्पोऽयमुष्णस्य तारतम्यतः ।
गन्धोदकयुते पात्रे नित्यपूजां समाप्य च ॥

अतिवाह्य दिनं रात्रौ नीत्वा देवं निजासनम् ।
पञ्चोपचारैः सम्पूज्य तीर्थं प्राश्य विसर्जयेत् ।
आत्मानं गृहदारादि तेन तीर्थेन पावयेत् ॥
द्वादश्यां तु जले रात्रावर्चयेद्गरुडोक्तितः ।
द्वादश्यां पूजयेद्रात्रौ जलस्थं जलशायिनम् ॥ इति ।

विष्णुधर्म्मोत्तरे—

वैशाखे पूर्णमास्यां वै जलस्थं जगदीश्वरम् ।
पूजयेद्वैष्णवो भक्त्या कृत्वोत्साहं मुदान्वितः ॥
गीतवाद्यपताकाद्यैः कृत्वा पुण्यमहोत्सवम् ।
ज्येष्ठस्यैकादशीं शुक्लां यजेत्तावत् प्रहर्षितः ॥ इति ।

अथ प्रसङ्गाद् वसन्तपुष्पमहिमा ।

मल्लिकाकुसुमैर्देवं वसन्ते गरुडध्वजम् ।
अर्चयेत् परया भक्त्या मुक्तिभागी भवेन्नरः ॥
यः पुनः पाटलैः पुष्पैर्वसन्ते गरुडध्वजम् ।
अर्चयेत्परया भक्त्या दहेत्पापं त्रिधार्जितम् ॥ इति ।
यः पश्यति तृतीयायां कृष्णं चन्दनरूषितम् ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥

इति वचनाच्च छन्दतोऽनुष्ठेयः ।

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ॥
तस्यां रथे समारोप्य भगवन्तं रमापतिम् ।
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान् बहून् ॥

इति स्कान्दवचनाद्रथोत्सवोऽपि ।

अथाषाढशुक्लद्वादश्यां शयनोत्सवः ॥

रामार्चनचन्द्रिकायां गारुडे—

मिथुनस्थे सहस्रांशौ न स्वापयति यो हरिम् ।
वैष्णवैः सह संभूय ह्यनावृष्टिस्तदा भवेत् ॥

भविष्ये—

मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनम् ।
तुलाराशिगते तस्मिन् पुनरुत्थापयेत्प्रभुम् ॥

अथ प्रयोगः ॥

पारणाहे पूर्वरात्रौ महतीं पूजां वाद्यघोषयुतां विधाय वैष्णवान-
भ्यर्च्य भगवन्तं गीराज्य नरयाने आरोप्य वैष्णवैः सह गीतवादित्रनृ-

स्वघोषैर्जलाशयं नीत्वा पुष्पाञ्जलिं दत्वा यानादुतार्य्य तीरेऽञ्जलिन्यास-माशास्य हस्तं दत्वोपवेशयेत्। धौताङ्घ्रिपाणिराचान्तः श्रीविष्णोरनुग्र-हार्थं शयनीक्षीरमहोत्सवं करिष्य इति सङ्कल्प्यात्मन्यासपूर्वकं देवन्या-सं कृत्वा "स्वर्णघर्म्मानुवाकेन "पुरुषसूक्तेन"उत्तरनारायणेन" चाभिषि-च्य पञ्चामृतेन संस्नाप्य सम्पूज्य जय जय महाविष्णो विश्वमनुगृहा-णेति सम्प्रार्थ्य जलमध्ये पर्य्यङ्कं शुक्लवस्त्रसमाच्छन्नं सोपधानं संस्थाप्य तस्मिन् भगवन्तम् "अतो देव" इति मन्त्रेण प्रस्वापयेत्।

शेषे पर्य्यङ्कवर्य्येऽस्मिन् फणामणिगणामले।
श्वेतद्वीपान्तरे देवं कुरु निद्रां नमोऽस्तु ते॥

इति नमस्कृत्य गन्धादिभिर्महापूजां कृत्वा,

सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत॥

इति सम्प्रार्थ्य देवस्याग्रे चातुर्मास्यव्रतानि स्वीकुर्य्यात्।

चतुरो वार्षिकान् मासान्देवस्योत्थापनावधि।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत॥
इदं व्रतं मया देव गृहीतं पुरतस्तव।
निर्विघ्नं सिद्धिमायातु प्रसादात् तव केशव॥
गृहीतेऽस्मिन् व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा सम्पूर्णतां यातु प्रसादात्ते जनार्द्दन॥ इति।

श्रावणे शाकस्य वर्जनं भाद्रे दध्नः, आश्विने पयसः, कार्तिके द्विद-लस्येति चातुर्मास्यव्रतसंक्षेपः। विस्तरस्तु व्रतप्रकाशे ज्ञेयः। अशक्तौ यः कश्चिन्नियमोऽनुष्ठेयः।

आषाढे तु सिते पक्षे एकादश्यामुपोषितः।
चातुर्मास्यव्रतं कुर्य्यात् यत्किञ्चिन्नियतो नरः॥

इति मदनरत्ने महाभारतवचनात्। ततो यथाशक्ति देवं स्तुत्वा प्रजा-पाले राजनि मङ्गलमाशास्य शङ्खचरणतीर्थं वैष्णवैः सहाभिवन्द्य प्राश्य गीतादिना भगवन्तं परितोष्य वैष्णवान् सम्पूज्य नरयाने भगवन्तमा-रोप्य गीतादिघोषैर्मन्दिरमानीय नीराज्य वैष्णवान् विसृज्य निजासने उपवेश्य कर्म निवेदयेत्। इति शयनोत्सवः।

अथ पवित्रारोपणोत्सवः।

हेमाद्रौ—

विष्णुरहस्ये।

श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे।

द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥

तच्च नित्यमुक्तं बह्वृचपरिशिष्टे ।

विधिना शास्त्रदृष्टेन यो न कुर्यात्पवित्रकम् ॥
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम् ॥ इति ।

पाद्मेऽपि—

ऊर्जे व्रतं मधौ दोलां श्रावणे तन्तुपूजनम् ।
चैत्रे दमनकारोपमकुर्वाणो व्रजत्यधः ॥

गारुडेऽपि—

प्रावृट्काले तु ये मर्त्या नार्चिष्यन्ति पवित्रकैः ।
तेषां सांवत्सरी पूजाऽफलं तस्य भविष्यति ॥

तस्य=पवित्राख्यनागस्य(१) ।

मन्त्रप्रकाशे—

अथ चाद्रिष्नयोगेन मुख्यकालो न लभ्यते ॥
कन्यायां चापि कुर्वीत यावन्नोत्तिष्ठते हरिः(२) ॥ इति ।

अथ प्रयोगः ।

दशम्यां हैमरौप्यताम्रान्यतमसूत्रेण तदसम्भवे पट्टसूत्रेण तदभावे कुमार्या कर्तितेन कार्पासेन पवित्राणि कार्य्याणि ।

तद्यथा—

स्नात्वा त्रिगुणं त्रिगुणीकृत्य पञ्चगव्येन प्रोक्ष्य शुद्धोदकेन प्रणवेन

(१) अत्रेदमनुसन्धेयम् ।

कनीयान् वासुकेर्भ्राता पवित्रो नाम नागराट् ।
निराहारव्रतो भूत्वा दैविकं वत्सरं शतम् ॥
तपस्तेपे समाश्रित्य देवदेवं महेश्वरम् ।
प्रसन्नस्तपसा तस्य पुरतः पुरुषोत्तमः ॥
प्रणतार्तिहरः शम्भुराविरासीदुमाधवः ।
प्रसादाभिमुखं दृष्ट्वा देवं स भुजगेश्वरः ॥
कण्ठाभरणतां प्राप्तुं वव्रे वरमनुत्तमम् ।
तथेत्याभाषितं कण्ठे दधार त्रिपुरान्तकः ॥
ये त्वा न बहु मन्यन्ते यथा सम्भावितो मया ।
जपहोमादिजं तेषां फलं त्वामेतु निश्चयात् ॥ इति ।

(२) अन्यत्रापि—

पवित्रारोपणं विघ्नात् श्रावणे न भवेद् यदि ।
कार्तिकावधिरिहार्के कर्तव्यमिति नारदः ॥ इति ।

प्रक्षाल्य मूलमन्त्रेण शङ्खोदकेनाष्टोत्तरशतमभिषिच्य भगवद्गायत्र्या ता न्यष्टारमाभिमन्त्र्य नवसूत्र्याष्टोत्तरशततदर्धतदर्धगुणितानि क्रमेण देवस्य जानूरुनाभिपर्यन्तान्युत्तममध्यमकनिष्ठानि पवित्राणि सम्पाद्य तेषु यथाक्रमं षट्त्रिंशच्चतुर्विंशतिद्वादशसंख्याकानङ्गुष्ठपर्वतदर्धमात्रान् ग्रन्थीन् कृत्वा अष्टोत्तरसहस्रगुणितमुक्ताद्विगुणं वा वनमालापवित्रं निर्माय तस्मिन्नष्टोत्तरशतं ग्रन्थीन् कुर्यात् । "चत्वारो ग्रन्थयः स्मृताः" इति तु गारुडे । ततो याजमानपवित्रं गन्धपवित्रं च कनिष्ठेन समं कृत्वा गुर्वग्न्योः पवित्रे मध्यमसमे निबध्य साधारणपवित्राणि त्रिभिस्त्रिभिः सूत्रैः कुर्यात् । ततोऽष्टाक्षरेण पवित्राण्यभिमन्त्र्य कुङ्कुमगोरोचनकर्पूरै रञ्जयित्वा "इदं विष्णु"रितिमन्त्रेणोत्तमाधिवासकं त्रिरभिमन्त्रयेत्, द्विर्मध्यमम्, सकृत्कनिष्ठम् , ततो नववैणवपटले तानि निधाय शुभ्रवस्त्रेणाच्छाद्य देवस्य पुरतः स्थापयेत् । ततोऽपामार्गेण दन्तधावनं कृत्वा स्नात्वा नित्यक्रियां विधाय भगवन्तं संपूज्य प्रार्थयेत् ।

क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
मयैतत् क्रियते देव तव तुष्ट्यै पवित्रकम् ॥
न हि विघ्नो भवेदत्र कुरु नाथ दयां मयि ।
सर्वथा सर्वदा विष्णो ! मम त्वं परमा गतिः ॥ इति ।

तत एकभक्तं कृत्वा तां रात्रिमतिवाहयेत् । इति दशमीकृत्यम् ।

अथैकादशीकृत्यम् ।

अथैकादश्यां नित्यपूजान्तं कृत्वा देवस्य पुरतः सर्वतो भद्रे पुण्याम्बुपूर्णे कुम्भं निधाय तस्मिन्पवित्रपटलं संस्थाप्य फलपुष्पमालालङ्कृतं वितानमुपर्याबध्य भगवन्तमभ्यर्च्य पायसं निवेद्य—

सांवत्सरस्य यागस्य पवित्रीकरणाय भोः ।
विष्णुलोकात् पवित्राद्य आगच्छेह नमोऽस्तु ते ॥

इति मन्त्रेण मूलमन्त्रयुतेन पवित्रं तं तुष्ट्याऽऽवाह्योत्तममध्यकनिष्ठेषु ब्रह्मविष्णुशिवान् सत्वरजस्तमांसि वेदत्रयं लोकत्रयं चाऽऽवाह्य वनमालायां प्रकृतिमावाह्य तदीये मौकुटे भागे द्युलोकमावाह्य—

सर्वाभरणचित्राङ्ग सर्वदेव नमोऽस्तु ते (१) ।
लावण्यरूपविद्वात्मन् ज्येष्ठसूत्रं समाश्रय ॥
सर्वाधारधराकृप सर्वकर्तः प्रजापते ।
सर्वथात्मेश सूत्रेऽस्मिन् सान्निध्यं कुरु ते नमः ॥

---

(१) सर्वदेवनमस्कृत इत्यन्यत्र पाठः ।

अतिवेग जगद्योने पुरुषात्मन्निबध्यते ।
कर्णीयो मे प्रभो देव तेजसा सूत्रमाश्रय ॥

इति त्रिभिर्मन्त्रैरुत्तमादीनि त्रीण्यभिमन्त्र्य,

प्रकृतिर्जगतः कर्त्री सर्वलावण्यदायिनी ।
श्रीसूत्रे नित्यकल्याणि सांनिध्यं कुरु ते नमः ॥
सर्वरत्नोज्वलाकार ब्रह्माण्डब्रह्मरोचिष ।
मुकुटोत्तमसर्वाङ्ग श्रियः सूत्र इहेहि भोः ॥

इति वनमालातदूर्ध्वभागावभिमन्त्रयेत् । तत आवाहितदेवता मूलमन्त्रेण सम्पूज्य त्रिसूत्र्यां ब्रह्मविष्णुशिवान् नवसूत्र्यामोङ्कारसोमवह्निब्रह्मनागशशिरविशिवविश्वेदेवान् ग्रन्थिषु क्रियापौरुषीवीराविजयेशापराजितामनोन्मनीजयाभद्रामुक्तिदा आवाह्य गन्धादिभिस्ताम्बूलान्तैः सम्पूजयेत् । ततो गन्धपवित्रं धूपितं गृहीत्वा प्रणवेनाभिमन्त्र्य—

विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥

इतिमन्त्रेण मूलमन्त्रेण च देवस्य पादयोः समर्प्य नीराज्य पञ्चोपचारैः सम्पूज्य स्तवैः स्तुत्वा देवं निमन्त्रयेत् ।

आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥ इति ।

ततो देवं नत्वा देवाय सूत्रस्यञ्च पुष्पाञ्जलिं निवेद्य सूत्राणि सर्वतो रक्षन् गीतादिना रात्रौ जागरणं कुर्यात् । इत्यधिवासनम् ।

अथ प्रातर्नित्यपूजान्ते पवित्रपूजां कृत्वा नीराज्य स्तुत्वा नत्वा मङ्गलघोषपूर्वकं गन्धदूर्वाक्षतयुक्तानि उत्तममध्यमकनिष्ठानि क्रमेण मूलमन्त्रेणादाय ज्येष्ठमष्टाविंशत्या मूलमन्त्रेणाभिमन्त्र्य,

कृष्ण कृष्ण नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ॥

इति मूलमन्त्रेण निवेदयेत् । एवं मध्यमम् । ततः कनिष्ठम् । ततो-वनमालामष्टाविंशत्याभिमन्त्र्य—

वनमालां यथादेव कौस्तुभं सततं हृदि ।
तद्वत्पवित्रन्तुंतस्त्वं पूजां स्वहृदये वह ॥

इत्युच्चार्य मूलेन मुकुटमारभ्य विनिवेदयेत्। ततो हैममुक्तामणीनां व्यष्टोत्तरशतेनाष्टाविंशत्या वाभिमन्त्र्य-साधारणपवित्राणि परिवार-देवताभ्यो नामभिर्दत्वा देवाय महानैवेद्यं ताम्बूलञ्च निवेद्य नीराज्य चामरैः संवीज्य दर्पणं प्रदर्श्य पुष्पाञ्जलिं दत्वा प्रार्थयेत्।

मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥
जानताजानतावापि न कृतं यत्तवार्चनम्।
केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽयमिति मां मत्वा क्षमस्व मधुसूदन॥ इति।

ततो नमस्कृत्य मूलमन्त्रं यथाशक्ति प्रजप्याग्नौ देवमावाह्य नित्य-होमं निर्वर्त्य मूलेन पवित्रं समर्प्य वह्निस्थदेवं प्रतिमायामुद्वास्य गुरु-समीपमागत्य गन्धवस्त्रालङ्कारादिसमर्पणपूर्वकं पवित्रं समर्प्य शक्त्या द-क्षिणां दत्वा नमस्कुर्य्यात्। ततो वैष्णवद्विजान्संपूज्य तेभ्यः पवित्राणि दत्वा याजमानपवित्रं स्वयं धृत्वा ब्राह्मणान् सम्भोज्य यथाशक्ति द-क्षिणां दत्वा बन्धुभिः सह भुञ्जीत। ततः त्रिरात्रमहोरात्रं वा देवे पवि-त्राणि धारयेत्। तावति काले ब्रह्मचारी हविष्याशी भवेत्। अभिषेक-समये पवित्राणि उत्तार्य पुनर्दद्यात्। ततो देवमभ्यर्च्य सूत्रं विसर्जयेत्।

सांवत्सरीं शुभां पूजां सम्पाद्य विधिवन्मम।
व्रजेदानीं पवित्र! त्वं विष्णुलोकं विसर्जितः॥ इति।

ततो भगवति कर्म्म निवेदयेत्। न रात्रौ हरिं स्नापयेत्। दमनक-पवित्रदानयोस्तु न रात्रावपि कुर्य्यादिति नृसिंहपरिचर्योक्तेः॥ इति पवि-त्रारोपणोत्सवः।

अथ कटदानोत्सवः।

मदनरत्ने,

भविष्योत्तरे।

प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि।
कटदानं भवेद्विष्णोर्महापूजां प्रवर्तयेत्॥ इति।

महापातकनाशनमिति नृसिंहपरिचर्य्यायां पाठः। कटदानं=वि-ष्णोः शयनस्याङ्गपरिवृत्तिकरणम्। द्वादश्यामेतदिति तु रामार्चनचन्द्रि-कायाम्।

तत्प्रयोगश्च व्रतसङ्कल्पवर्जं शयनोत्सववद् द्रष्टव्यः। सङ्कल्पे कट-

दानोत्सवं करिष्ये इति विशेषः। शेषे पर्यङ्केति मन्त्रस्थाने च—

देवदेव जगन्नाथ योगिगम्य निरञ्जन।
कटदानं कुरुष्वाद्य प्राप्ते भाद्रपदे शुभे॥

इत्युच्चार्य्य कर्णिकापरिवृत्तिं विदध्यात्। इति कटदानोत्सवः।

अथाश्विनशुक्लदशम्यां सीमातिक्रमणोत्सवः।

भविष्ये—

शमीयुक्तं जगन्नाथं भक्तानामभयङ्करम्।
अर्चयित्वा शमीवृक्षमर्चयेच्च ततः पुनः॥

स्कान्दे।

आश्विनस्य सिते पक्षे सीमातिक्रमणोत्सवम्।
दशम्यां वैष्णवः कुर्य्याद्गीतवाद्यभटैर्वृतः॥ इति।

शमीपूजनाङ्गमन्त्रश्च रामार्चनचन्द्रिकायाम्।

शमी शमयते पापं शमी लोहितकण्टकी।
धरिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥ इति।
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम्।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत्॥ इति सीमातिक्रमणोत्सवः।

अथ कार्त्तिकोत्सवः।

स्कान्दे।

कार्त्तिके नार्चितो यैस्तु भक्तियोगेन केशवः।
नरकं ते गमिष्यन्ति यमदूतैश्च मन्त्रिताः॥ इति।

विष्णुरहस्ये कार्त्तिकं प्रकृत्य—

मालतीन्दीवरैः पद्मैः कमलैश्च सुगन्धिभिः।
कुसुमोशीरकर्पूरैर्विलिप्य वरचन्दनैः॥
नैवेद्यधूपदीपाद्यैरर्चयेत्तु जनार्दनम्।
मनसा कर्म्मणा वाचा पूजयेद्गरुडध्वजम्॥
कुर्यात् तदीयस्तवनं वृहद्भक्तिजितेन्द्रिय। इति।

रात्रिचतुर्थभागे च गानादिना जागरणं निर्वर्त्य स्नात्वा किञ्चि-त् व्रतं विधेयमित्युक्तं—

रामार्चनचन्द्रिकायाम्।

कार्त्तिके पश्चिमे यामे तव गीतं करोति यः।
वसते वै स वैकुण्ठे पितृभिः सह नारद॥
नीराजयेत्ततः स्नायाद्विधिना तुष्टये हरेः।
व्रतं चरेत्तथा किञ्चित्कुर्य्यात्कर्ममहिमानकम्॥ इति कार्त्तिकोत्सवः।

अथ भगवत्प्रबोधोत्सवः।

मदनरत्ने ब्राह्मे।

एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवम्।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥ इति।

तत्रैव भविष्योत्तरे।

कार्त्तिके शुक्लपक्षस्य एकादश्यां पृथासुत।
मन्त्रेणानेन राजेन्द्र देवमुत्थापयेद् द्विजः॥

मन्त्रः—

ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दित वन्दनीय।
बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव॥
इयञ्च द्वादशी देव प्रबोधार्थं सुनिर्मिता।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना॥
उत्तिष्ठोत्तिष्ठ गोविन्द नारायण जगत्पते।
त्वयि सुप्ते जगत्सुप्तमुत्थिते चोत्थितं जगत्॥ इति।

वाराहे।

कुमुदस्य च मासस्य भवेद् या द्वादशी शुभा॥ इति प्रकृत्य·
कृत्वा ममैवं कर्माणि द्वादश्यां तत्र माधवि॥
ममैवाराधनार्थाय इमं मन्त्रमुदीरयेत्।

मन्त्रः—

"ब्रह्मणा रुद्रेण च स्तूयमानो भवानृषिवन्दितो वन्दनीय प्राप्ता द्वादशीयं ते प्रबुध्यस्व जाग्रस्व मेघाः गताः पूर्णश्चन्द्रः शारदानि पुष्पाणि लोकनाथ तुभ्यमहं ददानि" इति। रामार्चनचन्द्रिकायामपि द्वादशीविधानाद्वादश्युक्ता, "अथ कार्त्तिकशुक्लार्के" इत्यादिना। एवञ्च वाराहेऽपि विस्पष्टं द्वादशीविधानाद्भविष्योत्तरवाराहमन्त्रवर्णाच्च तत्सङ्कीर्त्तनात्सकलशिष्टाचाराच्च द्वादश्यामेव प्रबोधोत्सवः। अन्यथा भविष्योत्तर एकादशीविधानात्तत्र तत्करणे तत्रत्यमन्त्रवर्णस्यासमवेतार्थता स्यात्। एकादशीवद् द्वादश्या अपि विहितत्वेनात्यन्तं बाधायोगात्, अष्टदोषदुष्टविकल्पापत्तेश्च। तस्मादेकादशीश्रवणं तत्र लौकिकोपकल्पनाभिप्रायं बहुश्रुत्यनुरोधेन व्याख्येयम्। "सह सोमौ क्रीणात्यभिषेचनीयदशपेययोः" इतिवाक्यगतक्रीणातिरिवावभृथदीक्षादिश्रुत्यनुरोधेन क्रयोपकल्पनपरः (१)। उक्तञ्च नृसिंहपरिचर्य्यायामेतत् "एकादश्यामुपोषितः समाहितो वा भूत्वा द्वादश्यां नक्तं शयनोत्थापनव्रतं कुर्य्यादिति वचनद्वयार्थो व्याख्येयः, तदाकाशं वायुं सृष्ट्वा तेजोऽसृजतेतिवत्' इति। तस्माद् द्वाद·

(१) स्पष्टं चेदं पूर्वमीमांसैकादशाध्यायद्वितीयपादगतचतुर्दशाधिकरणे।

इयामेवायमनुष्ठेयः ।

अथ प्रयोगः ।

शयनोत्सववज्जलाशयं गत्वा सङ्कल्पपर्यन्तं विधाय प्रबोधोत्सवं कुर्व इति सङ्कल्प्य तद्वदेव सम्पूज्य भविष्यमन्त्रेण वाराहमन्त्रेण वेदं विष्णुरिति मन्त्रयुक्तेन, वादित्रघोषैश्च जलतल्पादुत्थाप्य तीरे समुपवेश्य महानुग्रहं प्रार्थयेत् ।

सोऽसावदभ्रकरुणो भगवान्प्रवृद्ध
प्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ।
उत्थाय विश्वविजयाय च नो विषादं
माध्व्या गिरापनयतात्पुरुषः पुराणः ॥ इति ।

ततः पुष्पाञ्जलिं निवेदयेत् ।

गता मेघा वियच्चैव निर्मलं निर्मला दिशः ।
शारदानि च पुष्पाणि गृहाण मम केशव ॥ इति ।

"आपो वा इदमासं सलिलमेव" इत्यनुवाकं जप्त्वा पञ्चामृताभिषेकपूर्वकं पुरुषसूक्तेनाभिषिच्य नीराज्य न्यासपूर्वकं गन्धादिभिर्महापूजां कृत्वा कर्पूरेण नीराज्य साक्षतजलमादाय प्रतिमासव्रतानि निर्दिश्य भगवानेतैः प्रीयतामिति भगवति निवेद्य "जयजय जह्यजाम्" इति वेदस्तुत्या स्तुत्वा-

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे
आवेश्यतां नो मतिरप्यहैतुकी ॥

इत्याशिषः प्रार्थ्य गीतादिघोषैर्भगवन्तं रथ आरोप्य जयजयस्वनपूर्वकं पञ्चोपचारैः सम्पूज्याशिषः प्रार्थयेत् ।

युक्तः शैब्यादिवाहैर्मधुमधुररणत्किङ्कणीजालमाले
रत्नौघैर्मौक्तिकानामविरलमणिभिः सम्भृतश्चैव हारैः ।
हैमैः कुम्भैः (१)पताकाशिवतरवचिभिर्भूषितः केतुमुख्यै
रुक्मैश्चक्रैश्चशब्दो दुरितहरहरेः पातु चैत्रो रथो वः ॥
पलायध्वं पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढो नृकेशरी ॥ इति ।

ततो भगवत्प्रसादमालामादाय ब्रह्मादिभिराकृष्यमाणरथं परिभाव्य स्वयं वैष्णवैः सहाकर्षणं कुर्वन्पुरमध्ये रथं भ्रामयेत् ।

(१) शिवतरुचिभिरिति अन्यत्र पाठः ।

यथोक्तं रामार्चनचन्द्रिकायाम् ।

नृत्यैर्वाद्यैर्भागवतैः घण्टावाद्यजयध्वनैः ।
भ्रामयेत्स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥
रथेन सह गच्छन्ति पुरतः पृष्ठतोऽग्रतः ।
महाविष्णुसमा ह्येते भवन्त्यश्वमेधा अपि ॥ इति ।

स्वस्वगृहागतश्च देवः सर्वैः पूज्यः ।

येषां गृहागतो याति रथस्थः श्रीनृकेसरी ॥
पूजा तैस्तैः प्रकर्तव्या वित्तशाठ्यविवर्जितैः ।

इति तत्रैव वचनात् । ततश्च स्वगृहागमनादि शयनोत्सववत्कार्यम् । इति बोधनोत्सवः ॥

अथ जयन्तीसंक्षेपः ।

मत्स्योऽभूद् धुतभुग्दिने मधुसिते, कूर्मो विधौ माधवे,
वाराहो गिरिजासुते नभसि, यद् भूते सिते माधवे ।
सिंहो, भाद्रपदे सिते हरिदिने श्रीवामनो, माधवे
रामो गौरितिथावतः परमभूद्रामो नवम्यां मधाः ॥
कृष्णोऽष्टम्यां नभसि च परे चाश्विने यद्दशम्यां
बौद्धः, कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण ॥ इति ।

हुतभुग्दिनं=प्रतिपत्(१) । विधुः=दशमी । गिरिजासुतः=चतुर्थी । भूतं=चतुर्दशी । हरिदिनं=द्वादशी । गौरीतिथिः=तृतीया ।

तत्रार्घ्यमन्त्राः ।

सत्यव्रतोपदेशाय जिह्ममीनशरीरधृक् ।
प्रलयाब्धिकृतावास गृहाणार्घ्यं नमोऽस्तु ते ॥
धृतवान् कूर्मरूपेण मन्दरं क्षीरसागरे ।
स्वभक्तरक्षणपरो गृहाणार्घ्यं नमोऽस्तु ते ॥
ब्रह्मनासिकसम्भूत शङ्खचक्रगदाधर ।
वराहरूप देवेश गृहाणार्घ्यं नमोऽस्तु ते ॥
कश्यपादितिसम्भूत वटुरूपि जगद्गुरो ।
कृपया देवदेवेश गृहाणार्घ्यं नमोऽस्तु ते ॥
जमदग्निसुतो वीर क्षत्रियान्तकर प्रभो ।

---

(१) एतेनात्र हुतभुग्दिनं तृतीयेति केषांचिद्व्याख्यानं न सयुक्तिकम् । अग्निवाचकेन हुतभुक्शब्देन त्रित्वलक्षणाद्वारा तृतीयायां लक्षितायां लक्षितलक्षणास्यादतस्तदपेक्ष्याऽग्निदेवत्यतया प्रसिद्धायाः प्रतिपद एव षष्ठीसमासेन ग्रहीतुमुचितमिति व्यक्तमिति विभावनीयम् ।

गृहाणार्घ्यं मया दत्तं कृपया परमेश्वर ॥
दानवानां विमोहाय महामोहस्वरूपधृक् ।
गृहाणार्घ्यं मया दत्तं दीनबन्धो नमोऽस्तु ते ॥
भूभारोत्तारणार्थाय संबलग्रामसम्भव ।
गृहाणार्घ्यं मया दत्तं कल्किने परमात्मने ॥ इति ।

अर्घ्यदानं च षोडशोपचारैः सम्पूज्य तत्तज्जन्मकाले विधेयम् । जन्मकालास्तु--

अह्नो मध्ये वामनो रामरामौ
मत्स्यः क्रोडश्चापराह्ने विभागे ।
कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णो रात्रौ कालसाम्ये च पूर्वा ॥ इति जयन्त्युत्सवाः ।

अथार्चननिर्णयः ।

अर्चनं पूजा । सा चाभ्युदयनिःश्रेयसहेतुरिति तत्र तत्रोक्तम् । श्रीभागवते तावत् ।

एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ।
अर्चन्नुभयतः सिद्धिमत्तो विन्दत्यभीप्सितम् ॥ इति ।

तथार्चनं प्रकृत्य--

एतद्वदन्ति मुनयो मुहुर्निःश्रेयसं नृणाम् ।
नारदो भगवान् व्यास आचार्योऽङ्गिरसः सुतः ॥ इति ।
एतत्कमलपत्राक्ष कर्मबन्धविमोचनम् । इति च ।

बृहन्नारदीये ।

शिवपूजापरो वापि विष्णुपूजापरोऽपि वा ।
यत्र तिष्ठति तत्रैव लक्ष्मीः सर्वाश्च देवताः ॥ इति ।
यत्र पूजापरो विष्णोस्तत्र वह्निर्न बाधते ।
राजापि तस्करो वापि व्याधयश्च न सन्ति हि ॥
प्रेताः पिशाचाः कूष्माण्डा ग्रहा बालग्रहास्तथा ।
डाकिन्यो राक्षसाश्चैव न बाधन्तेऽच्युतार्चकम् ॥ इति ।

तथा ।

मनोहरैश्च गन्धैश्च पुष्पैश्च सुमनोहरैः ।
अभ्यर्च्य विष्णुमीशं वा तत्तत्सारूप्यतां व्रजेत् ॥ इति ।
शङ्करस्याथवा विष्णोर्घृतयुक्तश्च गुग्गुलम् ।
दत्वा धूपं नरो भक्त्या सर्वपापैः प्रमुच्यते ॥ इति च ।
तिलतैलान्वितं दीपं विष्णोर्वा शङ्करस्य वा ।

दत्त्वा नरः सर्वकामान् सम्प्राप्नोति नरोत्तम ॥
घृतेन दीपं यो दद्याच्छङ्करायाथ विष्णवे ।
स मुक्तः सर्वपापेभ्यो गङ्गास्नानफलं लभेत् ॥
यथाविहितमं भोज्यं तत्तदीशाय विष्णवे ।
दत्त्वा तु तत्पदं याति चत्वारिंशत्कुलान्वितः ॥ इति ।

कौर्मेऽपि ।

एष देवो महादेवः सदा संसारभीरुभिः ।
ध्येयः पूज्यश्च वन्द्यश्च ज्ञेयो लिङ्गे महेश्वरः ॥
येऽर्चयिष्यन्ति मां नित्यं भक्त्या कलियुगे द्विजाः ।
विधिना वेददृष्टेन ते गमिष्यन्ति तत्पदम् ॥
नार्चयन्ति हरे रूपं शिवं ये श्रुतिनोदितम् ।
तेषां दानं तपो यज्ञो वृथा जीवितमेव च ॥ इति ।

नरसिंहपुराणेऽपि ।

ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजादयः ।
सम्पूज्य तं सुरश्रेष्ठं भक्त्या सिंहवपुर्धरम् ॥
मुच्यन्ते चाशुभैर्दुःखैर्जन्मकोटिसमुद्भवैः ।
सम्पूज्य तं सुरश्रेष्ठं प्राप्नुवन्त्यभिवाञ्छितम् ॥ इति ।

शालग्रामार्चने फलविशेषो नृसिंहपरिचर्यायाम्—

स्कान्दे ।

शालग्रामशिलालिङ्गे यः करोति समर्चनम् ॥
तेनार्चितं कार्तिकेय ! युगानामेकसप्ततिः ॥ इति ।

लिङ्गपुराणेऽपि ।

गन्धमाल्यार्घ्यनैवेद्यैः शालग्रामशिलार्चनम् ।
कुरुते मानवो यस्तु कलौ भक्तिपरायणः ॥
कल्पकोटिसहस्राणि रमते सन्निधौ हरेः ॥ इति ।

अन्यान्यपि पूजास्थानान्युक्तानि—

श्रीभागवते । (स्कन्ध० ११ अ० २७ श्लो० ९)

अर्चायां स्थण्डिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया ॥ इति ॥

अथ प्रयोगः । ब्राह्मे मुहूर्ते उत्थाय श्रीगोविन्दं स्मृत्वा—
प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतमदवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥

प्रातर्नमामि वचसा मनसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः।
नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य ॥
प्रातर्भजामि भजतामभयङ्करं तं प्राक्सर्वजन्मकृतपापभयापहत्यै।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोरशोकप्रणाशमकरोद् घृतशङ्खचक्रः ॥
प्रातः स्मरामि दधिघोषविनीतनिद्रं निद्रावसानरमणीयमुखारविन्दम्।
हृद्यानवद्यवपुषं नवकञ्जनाभमुन्निद्रपद्मनयनं नवनीतचोरम् ॥

इति पठित्वा शौचदन्तधावनमुखप्रक्षालनानि विधाय भगवन्तं ध्यात्वा तत्पादोदकं धारयित्वात्मीयां तनुं शुद्धां विचिन्त्य तीर्थं गत्वा परमेश्वरप्रीतये स्नानादिकं करिष्ये इति सङ्कल्प्य स्वगृह्योक्तस्नानं विधायाचान्तः, "अस्त्राय फट्" इत्यस्त्रमन्त्रेणाभिमन्त्र्यास्त्रेणैकभागेनाङ्गानि प्रक्षाल्य भागान्तरेण सर्वदेहमालिप्य तीर्थे निमज्ज्याचम्य यथाशक्त्यावर्त्योन्मज्याचम्य हुंमन्त्रेणाङ्कुशमुद्रया तीर्थमावाहयेत्; गङ्गायां नेति केचित्। भागान्तरे जले विलाङ्ग्याष्टदलमालिख्य तत्र देवमालिख्य तत्र देवमावाह्य पञ्चोपचारैरभ्यर्च्य शक्तितो मूलमन्त्रेणाघमर्षणं कृत्वा "कृष्ण मां पावय" इति निमज्य "पूतोऽस्मि" इत्युन्मज्य मूलेन कुम्भमुद्रया स्वात्मानमभिषिञ्चेत्।

दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु।
सावकाशामेकमुष्टिं कुर्य्यात् सा कुम्भमुद्रिका ॥

ततो जलेनोर्ध्वपुण्ड्रं विधाय "कृष्णं तर्पयामि" इति त्रीनञ्जलीन् क्षिप्त्वा पूर्ववत् संपूज्य पञ्चाङ्गानि सन्न्यस्य हृदि देवमुद्वास्य तटमागत्य द्विराचम्यास्त्रभृशुद्धे वस्त्रे परिधाय द्विराचम्य दश तिलकान् मृदा कुर्य्यात् "केशवाय नमः" इति ललाटे प्रथमं, स च दशाङ्गुलः कार्य्यः। "दशाङ्गुलप्रमाणं तदुत्तमोत्तममुच्यते" इत्यादित्यपुराणात्। अन्यान्यपि परिमाणान्तराणि ग्रन्थान्तरोक्तानि यथाचारं कर्तव्यानि। "नारायणाय नमः" इत्युदरे "माधवाय नमः" इति हृदि। "गोविन्दाय नमः" इति कण्ठे। "विष्णवे नमः" इति दक्षिणकुक्षौ। "मधुसूदनाय नमः" इति दक्षिणबाहौ। "त्रिविक्रमाय नमः" इति दक्षिणकर्णे। "वामनाय नमः" इति वामकुक्षौ। "श्रीधराय नमः" इति वामबाहौ "हृषीकेशाय नमः" इति वामकर्णे "पद्मनाभाय नमः" इति अपरभागे। "दामोदराय नमः" इति कटौ। तदिदं तिलकधारणं नित्यम्।

यागो दानं जपो होमः स्वाध्यायः पितृतर्पणम्।
भस्मीभवति तत्सर्वमूर्ध्वपुण्ड्रं विना कृतम् ॥

इति मदनपरिजाते मत्स्यपुराणवचनात्। ततो वैदिकीं सन्ध्यां कृत्वा मूलेन त्रिवारं मार्जनमष्टाविंशतिवारं तर्पणं रविमण्डलस्थदेवाय द्वादशवाराऽर्घ्यप्रदानं दशवाराभिमन्त्रितजलपानञ्च कृत्वा सूर्य्यादीन्नमस्कृत्य पूजामन्दिरं गच्छेदित्युक्तं मन्त्रप्रकाशिकायां विद्यारण्यैः। अथ धौताङ्घ्रिचरण आचान्तो देववेश्मनि सम्मार्जनोपलेपनाङ्कणप्रोक्षणानि स्वस्तिकादीनि च कुर्य्यात्। एतन्माहिमा—

बृहन्नारदीये।

देवतायतने राजन् कृत्वा सम्मार्जनं नरः।
यत्फलं समवाप्नोति तन्मे निगदतः शृणु॥
यावत्यः पांशुकणिकाः सम्यक् संमार्जिता नृप!।
तावत् युगसहस्राणि विष्णुलोके महीयते॥
यस्तु देवालये राजन्नपि गोचर्ममात्रकम्।
जलेनासेचनं कुर्य्यात् तस्य पुण्यफलं शृणु॥
यावत्यः पांशुकणिका द्रवीभूता जनेश्वर।
तावज्जन्मार्जितैः पापैः सद्य एव प्रमुच्यते॥
गन्धोदकेन यो मर्त्यो देवतायतने नृप।
भक्तितः सेचनं कुर्य्यात् तस्य पुण्यफलं शृणु॥
द्रवीभूतानि यावन्ति रजांसि मनुजेश्वर।
तावद्वर्षसहस्राणि हरिसारूप्यमश्नुते॥
शिलाचूर्णेन यो मर्त्यो देवतायतने नृप।
करोति स्वस्तिकादीनि तेषां पुण्यं निशामय॥
यावत्यः कणिका भूमौ क्षिप्ता रविकुलोद्भव।
तावद्युगसहस्राणि हरिसालोक्यमश्नुते॥ इति।

वाराहेऽपि।

गृहीत्वा गोमयं देवि मम वेश्मोपलेपयेत्।
न्यस्तानि तत्र यावन्ति पतन्ति च विलिम्पतः॥
तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते।
सम्मार्जनं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे॥
यां गतिं पुरुषाः यान्ति स्त्रियो वा कर्म्मणि स्थिताः।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्जितः॥
यावन्तः पांसवो भूमेरुद्धियन्ते तु चालिताः।
तावद्वर्षशतान्याशु स्वर्गलोके महीयते॥ इति।

अथ पूजापात्राणि प्रक्षाल्य गन्धपुष्पादीन्युपकल्प्य देवस्य पुरतः

कौशाद्यासने स्थित्वा स्वपुरतः शङ्खं संस्थाप्य स्वस्य दक्षिणतो गन्धा-द्युपरतः स्वयमाहृतशुद्धजलपूर्णकुम्भमासाद्य देवस्य दक्षिणतो घृत-दीपं वामतस्तैलदीपं विधाय शङ्खघण्टानादपुरःसरं नानाद्योत्रैर्भग-वन्तं बोधयेत् । नादयोर्महिमा—

बृहन्नारदीये—

देवतायतने कुर्वन् राजन् शङ्खरवं नरः ।
सर्वपापविनिर्मुक्तो ब्रह्मणा सह मोदते ।
देवतायतने ये तु घण्टानादं प्रकुर्वते ।
तेषां पुण्यानि कथितुं कः समर्थोऽस्ति पण्डितः ॥ इति ।

वाराहे—

विना भेर्यादिशब्देन द्वारस्योद्घाटनं मम ।
महापराधं जानीयात् द्वात्रिंशन्तं(१) मम प्रिये ॥ इति ।

आदिशब्देन शङ्खादि । उद्घाटनं नामात्रप्रबोधो विवक्षितः । तत्र

(१) अत्र भेर्यादिशब्दं विना देवद्वारोद्घाटनस्यैकत्रिंशत्वेन महापराधस्य च द्वा-त्रिंशत्तमत्वेन ग्रहणादन्येषामाकाङ्क्षिततया पूजायां सर्वैः सर्वथा हेयतया चेतरेऽपि त्रिंश-दपराधा भक्तजनसौकर्यायात्र समावेशिताः, ते च यथा वाराहपुराणे ११७ अध्याये—वराह उवाचेत्युपक्रम्य उक्ताः—

प्रथमं चापराधानां न रोचेत मम प्रिये ।
भुक्त्वा तु परकीयान्नं तत्परस्तन्निवर्तनः ॥
द्वितीयस्त्वपराधोऽयं धर्मविघ्नाय वै भवेत् ।
गत्वा मैथुनसंयोगं योनुमां स्पृशते नरः ॥
तृतीयमपराधन्तु कल्पयामि वसुन्धरे ।
दृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ॥
चतुर्थमपराधन्तु इदं नैव क्षमाम्यहम् ।
स्पृष्ट्वा तु मृतकञ्चैव ह्यसंस्कारकृतं तु वै ॥
पञ्चमञ्चापराधं च न क्षमामि वसुन्धरे ।
दृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम् ॥
षष्ठं तं चापराधं वै न क्षमामि वसुन्धरे ।
ममार्चनस्य काले तु पुरीषं यस्तु गच्छति ॥
सप्तमं चापराधन्तु कल्पयामि वसुन्धरे ।
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते ॥
अष्टमं चापराधं च कल्पयामि वसुन्धरे ।
ममैवार्चनकाले यस्त्वसमं वै प्रभाषते ॥

वापराधप्रायश्चित्तप्रकरणे "भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत्" इत्युक्तेः । स्तोत्राणि तु—

शौरे जागृहि जागृहि क्षणमपि त्वामन्तरेणाखिलं
नैव स्थातुमलं कुतः सुखफलं भुञ्जीत विश्वं विभो ।
तेनोत्तिष्ठ कृपाविशिष्ट निलय स्वां दृष्टिमुन्मीलय
त्रैलोक्योपरि तां प्रसारय हरे ! पीयूषधारामिव ॥
श्रीजाने जगदीश जागृहि जय त्रैलोक्यमालोक्यतां
देवेश स्वदृशा विलोकय तया पीयूषसम्पूर्णया ।
सावद्यानि किञ्चिदेव कुटिला सत्ता समालम्बतां

नवमं चापराधं तं न शोचामि वसुन्धरे ।
अविधानं तु यः स्पृश्य मामेव प्रतिपद्यते ॥
दशमश्चापराधोऽयं मम चाप्रियकारकः ।
क्रुद्धस्तु यानि कर्माणि कुरुते कर्मकारकः ॥
एकादशापराधं तु कल्पयामि वसुन्धरे ।
अकर्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ॥
द्वादशं चापराधं तं कल्पयामि वसुन्धरे ।
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ॥
त्रयोदशं चापराधं कल्पयामि वसुन्धरे ।
अन्धकारे च मां देवि यः स्पृशेत कदाचन ॥
चतुर्दशापराधं तु कल्पयामि वसुन्धरे ।
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ॥
अपराधं पञ्चदशं कल्पयामि वसुन्धरे ।
अधौतेन तु वस्त्रेण यस्तु मामुपकल्पयेत् ॥
षोडशान्त्यपराधानां कल्पयामि वरानने ।
स्वयमन्नं तु यो भुङ्क्त्वा यद्यज्ञानादपि माधवि ॥
अपराधं सप्तदशं कल्पयामि वसुन्धरे ।
यस्तु मात्स्यानि मांसानि भक्षयित्वा प्रपद्यते ॥
अष्टादशापराधं च कल्पयामि वसुन्धरे ।
जालपादं भक्षयित्वा यस्तु मामुपसर्पति ॥
एकोनविंशापराधं कल्पयामि वसुन्धरे ।
यस्तु मे दीपकं स्पृष्ट्वा मामेव प्रतिपद्यते ॥
विंशकं चापराधं तं कल्पयामि वरानने ।

क्व भूमितलं क चापि सलिलं कुत्रानलः कानिलः ॥ इत्यादीनि ।
ततो भगवन्तं प्रबुद्धं नीराज्य दन्तधावनं समर्प्य निर्माल्यमपसार्य पूजामारभेत । आचम्य प्राणानायम्य तिथ्यादि संकीर्त्य श्रीपरमेश्वर-प्रीत्यर्थं यथाशक्ति यथामिलितोपचारैः पूजनं करिष्य इति संकल्प्य "पृथ्वि त्वये"ति मन्त्रेण स्वस्तिकासन उपविशेत् ।
वाराहे—

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले शुभे ।
ऋजुकायो भवेद्योगी स्वस्तिकं तत्प्रचक्ष्यते ।
पुण्यं निगदितुं तस्य कः समर्थोऽस्ति पण्डितः ॥ इति ।
अपसर्पन्तु ये भूता ये भूता दिवि संस्थिताः ॥
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।

इत्युच्चार "हुं फट् , इति रक्षां दिक्षु विधाय दक्षिणतो गं गणपतये

श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते ॥
एकविंशापराधं तं कल्पयामि वसुन्धरे ।
पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति ॥
द्वाविंश चापराधं तं कल्पयामि प्रिये सदा ।
यस्तु वाराहमांसानि प्रमादेणोपपादयेत् ॥
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे ।
सुरां पीत्वा तु यो मर्त्यः कदाचिदुपसर्पति ॥
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ।
यः कुसुम्भं च मे शाकं भक्षयित्वोपचक्रमे ॥
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे ।
परप्रावरणेनैव यस्तु मामुपसर्पति ॥
अपराधेषु षड्विंशं कल्पयामि वसुन्धरे ।
नवान्नं यस्तु भक्ष्येत न देवान् न पितॄन् यजेत् ॥
सप्तविंशं चापराधं कल्पयामि गुणान्विते ।
उपनाह्रौ च प्रपदे तथा यां च गच्छति ॥
अपराधं त्वष्टविंशं कल्पयामि गुणान्विते ।
शरीरं मर्दयित्वा तु यो मामाप्नोति माधवि ॥
एकोनत्रिंशापराधो न स स्वर्गेषु गच्छति ।
अजीर्णेन समाविष्टो यस्तु मामुपगच्छति ॥
त्रिंशकं चापराधं तं कल्पयामि यशस्विनि ।
गन्धपुष्पाण्यदत्वा तु यस्तु धूपं प्रयच्छति ॥ इति ।

नमः । दुं दुर्गायै नमः । सं सरस्वत्यै नमः । क्षं क्षेत्रपालाय नमः । इति नमस्कृत्य वामतो गुरुपरम्परां नमेत् । यथासम्प्रदायं वामतोऽस्त्रमन्त्रेण पाणी शोधयित्वा तालत्रयं विधाय चक्राय स्वाहा अङ्गुष्ठाभ्यां नमः । विचक्राय स्वाहा तर्जनीभ्यां नमः । सुचक्राय स्वाहा मध्यमाभ्यां नमः । त्रैलोक्यरक्षणचक्राय स्वाहा अनामिकाभ्यां नमः । असुरान्तकचक्राय स्वाहा कनिष्ठिकाभ्यां नमः । इत्यङ्गुलिन्यासं कृत्वा एवमेव हृदयादिन्यासं कुर्यात् । आचक्राय स्वाहा हृदयाय नमः । इति अङ्गुष्ठरहिताधःकराङ्गुलिभिर्हृदि, विचक्रायस्वाहा शिरसे स्वाहेति एताभिरेव शिरसि, सुचक्रायस्वाहा शिखायै वषट् इति अधोऽङ्गुष्ठमुष्टिना शिखायां, त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुमिति व्यस्तकरद्वयाङ्गुलिभिर्वर्मणि, असुरान्तकचक्रायस्वाहा अस्त्राय फडिति अङ्गुष्ठेन मध्यमाङ्गुलित्रयं संपीड्य सरलया तर्जन्या वामाङ्गुष्ठमूलमास्फालयेदिति पञ्चाङ्गन्यासं कृत्वाचार्यो मूलमन्त्रन्यासं कुर्यात् । ततः तद्विष्णोः परमं पदमिति मूलमन्त्रेण च कलशमभिमन्त्र्य कर्पूरादिना तुलसीदलैश्च संस्कृत्य तदुदकेन शङ्खमुक्तमन्त्राभ्यामापूर्य गन्धपुष्पतुलसीदलैः संस्कृत्योक्तमन्त्राभ्यामभिमन्त्र्य तज्जलं पात्रे गृहीत्वा तुलसीदलैरात्मानं वस्त्रादिभिर्विभूषितं देवासनं पूजाङ्गानि च पात्रगन्धादीनि मूलमन्त्रेण प्रोक्ष्य पाद्यार्घ्यं त्रीणि पात्राणि कलशोदकेनापूर्य पाद्यार्घ्यपात्रयोर्गन्धपुष्पतुलसीदलानि आचमनीयपात्रे लवङ्गादिसुगन्धिद्रव्याणि तुलसीदलानि च निक्षिप्य "हृदयाय नमः" "शिरसे स्वाहा" "शिखायै वषट्" इति मन्त्रैर्यथाक्रममभिमन्त्र्य गायत्र्या मूलमन्त्रेण च सर्वाण्यभिमन्त्रयेत् । ततो भूतशुद्धिप्राणप्रतिष्ठे कुर्यात् । ते, इत्थम्, वामनासापुटे धूम्रवर्णं "यम्" इति वायुबीजं ध्यायन् षोडशवारं च जपन् वायुमापूर्यापूरणेन च प्रलयकृद्वायोरिवामुष्य वृद्धिं शोषणशक्तिं च विचिन्त्य चतुःषष्टिवारं जपन् कुम्भकं कृत्वा प्रतिबद्धवायुना स्वतनुव्याप्तिशोषणे ध्यात्वा द्वात्रिंशद्वारं जपन् दक्षिणनासापुटेन रेचयेत्। ततो दक्षिणपुटे "रम्" इत्यग्निबीजमरुणं लीनमारुतं ध्यायन् पूर्ववदापूर्य वृद्धिदाहशक्ती प्रलयाग्निवत् विचिन्त्य पूर्ववत्कुम्भकं कृत्वा तेनाग्निना स्वतनुदाहं ध्यात्वा वामनासापुटेन ध्यानभ—सहवायुं पूर्ववत् । ततो वामनासापुटे "टम्" इति चन्द्रबीजं शुक्लं ध्यायन् अमृतैक्यं विचिन्त्य पूर्ववज्जपन् पूरकं कुर्वन् ललाटचन्द्रं ब्रह्मरन्ध्रापरपर्यायं प्रति नीत्वा "वम्" इति जपन् पूर्ववत् कुम्भकं कुर्वन् नीतबीजाद्गलितसौधधारया सर्ववर्णमय्या दग्धदेहमाप्लाव्य तत्तद्वर्णस्थानयुतं दिव्यदे-

हमुत्पन्नं विचिन्त्य पूर्ववत् दक्षिणनासया रेचनं कृत्वा "लम्" इतिबीजेन देहकाठिन्यं "हम्" इति सुषिरोत्पत्तिं ध्यायेत् । ततः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हं सः सोऽहम् ।

मम प्राणा इह प्राणा मम जीव इह स्थितः ।

मम सर्वेन्द्रियाणि मनो बुद्धिरहङ्कारश्चित्तं पृथिव्यप्तेजोवाय्वाकाशशब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा, सोऽहं हंसः हौं हं सं षं शं वं लं रं यं क्रों ह्रीं आमोमिति मन्त्रेण प्राणप्रतिष्ठां कृत्वात्मानमीशाभिन्नं विचिन्त्य षोडशप्रणवावृत्तिं षोडशसंस्कारसिद्ध्यर्थं निर्वर्तयेत् ।

अथ मातृकान्यासः ॥

मातृकानां ब्रह्मर्षिर्गायत्रीच्छन्दो मातृकासरस्वतीदेवता हलो बीजानि स्वराः शक्तयः शरीरशुद्धौ विनियोग इत्युक्त्वा शिरोजिह्वाहृत्सु "ब्रह्मणे नमः" इत्येवमृषिच्छन्दोदेवताः क्रमेण विन्यस्य अं कं खं गं घं ङं आं हृदयाय नमः । इं चं छं जं झं ञं ईं शिरसे स्वाहा । उं टं ठं डं ढं णं ऊं शिखायै वषट्, एं तं थं दं धं नं ऐं कवचाय हुम्, ओं पं फं बं भं मं औं नेत्रत्रयाय वौषट्, अं यं रं लं वं शं षं सं हं क्षं अः अस्त्राय फट् । इति षण्मन्त्रैरङ्गुष्ठादिकनिष्ठान्ताङ्गुलीषु करतलकरपृष्ठयोश्च विन्यस्य तैरेव यथामन्त्रलिङ्गं हृदादिष्वपि न्यसेत् ।

अथ मातृकादेवतां ध्यायेत् ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो
देशां भास्वत्कपर्दाकलितशशिकला(१)मिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरीं(२) त्र्यक्षरां पद्मसंस्था
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥ इति ।

ततः कण्ठे षोडशमातृका अ इत्याद्या न्यसेत् । हृदये क इत्याद्या द्वादश । नाभौ ड इत्याद्या दश । लिङ्गे ब इत्याद्याः षट् । आधारे व इत्याद्याश्चतस्रः । भ्रुवोर्मध्ये हक्षौ । ॐ नमः सर्वत्रादौ योज्यम् ।

ॐ नमः इति तु न्यास आन्तरः परिकीर्तितः ।

इति गौतमीतन्त्रोक्तेः । इत्यन्तर्मातृकान्यासः ।

(१) कपर्दाकलितशशिकलमिति मेरुतन्त्रे पाठः ।
(२) लिखितकरतलामिति मेरुतन्त्रे पाठः ।

अथ बहिर्मातृकान्यासः ।

अथ प्रणवादिनमोन्तानेतान् भालमुखनयनश्रवणनासागण्डौष्ठदन्तपङ्क्तिद्वयेषु मूर्धरसनयोश्च विन्यस्य दक्षिणबाहोर्मूलमध्यमणिबन्धाङ्गुलिमूलाग्रदेशेषु कवर्गं, वामबाहुसन्धिषु तेष्वेव चवर्गं विन्यसेत्। दक्षिणपादस्योरुमूलजानुचरणमध्याङ्गुलिमूलाग्रदेशेषु च टवर्गमेतेषु एव वामपादसन्धिषु तवर्गं, पार्श्वद्वयपृष्ठनाभ्युदरेषु च पवर्गं विन्यस्य हृद्दक्षिणांसककुद्वामांसेष्वन्तस्थान् न्यसेत् । बाहुद्वयपदद्वययोः शषसहान् हृदयमारभ्य विन्यस्योदराननयोर्लक्षौ न्यसेत्। सर्वत्र प्रणवादिनमोन्तत्वे "आद्यात्"इति क्रमदीपिकोक्तेः। एतानेव वर्णान् सानुस्वारान् "ॐ क्षं नमः"इत्येवं प्रातिलोम्येनोक्तेषु भालादिस्थानेषु विन्यस्य ॐ अः नमः, इत्येवं सविसर्गान् अकारादीन् न्यसेत्, पुनः अः नम इत्यादि यथास्थानं न्यस्त्वा अं नम इत्यादि यथास्थानं न्यस्त्वा अं नम इत्यादिगं तं यथास्थानं सोभया ? न्यसेत् । इति मातृकान्यासः ॥

अथ केशवादिन्यासः ॥

अमुष्य प्रजापतिर्ऋषिः, गायत्रीछन्दः, लक्ष्मीनारायणो देवता देहशुद्धौ विनियोगः । ऋष्यादिन्यासाङ्गन्यासौ पूर्ववत् ।

ध्यानम्—

> उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं
> पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् ॥
> नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं
> विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिम् ॥

आकल्पाः=आभरणानि यस्य तं, दरः=शङ्खः ।

इति ध्यात्वोक्तस्थानेषु यथाक्रममेतान्मन्त्रान् न्यसेत् । अं केशवाय कीर्त्यै नमः । एवमुत्तरत्रापि सानुस्वारतत्तद्वर्णादित्वनमोन्तत्वे । नारायणाय कान्त्यै, माधवाय तुष्ट्यै, गोविन्दाय पुष्ट्यै, विष्णवे धृत्यै, मधुसूदनाय शान्त्यै, त्रिविक्रमाय क्रियायै, [वामनाय दयायै, श्रीधराय मेधायै, हृषीकेशाय हर्षायै, पद्मनाभाय श्रद्धायै, दामोदराय लज्जायै, वासुदेवाय लक्ष्म्यै, सङ्कर्षणाय सरस्वत्यै, प्रद्युम्नाय प्रीत्यै, चक्रिणे जयायै,] गदिने दुर्गायै, शार्ङ्गिणे प्रभायै, खड्गिने सत्यायै, शङ्खिने चण्डायै, हलिने वाण्यै, मुसलिने विलासिन्यै, शूलिने विजयायै, [पाशिने विरजायै] अङ्कुशिने विश्वायै, मुकुन्दाय विनदायै, नन्दजाय सुनन्दायै, नन्दिने स्मृत्यै, नराय ऋद्ध्यै, नरकजिते समृद्ध्यै, हरये

शुद्ध्यै, कृष्णाय बुद्ध्यै, सत्याय भुक्त्यै, सात्वताय मत्यै, शौरये क्षमायै, शूरवराय रमायै, जनार्दनायोमायै, भूधराय क्लेदिन्यै, विश्वमूर्तये क्लिन्नायै, वैकुण्ठाय वसुदायै, इति पञ्चवर्णानाम् ।

त्वगात्मने पुरुषोत्तमाय वसुधायै, असृगात्मने बलिने परायै, मांसात्मने बलानुजाय परायणायै, मेद आत्मने बलाय सूक्ष्मायै, अस्थ्यात्मने वृषघ्नाय संध्यायै, मज्जात्मने वृषाय प्रज्ञायै, शुक्रात्मने हंसाय प्रभायै, प्राणात्मने वराहाय निशायै, शक्त्यात्मने विमलाय अमोघायै, क्रोधात्मने नरसिंहाय विद्युतायै, इति यादीनाम् ।

अमुष्य च न्यासस्य ओमिति बीजादित्वं फलविशेषजनकं ताराग्रहाणामिव "शुक्राग्राद् गृहीतप्रजाकामः" इति वाक्यविहितं शुक्राग्रत्वम्। फलविशेषस्तूक्तः क्रमदीपिकायाम् । "समुपैत्य रमां प्रथीयसीं पुनरन्ते हरितां प्रजत्यसौ" । इति केशवादिन्यासः ।

मं नमः पराय जीवात्मने नमः। भं नमः पराय नारायणात्मने नमः। इति द्वाभ्यां सकलवपुषि न्यसेत् । एवमुत्तरत्रापि सानुस्वारप्रतिलोमवर्णोक्तिः । परायेतिपदं, नमः शब्दद्वयं च ज्ञेयम् । मत्यात्मनेऽहङ्कारात्मने मन आत्मने, इति त्रिभिर्हृदि न्यसेत् । शब्दात्मने स्पर्शात्मने रूपात्मने रसात्मने गन्धात्मने, इति पञ्चभिः शिरोमुखहृदयगुह्याङ्घ्रिषु । श्रोत्रात्मने त्वगात्मने चक्षुरात्मने जिह्वात्मने घ्राणात्मने, इति यथालिङ्गं श्रोत्रादिषु, वागात्मने हस्तात्मने पादात्मने पाय्वात्मने उपस्थात्मन इति वागादिषु, आकाशात्मने, वाय्वात्मने, अग्न्यात्मने, जलात्मने पृथिव्यात्मने, इति मूर्धमुखहृल्लिङ्गपादेष्विति पञ्चवर्णानां शं हृत्पुण्डरीकात्मने हं द्वादशकलसूर्यमण्डलात्मने, सं षोडशकलचन्द्रबिम्बात्मने, रं दशकलवह्निबिम्बात्मने, इति चतुर्भिर्हृदि, वं परमेष्ठ्यात्मने वासुदेवाय, यं पुरुषात्मने सङ्कर्षणाय, हं विश्वात्मने प्रद्युम्नाय, वं निवृत्त्यात्मने अनिरुद्धाय, लं सर्वात्मने नारायणायेति पुनर्मूर्धादिषु कुक्षौ कोपतत्त्वात्मने नृसिंहायेति सर्वदेहे ॥ इति तत्त्वन्यासः ।

अथ प्राणायामः ।

षोडशवारं बीजं जपन् दक्षिणनासापुटे च वायुं विरेच्य द्वात्रिंशद्वारं जपन् वामेन तेनापूर्य चतुःषष्टिवारं जपन् कुम्भकं कुर्यादिति क्रमदीपिकायामुक्तं "रेचयेन्मारुतम्" इत्यादिना ।

गौतमीतन्त्रेऽपि,

प्राणायामं चरेन्मन्त्री रेचपूरककुम्भकैः ॥ इति ।

पूरकादित्थं शारदामते । ततः स्वशरीरे पीठन्यासः, प्रणवादिनमोन्तान् मन्त्रान् न्यसेत् सर्वत्र । ॐ आधारशक्त्यै नमः, मूलप्रकृत्यै, कूर्माय, अनन्ताय, पृथिव्यै क्षीरसमुद्रायेति मूलाधारमारभ्योर्ध्वोर्ध्वं श्वेतद्वीपाय रत्नमण्डपाय कल्पवृक्षायेति हृदि, दक्षिणांसे धर्माय वामांसे ज्ञानाय वामोरुमूले वैराग्याय दक्षिणोरुमूले ऐश्वर्य्यायेति पीठपादाः । मुखे अधर्माय, वामपार्श्वे अज्ञानाय, नाभौ अवैराग्याय, दक्षिणपार्श्वे अनैश्वर्यायेति गात्राणि । ततः पीठमध्ये हृदि सम्पूर्णमब्जं विचिन्त्य तद्दलेषु अं अर्कमण्डलाय, उं सोममण्डलाय, मं वह्निमण्डलाय इदं त्रयं केसरेष्विति, श्रीभागवते श्रीधरस्वामिनः । कर्णिकायाम् आं आत्मने, अं अन्तरात्मने, पं परमात्मने, ह्रीं ज्ञानात्मने, तत्रैवाष्टासु पूर्वादिदिक्षु मध्ये च विमलायै, उत्कर्षण्यै, ज्ञानायै, क्रियायै, योगायै, प्रह्व्यै, सत्यायै, ईशानायै, अनुग्रहायै, कर्णिकायामेव ॐ नमोभगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नम इति । एवं पीठं सम्पूज्य तत्र जपाकुसुमारुणं प्रणवं ध्यात्वा तत्कर्णिकायां नित्यानन्दचित्प्रकाशममूर्तं श्रीगोपीजनवल्लभं सञ्चिन्तयेत् ।

अथ करयोर्मन्त्रन्यासं कुर्य्यात् ।

स यथा श्रीदशाक्षरस्य नारद ऋषिर्विराट्छन्दः श्रीकृष्णो देवता अमितिबीजं स्वाहेति शक्तिः कृष्णः प्रकृतिर्दुर्गाधिष्ठात्रीदेवता मन्त्रन्यासे विनियोग इत्युच्चार्य्य शिरसि नारदाय ऋषये नमः, रसनायां विराट्छन्दसे नमः, हृदि श्रीकृष्णदेवतायै नमः, गुह्ये अमिति बीजाय नमः । पादयोः स्वाहेतिशक्त्यै नमः । इति विन्यस्य करतलकरपृष्ठकरपार्श्वेषु प्रणवसम्पुटितमूलमन्त्रं न्यसेत् । ततः ॐ गों ॐ नम इति इत्येवं दशाक्षराणि दक्षिणाङ्गुष्ठप्रभृतिवामाङ्गुष्ठान्तकराङ्गुलीनामन्त्यपर्वसु विन्यस्य दक्षिणाङ्गुलिदक्षिणकनिष्ठान्तासु वामाङ्गुष्ठादिवामकनिष्ठान्तासु च तथैव न्यसेत् । पुनस्तथैव वामाङ्गुष्ठादिदक्षिणाङ्गुष्ठान्तासु न्यस्य सानुस्वाराणि दशाक्षराणि नमोन्तानि दक्षिणाङ्गुष्ठादिवामकनिष्ठान्तासु विन्यस्य आचक्रायस्वाहेत्यादिपूर्वोक्ताङ्गपञ्चकन्यासं विधाय बीजसम्पुटितमातृकाभिः पुरोदितमातृकास्थानेषु विन्यस्य दशतत्वन्यासं तनुयात्, गों नमः पराय मज्जात्मने मआत्मा? इति गुह्यहृदास्यशिरःसु, अहङ्कारात्मने महत्तत्त्वात्मने, इति हृदि, प्रकृत्यात्मने पुरुषात्मने परमात्मने, इति सर्वाङ्गे, तत एतेष्वेव स्थानेषु विपरीतैर्विपरीतवर्णयुक्तैस्तैरेव मन्त्रैर्विन्यस्य मूर्धादिपादान्ते वपुषि प्रणवपुटितमूलमन्त्रेण

व्यापकन्यासं कराभ्यां विधायामुष्याद्यवर्णं मूर्धनि मध्यमाङ्गुल्या न्यसेत् तर्जन्यान्वितयानया द्वितीयं नेत्रयोः, अङ्गुष्ठरहितसर्वाङ्गुलिभिः तृतीयं श्रोत्रयोः, अङ्गुष्ठानामिकाभ्यां चतुर्थं नासयोः, सर्वाभिः पञ्चमं मुखे, अङ्गुष्ठतर्जनीभ्यां षष्ठं हृदि, अङ्गुष्ठमध्यमाभ्यां सप्तमं नाभौ, अङ्गुष्ठहीनाङ्गुलिभिरष्टमं गुह्ये, ताभिरेव नवमं जान्वोः, सर्वाभिर्दशमं पादयोः, सर्वत्र प्रणवपुटितत्वम्। ततोऽनयैव विधयाग्रिमाक्षरपञ्चकं, अग्रिमस्थानपञ्चके विन्यस्याद्यवर्णपञ्चकमाद्यस्थानपञ्चके न्यसेत्, पुनर्विपरीताक्षराणि विपरीतस्थानेषु न्यसेत्, तदिदं दशाक्षराणां न्यासत्रयं क्रमेण सृष्टिस्थितिसंहृतिरिति यतिवानप्रस्थयोरमुना क्रमेण भवति गृहस्थस्य संहृतिः सृष्टिः स्थितिरिति स्थितिसंहृतिः सृष्टिरिति ब्रह्मचारिणः।

अथ विभूतिपञ्जरन्यासः।

आधारे गुह्ये नाभौ हृदि गले मुखे अंसयोरूर्वोर्दशाक्षराणि सानुस्वाराणि नमोन्तानि न्यसेत्, पुनरेवमेव कण्ठे नाभौ कुक्षिद्वये हृदि स्तनयोः पार्श्वयोरपरगले श्रोणिद्वये न्यस्त्वा शिरस्यास्येऽक्ष्णोः श्रुत्योर्नसोः कपोलयोश्च विन्यस्य पूर्वोक्तेषु करपरसन्ध्यग्रेषु न्यसेत्, पुनः कराङ्गुलिषु पादाङ्गुलिषु च न्यस्त्वा शिरसि तदीयप्राच्यादिचतुर्दिक्षु तस्मिन्नेव सकले दोष्णोः सक्थ्नोश्च न्यसेत् पुनर्मूर्धनेत्रद्वयमुखकण्ठहृदयोदरनाभिमूलगुह्यजानुद्वयप्रपदद्वयेषु विन्यस्य श्रोत्रद्वयगण्डद्वयांसद्वयस्तनद्वयपार्श्वद्वयकटिद्वयोरुद्वयजानुद्वयजङ्घाद्वयाङ्घ्रिद्वयेषु न्यसेत्। तदेवं दश दशाक्षरावृत्तयः संपद्यन्ते। प्रत्यावृत्ति च व्यापकन्यासो विधेयः।

अथ मूर्तिपञ्जरन्यासः।

ॐ अं कृष्णवर्णाय केशवाय कीर्त्यै धात्रे नम इति भाले। नं आं कनकवर्णाय नारायणाय कान्त्यै अर्यम्णे नम इति उदरे। ॐ मों श्यामवर्णाय माधवाय तुष्ट्यै मित्राय नम इति हृदि। भं ईं कर्पूरवर्णाय गोविन्दाय पुष्ट्यै वरुणाय नम इति कण्ठमूले। गं उं रक्तवर्णाय विष्णवे धृत्यै अंशवे दक्षिणपार्श्वे। वं ऊं धूम्रवर्णाय मधुसूदनाय शान्त्यै भगाय नम इति दक्षिणभुजमूले। तें एं हरितवर्णाय त्रिविक्रमाय क्रियायै विवस्वते नम इति गलदक्षिणभागे। वां ऐं पिङ्गलवर्णाय वामनाय दयायै इन्द्राय नम इति वामपार्श्वे। सुं ओं अभ्रवर्णाय श्रीधराय मेधायै पूष्णे नम इति वामभुजमूले। दें औं चित्रवर्णाय हृषीकेशाय हर्षायै पर्जन्याय नम इति गलवामभागे। वां अं पाण्डुरवर्णाय

पद्मनाभाय भद्रायै त्वष्ट्रे नम इति पृष्ठे । यं भः अञ्जनवर्णाय दामोदराय लज्जायै विष्णवे नम इति ककुदि । अथ द्वादशाक्षरं मूर्ध्नि न्यस्य पूर्वोक्तमार्गं दशाक्षराणां न्यासद्वयं विधाय सानुस्वाराद्य मूनि चतुर्थ्यन्तानि हृन्मूर्धशिखाकवचास्त्रपार्श्वद्वन्द्वकटिपृष्ठमूर्धशब्दयुतान्येष्वेव स्थानेषु विन्यस्याचक्राद्यङ्गपञ्चकन्यासमृष्यादिन्यासं च कृत्वा यथोपदेशं शङ्खचक्रगदापद्मकौस्तुभवनमालाश्रीवत्सवेणुमुद्रा दर्शयेत् । नमः सुदर्शनाय "अस्त्राय फट्" इत्युक्त्वास्त्रमुद्रया दशदिशां बन्धनं कृत्वा श्रीकृष्णं ध्यायेत् ।

फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ॥
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥ इति ।

अथ चिन्तितभगवतः स्वात्मनोऽभेदं विचिन्त्य पूर्वोक्तपीठस्थमीश्वरं—

स्वागतं देवदेवेश सन्निधौ भव केशव ।
गृहाण मानसीं पूजां यथार्थैः परिभाविताम् ॥

इति संप्रार्थ्य मानसैर्निर्दोषैः षोडशोपचारैरर्चयेत् । अत्र शङ्खपूजनादि कृत्वा हृत्स्थं देवं प्रतिमादावावाह्य बाह्यपूजा कार्येत्यागमविदः । भूतशुद्धेः पूर्वं शङ्खस्थापनाद्यर्घ्यादिपात्राभिमन्त्रणान्तं कार्यमिति तु श्रीभागवते । अथ—

महानीलनीलाभमत्यन्तबालं गुडास्निग्धवक्रान्तविस्रस्तकेशम् ।
अलिव्रातपर्य्याकुलोत्फुल्लपद्मप्रमुग्धाननं श्रीमदिन्दीवराक्षम् ।

इति देवं ध्यात्वा कुसुमपूरितमञ्जलिं विधाय हृदि पूजितां भगवन्मूर्तिं मूलमन्त्रेणाञ्जलिगतां विभाव्य मूलेन "सहस्रशीर्षा" इति मन्त्रेण च ब्रह्मरन्ध्रेण शालग्रामेतरं बाह्यमूर्त्यादावावाहनमुद्रया योजयेत् ।

हस्ताभ्यामञ्जलिं बध्वाऽनामिकामूलपर्वणोः ।
अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा ह्यावाहने स्मृता ॥

अनयैव ह्यधोमुख्या स्थापनमुद्रया स्थाप्योच्छ्रिताङ्गुष्ठसंयुक्तमुष्टिद्वयरूपसन्निधापनमुद्रया सन्निधाप्यान्तर्निविष्टाङ्गुष्ठसंयुतमुष्टिद्वयात्मकसन्निरोधनमुद्रया सन्निरुध्योत्तानमुष्टियुगलरूपसम्मुखीकरणमुद्रया सम्मुखं कुर्यात् । अथ हेमरूप्याद्यन्यतमधातुमयं दारुमयं वा चतुष्पादमासनं पुरतः स्थाप्य तस्मिन्नुक्तप्रकारेणाधारशक्त्याद्यनुग्रहान्ता देवताः संपूज्य पीठमन्त्रेण पुष्पाञ्जलिं तत्र दद्यात् । तत आ चक्रायेत्यादि

चतुरङ्गुल्यासं ज्वालाचक्राय स्वाहा नेत्रत्रयाय वौषडिति नेत्रन्यासमसु-
रान्तकाय स्वाहा अस्त्राय फडित्यस्त्रन्यासञ्च मूर्तौ कृत्वा "अतो देवे"ति
षड्चं तेष्वेव स्थानेषु विन्यस्योपकल्पितमासनं "पुरुष एवेदं सर्व"मिति
मन्त्रेण च कृष्णाय नम इत्यन्तेन भगवते समर्प्य तत्रासीनमूर्तेर्निर्गतमा-
वरणगणं स्वस्वस्थान उपवेशयेत्। ततः पीठगताष्टदलकमलस्य पूर्वा-
दिदिक्षु ॐ दामाय नमः। सुदामाय नमः। वसुदामाय नमः। किङ्कणये नमः।
इति चतस्रो देवताः। एवमग्रे प्रणवादिनमोन्तत्वं हृदयाय शिरसे शिखायै क-
वचायेति केशरेष्वग्न्यादिकोणेषु नेत्रत्रयायेति पुरतः, अस्त्रायेति पूर्वादिचतु
र्दिक्षु इत्यङ्गावरणं; वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धायेति पूर्वादि-
दलचतुष्टये, शान्त्यै श्रियै सरस्वत्यै रत्यै इत्याग्नेयादिदलचतुष्टये, इति-
वासुदेवाद्यावरणं, तद्बहिरर्जुनायानिरुद्धायोद्धवाय दारुकाय विष्वक्से-
नाय सात्यकये नारदाय पर्वतायेत्यष्टदिक्षु, गरुडायेति पुरतः इति पा-
र्षदावरणम्। इन्द्रनिधये नीलनिधये मुकुन्दाय मकराय आनन्दाय कच्छ-
पाय शङ्खनिधये पद्मनिधये, इति पूर्वावरणेभ्यो बहिरष्टदिक्षु इति निध्या-
वरणं, तद्बहिरिन्द्राग्नियमवायुवरुणनिर्ऋतिकुबेरेशानान् लोकपालान्
विदिक्षु पूर्वेशानादिक्रमध्ये ब्रह्माणं पश्चिमनिर्ऋत्योरन्तः शेषं वज्रशक्तिद-
ण्डखड्गपाशध्वजगदात्रिशूलान् क्रमेण दिक्पालसन्निधावुपवेशयेत् इति
अष्टमावरणम्। एतान्यावरणानि गोपालतापिन्युक्तानि। अथ सपरिवारा-
य भगवते "एतावानस्य" इति मन्त्रेण मूलेन चासादितपाद्यं निवेद्य "त्रि-
पादूर्ध्व" इति मन्त्रेण मूलेन चार्घ्यं समर्प्य "तस्माद्विराड्" इति मूलेन
च कृष्णाय नमः सुखेत्यन्तेनाचमनीयं दत्वा मधुपर्कञ्च तावन्मूलेनैव
समर्प्य पूर्ववत् पुनराचमनीयं दत्वा सुगन्धतैलैरभ्यज्य सुगन्धद्रव्यैरुन्म-
र्दनं विधाय पञ्चामृतैरभिषिच्योष्णोदकैः संस्नाप्य शुद्धतीर्थोदकैः
शङ्खेन घण्टां वादयानोऽभिषेचयेत्। तत्र मन्त्राः--

श्रीभागवते।

स्वर्णघर्मानुवाकेन महापुरुषविद्यया।
पौरुषेणापि सूक्तेन सामभी राजनादिभिः॥ इति।

[श्रीभा० स्क० ११ अ० २७ श्लो० ३१]

स्वर्णघर्मानुवाकः=सुवर्णं घर्मं परिवेदवेनम्। इन्द्रस्यात्मानं दशधा-
चरन्तम्। अन्तःसमुद्रे मनसा चरन्तं। ब्रह्मान्वविन्दद्दशहोतारमर्णे।
अन्तः प्रविष्टः शास्ता जनानाम्। एकः सन् बहुधा विचारः। शतं शुक्रा-
णि यत्रैकं भवन्ति। सर्वे वेदा यत्रैकं भवन्ति। सर्वे होतारो यत्रैकं भव
न्ति। समानसीन आत्मा जनानाम्॥१॥ अन्तः प्रविष्टः शास्ता जनानां

सर्वात्मा । सर्वाः प्रजा यत्रैकं भवन्ति । चतुर्होतारो यत्र संपदं गच्छन्ति देवैः । समानसीन आत्मा जनानां । ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां । दिव आत्मानं सवितारं बृहस्पतिं । चतुर्होतारं प्रदिशोनुक्लृप्तं । वाचो वीर्यं तपसान्वविन्दत् । अन्तः प्रविष्टं कर्तारमेतम् । त्वष्टारं रूपाणि विकुर्वन्तं विपश्चिम् ॥२॥ अमृतस्य प्राणं यज्ञमेतं । चतुर्होतृणामात्मानं कवयो निचिक्युः । अन्तः प्रविष्टं कर्तारमेतं । देवानां बन्धुं निहितं गुहासु । अमृतेन क्लृप्तं यज्ञमेतं । चतुर्होतृणामात्मानं कवयो निचिक्युः । शतं नियुतः परिवेदविश्वाविश्ववारः । विश्वमिदं वृणाति । इन्द्रस्यात्मा निहितः पञ्चहोता । अमृतं देवानामायुः प्रजानाम् ॥३॥ इन्द्रं राजानं सवितारमेतम् । वायोरात्मानं कवयो निचिक्युः । रश्मिं रश्मीनाम्मध्ये तपन्तं । ऋतस्य पदे कवयो निपान्ति । य आण्डकोशे भुवनं बिभर्ति । अनिर्भिण्णः सन्नथ लोकान् विचष्टे । यस्याण्डकोशं शुष्ममाहुः प्राणमुल्बम् । तेन क्लृप्तोमृतेनाहमस्मि । सुवर्णं कोशं रजसा परीवृतं । देवानां वसुधानीं विराजम् ॥४॥ अमृतस्य पूर्णां तामु कलां विचक्षते । पादं षड्ढोतुर्न किलाविवित्से । येनर्तवः पञ्चधोत क्लृप्ताः । उत वा षड्धा मनसोत क्लृप्ताः । तं षड्ढोतारमृतुभिः कल्पमानम् । ऋतस्य पदे कवयो निपान्ति । अन्तः प्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः । इन्द्रस्यात्मानं शतधा चरन्तम् ॥५॥ इन्द्रो राजा जगतो य ईशे । सप्तहोता सप्तधा विक्लृप्तः । परेण तन्तुं परिषिच्यमानम् । अन्तरादित्ये मनसा चरन्तम् । देवानां हृदयं ब्रह्मान्वविन्दत् । ब्रह्मैतद्ब्रह्मण उज्जभार । अर्कं श्चोतन्तं सरिरस्य मध्ये । आयस्मिन् सप्त पेरवः । मेहन्ति बहुलां श्रियम् । बह्वश्वामिन्द्रगोमतीम ॥६॥ अच्युतां बहुलां श्रियम् । स हरिर्वसुवित्तमः । पेरुरिन्द्राय पिन्वते । बह्वश्वामिन्द्रगोमतीम् । अच्युतां बहुलां श्रियं । मह्यमिन्द्रो नियच्छतु । शतं शता अस्य युक्ता हरीणाम् । अर्वाङायातु वसुभी रश्मिरिन्द्रः । प्रमंहमाणो बहुलां श्रियम् । रश्मिरिन्द्रः सविता मे नियच्छतु ॥७॥ घृतं तेजो मधुमदिन्द्रियम । मय्ययमग्निर्दधातु । हरिः पतङ्गः पटरी सुपर्णः । दिविक्षयो नभसा य एति । स न इन्द्रः कामवरं ददातु । पञ्चारं चक्रं परिवर्तते पृथु । हिरण्यज्योतिः सरिरस्य मध्ये । अजस्रं ज्योतिर्नभसा सर्पदेति । स न इन्द्रः कामवरं ददातु । सप्त युञ्जन्ति रथमेकचक्रम् ॥८॥ एको अश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वम् । येनेमा विश्वा भुवनानि तस्थुः । भद्रं पश्यन्त उपसेदुरग्रे । तपो दीक्षामृषयः सुवर्विदः । ततः क्षत्रं बलमोजश्च जातम् । तदस्मै देवा अभिसंनमन्तु । श्वेतं रश्मिं बोभुज्यमानम् । अपां नेतारं भुवनस्य गोपाम् ।

इन्द्रं विविक्षुः परमे व्योमन् ॥९॥ रोहिणीः पिङ्गला एकरूपाः । क्षरन्तीः पिङ्गला एकरूपाः । शतं सहस्राणि प्रयुतानि नाम्यानाम् । अयं यः श्वेतो रश्मिः । परिसर्वमिदं जगत् । प्रजां पशून् धनानि । अस्माकं ददातु । श्वेतो रश्मिः परिसर्वं बभूव । सुवन्मह्यं पशून् विश्वरूपान् । पतङ्गमक्तमसुरस्य मायया ॥१०॥ हृदा पश्यन्ति मनसा मनीषिणः । समुद्रे अन्तः कवयो विचक्षते । मरीचीनां पदमिच्छन्ति वेधसः । पतङ्गो वाचं मनसा बिभर्ति । तां गन्धर्वो वदद्गर्भे अन्तः । तां द्योतमानां स्वर्यं मनीषां । ऋतस्य पदे कवयो निपान्ति । ये ग्राम्याः पशवो विश्वरूपाः । विरूपाः सन्तो बहुधैकरूपाः । अग्निस्तां अग्रे प्रमुमोक्तु देवः ॥११॥ प्रजापतिः प्रजया संविदानः । वीतं स्तुकेस्तुके । युवमस्मासु नियच्छतं । प्रप्रयज्ञपतिं तिर । ये ग्राम्याः पशवो विश्वरूपाः । विरूपाः सन्तो बहुधैकरूपाः । तेषां सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । य आरण्याः पशवो विश्वरूपाः । विरूपाः सन्तो बहुधैकरूपाः ॥१२॥ वायुस्तां अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः । इडायैः सृतं घृतवच्चराचरम् । देवा अन्वविन्दन्गुहाहितम् । य आरण्याः पशवो विश्वरूपाः । विरूपाः सन्तो बहुधैकरूपाः । तेषामारण्याना(१)मिहरन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥१३॥ इति ।

१ १ १ ३र २र ३र २र
राजनम्=हुम ॥ ३ ॥ हो । ३ । ह ऽ । ३ । ओहा । ३ ॥ औहोयि । २ ।
३र २र २ १ २ १ २र ३ ४ ५ २ १ १ र
औहोयि । इन्द्रजरो । मे ३ मयि । ताहवन्तायि । इन्द्रं० । ३ ॥ वयो-
२ १ १ र २र १ २र २ १र २ १ २ ^ ३
वृहत् । ३ । विप्राछ्ये । विधर्मणे । ३ । यत्पारियाः । युनज । तायथि-
४ ५ २ १र २ १ र १ २र १र
यस्ताः । यत्पा० । ३ । सत्य मोजः । ३ । रजः सुवः । ३ । शूरोनुवा
२ ३ २ ३ ४र ५ २ १ र २ १ र १ र
ता ३ भव । सश्चकामायि । ३ । भद्रं ऽ सुधा । २ । भद्रं ऽ सुवं । पमूः
१ र २र १र २ १र २र ३ ४ ५
जंम् । २ । इषमूर्जम् । २ । आ गोमतायि । व्रजेभ । आतुवनाः । ३ ।
२ १ २ १ २ १ २ १ २ २ १र र र
वृहद्यशाः । ३ । विविद्वे ३ हस् । २ । विविद्वे ३ । हाउवा । वागीडा-
र र र २ ३ १ १ १ १
सुवोवृहन्नाः २ ३ ४ ५ : ॥ १ ॥

२र १ २ १ २
आदित्यव्रतोक्तम्=रौहिणम् । हाऊ । ३ । आयिही । ३ । आायेहिया । ३
१ २ १ २ १ २ १ र र
आसाउ । ३ । आयाम् । ३ । मामाः । ३ । किट् । २ । इन्द्रजरो मे मयि-

(१) सप्तानामिति पाठः ।

ताहवा २ म्नायि । यत्पाद्यार्युनज तेधिया २ स्ताः । शूरो नृषाताश्रव-
सश्च का २ मायि । आगोमतिव्रजभजात्वा २ बाः । मना २ ३ होयि ।
प्राणा २ ३ होयि । चक्षू २ ३ होयि । श्रोत्रा २ ३ ४ होयि । घोषा २ ३
होयि । व्रता २ ३ ४ होयि । भूता । २ ३ ४ होयि । पाना २ ३ ४ होयि ।
चित्ता २ ३ ४ होयि । धीता २ ३ ४ होयि । सुवा २ ३ होयि । ज्योता २ ३
हो २ । वा २ ३ ४ औ होवा । ऊ २ ३ ४ ५ ॥ २ ॥

महापुरुषविद्या तु—

जितं ते पुण्डरीकाक्ष ! नमस्ते विश्वभावन ।
सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज ॥ इति ।

पूर्ववदाचमनीयं समर्प्य वस्त्रेण गात्रमार्जनं कुर्यात् । "तं यज्ञ"मितिमन्त्रेण मूलेन च क्षौमे वाससी परिधाप्यावरणदेवताभ्यो वासांसि दत्वा गायत्र्या च मनः समर्प्य "तस्मात् यज्ञात् सर्वहुतः सम्भृतम्" इति मूलेन चोपवीतं समर्प्य मूलेनैवालङ्काराभिवेद्य वेणुवनमालाश्रीवत्सकौस्तुभान् समर्प्य तानि च तत्तन्नाम्ना गन्धपुष्पैरभ्यर्च्य पादुके भगवते दत्वा सपरिवाराय भगवते "तस्माद्यज्ञात् सर्वहुत" इति ऋचा मूलेन च चन्दनागुरुकर्पूरपलात्मकं गन्धं शङ्खस्थतुलसीदले गृहीत्वा कनिष्ठयाभिनिवद्य कुङ्कुमाक्षतांस्तदुपरि दत्वा "तस्मादश्वा अजायन्ते"ति मूलेन च पुष्पाणि समर्प्य निर्मलकोमलद्वययुतहरिततुलसीमञ्जरीसमर्पणं मूलमन्त्रेण कुर्यात् । तादृशमञ्जर्यभावे कोमलदलैर्यादृशदलैरपि पूजां तनुयात् ।

नित्यमर्चयते यो वै तुलस्या हरिमीश्वरम् ।
महापापानि नश्यन्ति किं पुनश्चोपपातकम् ॥

इति नृसिंहपरिचर्य्यायां ब्राह्मे नित्यत्वोक्तेः ।

योऽर्चयेद्धरिपादाब्जं तुलसीकोमलैर्दलैः ।
न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कदाचन ॥

इति बृहन्नारदीये केवलतुलसीदलविधेश्च ।

वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्य्युषितं पयः ।
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥

इति तत्रैव पर्युषितानामपि तुलसीपत्राणां ग्रहणोक्तेश्च ।

मञ्जरीमहिमानं स्वाह—

हारितः—

तुलसीमञ्जरीभिर्यः कुर्य्यात् हरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ॥ इति ।

ततो "यत्पुरुष"मिति मन्त्रेण मूलेन च घण्टां वादयानः प्राद्क्षिण्येन नासिकामारभ्य पादपर्य्यन्तं धूपं निवेद्य "ब्राह्मणोऽस्ये"ति मूलेन च वादयान एव सन् पादादिनेत्रान्तं दीपं दत्वा हेमादिधातुमये पात्रे शुद्धोत्तमपायसान्नं शर्करानवनीतकदलीफलदधियुतं भगवतः पुरतः संस्थाप्य तस्मिन्मनोरमाणि तुलसीदलानि निक्षिप्य मूलेनाभ्युक्ष्य धेनुमुद्रां तदुपरि कृत्वा तदामृतप्लावितमन्नं विभावयेत् ।

वामाङ्गुलीर्दक्षिणानामङ्गुलीनाञ्च सन्धिषु ।
प्रवेश्य मध्यमाभ्यां तु तर्जन्यौ द्वे प्रयोजयेत् ।
कनिष्ठे द्वेऽनामिकाभ्यां युञ्ज्यात् सा धेनुमुद्रिका ॥

ततः "चन्द्रमा मनस" इति मन्त्रेण मूलेन च निवेदयामि भवतोजुषाणेदं हविर्हर इति च भगवते समर्प्यापोशानं दत्वा वामकरे विकचोत्पलसन्निभां ग्रासमुद्रां दर्शयन् प्राणाय स्वाहेत्यादि षड्मन्त्रानुच्चारयन् शुद्धाः प्राणादिमुद्रा दर्शयेत् ।

स्पृशेत्कनिष्ठोपकनिष्ठिके द्वे स्वाङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ।
तथापरा तर्जनिमध्यमे स्यादनामिकामध्यमिके च मध्या ॥
अनामिकातर्जनिमध्यमा स्यात् तद्वच्चतुर्थी सकनिष्ठिकास्ताः ।
स्यात्पञ्चमी तद्वदितिप्रदिष्टा प्राणादिमुद्रा निजमन्त्रयुक्ताः ॥

ततो जवनिकामन्तर्धाय मूलमन्त्रं होमसंख्याद्विगुणसंख्यावर्त्तयन् एवं ध्यायेत् ।

लोकानां परिशिक्षणाय भगवान्निर्वर्त्य नित्यं विधिं
रुक्मिण्या परिवेषणे विरचिते पात्रीषु हैमीष्वथ ।
सिद्धान्नं सुरसं सुधासमाधिकं भुङ्क्ते स्म पङ्क्तौ मुदा
देवव्यानकदुन्दुभिप्रभृतिभिर्मान्यैः सहान्यैरपि ॥ इति ।
बिभ्रद्वेणुं जठरपटयोः शृङ्गवेत्रे च कक्षे ?
वामे पाणौ मसृणकवलं तत्फलान्यङ्गुलीषु ।
तिष्ठन् मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः
स्वर्गे लोके मिषति बुभुजे यज्ञभुक् बालकेलिः ॥ इति च ।

अथ जवनिकामपसार्य कर्पूरादिसंस्कृतं शीतलजलं शुद्धपात्रेण निवेद्योत्तरापोशानं दत्वा विष्वक्सेनाय किञ्चिदुच्छिष्टमुद्धृत्य गण्डूषा-

पर्यं जलं निवेद्य गायत्र्या पुनराचमनं समर्प्य नैवेद्यं दक्षिणत उद्वास्य करोद्वर्त्तनीयं दत्वा "नाभ्या आसी"दिति मन्त्रेण मूलेन च सकर्पूरं ताम्बूलं समर्पयेत्। "ताम्बूलं शशिसंयुत"मिति गौतमीतन्त्रोक्तेः। ततो नीराजनं मूर्धनि कुर्यात्। यथोक्तं—

बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवाग्रतः।
कुर्यादारात्तिकं यस्तु कल्पकोटिदिवं वसेत्॥
नीराजनं च यः पश्येत् देवदेवस्य चक्रिणः।
सप्तजन्म भवेद्विप्रो ह्यन्ते च परमं पदम्॥ इति।
कर्पूरेण च यः कुर्यात् भक्त्या केशवमूर्धनि।
आरात्तिकं मुनिश्रेष्ठ प्रविशेद्विष्णुमव्ययम्॥ इति च।

ततो विष्णुसूक्तैर्मूलमन्त्रेण नमो महद्भ्यो नमो अर्भकेभ्य इत्यूचा च पुष्पाञ्जलिं दद्यात्। ततो वेदस्तुत्या स्तुत्वा दण्डवत् प्रणम्य "सप्तास्या-स"दिति मूलेन च प्रदक्षिणां कुर्यात्। तन्महिमा चोक्तो गौतमीतन्त्रे।

सप्तद्वीपां धरां दत्वा वेदविद्भ्यो महामुने।
यत्फलं लभते भक्त्या कृत्वा कृष्णप्रदक्षिणाम्॥ इति।

अथादर्शच्छत्रचामरादिसमर्पणगीतनृत्यादिभिर्भगवन्तं [सन्तोष्ये]-तः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत् कृतं तत्सर्वं ब्रह्मार्पणम् भवतु स्वाहा मां मदीयं च सकलं हरये सम्यगर्पये ॐ तत्सदिति मन्त्रेण शङ्खोदकेन स्वात्मानं सपरिवारं समर्प्य।

प्रपन्नं पाहि मामीश! भीतं मृत्युग्रहार्णवात्।

इति प्रार्थनमुद्रया प्रार्थयेत्।

प्रसृताञ्जलिकौ हस्तौ मिथः श्लिष्टौ च सम्मुखौ।
कुर्यात् स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका॥

अथ भगवद्दत्तत्वेन ध्याततत्प्रसादमञ्जलिना आदाय मूर्ध्नि निधाय जलपूर्णं शङ्खं भगवति भ्रामयित्वा तज्जलं स्वयं धारयेत्।

शङ्खस्थितं तु यत्तोयं भ्रामितं केशवोपरि।
देहलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति॥

इति वचनात्। ततो भगवत्पादाम्बु पिबेत्। यथाह—
ब्रह्माण्डपुराणे ब्रह्मा।

अपेयं च पिबेद्यस्तु भुङ्क्ते यश्चाद्यभोजनम्।
अगम्यागमनं यस्य पापाचाराश्च ये नराः।
तेऽपि पूता भवन्त्याशु हरेः पादाम्बुसेवनात्॥ इति।

अथ पादाम्बुशब्दः—पादसम्बन्धित्वेन जले यौगिकोऽङ्गीक्रियते, उत रूढः। नाद्यः, पाद्यस्यापि शालग्रामादावभावप्रसङ्गात्। नान्त्यः, पादयोरर्पणाङ्गीकारे प्रोक्षणीशब्द इव रूढ्ययोगात्, अनङ्गीकारे पादयोर्जलमिति वाक्यशेषात् यौगिकस्य पादाम्बुशब्दस्य पाद्यपरत्वासम्भवात् तस्मात् भगवदधिष्ठानशालग्रामादिसंस्पृष्टं जलं भगवत्पदस्पृष्टत्वेन भावितं पादाम्बु न तु पाद्यम्। एवञ्च "विष्णुपादोदकात् पूर्वं विप्रपादोदकं पिबेत्" इति गौतमीतन्त्रे शपः प्रयोगोऽपि युज्यते न हि स्नानान्ते विप्रपाद्यपानं विधेयं तत्पूजायाः, अकृतत्वात् इति।

पादाम्बु पीत्वा नाचमनं कार्यम्।

विष्णोः पादोदकं पीत्वा पश्चादशुचिशङ्कया।
आचामयति यो मोहात् ब्रह्महा स निगद्यते॥

इति नृसिंहपरिचर्यायां स्कान्दोक्तेः। ततः पूर्वोदितनैवेद्यद्रव्यत्वेन भावितैर्जलैरष्टाविंशतिवारं श्रीकृष्णं सन्तर्पयेत्।

अथ जपः।

उक्तविधयासनं दिग्बन्धं च विधाय गुर्वादीन्नमस्कृत्य प्राणानायम्य पूर्ववत् ऋष्यादि सङ्कीर्त्य जपं सङ्कल्प्य चक्राद्यङ्गपञ्चकन्यासौ दक्षिणाङ्गुष्ठादिवामकनिष्ठान्तासु अङ्गुलिषु दशाक्षरन्यासं नाभिकटिजानुपादमूर्धाक्षिश्रोत्रनासावक्त्रहृत्सु च दशाक्षरन्यासं विधाय भगवन्तं ध्यायेत्।

अंसालम्बितवामकुण्डलधरं मन्दोन्नतभ्रूलतं
किञ्चित् कुञ्चितकोमलाधरपुटं साचिप्रसारेक्षणम्।
आलोलाङ्गुलिपल्लवैर्मुरलिकामापूरयन्तं मुदा
मूले कल्पतरोस्त्रिभङ्गललितं ध्यायेज्जगन्मोहनम्॥ इति।

ततो रुद्राक्षपद्माक्षादिमालाभिरसंस्पृष्टाङ्गुलिपर्वभिर्वा गणयन् मन्त्रार्थं च संस्मरन् अष्टोत्तरसहस्रं मन्त्रजपं मानसं कुर्यात्। मानसासम्भवे उपांशु वाचिकमस्पष्टोच्चारणरूपं, तस्याप्यसम्भवे स्पष्टमुच्चारयेत्। अथ प्राणानायम्य चक्राद्यङ्गपञ्चकं विन्यस्य जपसाङ्गतासिद्ध्यै विष्णुनाम यथाशक्ति जप्त्वा,

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादात्सुरेश्वर॥

इति मन्त्रेण देवे जपं निवेद्य।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥

इति प्राग्वत्संहारमुद्रयावरणानि देवे लीनानि ध्यायेत् ।

अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संयोज्य परिवर्त्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्जनविधौ मता ॥

ततः कृतार्चनं भगवत्यर्पयेत् । इति प्रातः पूजा ।

एवमेव माध्याह्निकी । महानीलेत्यादिध्यानकाले तु ।

पीताम्बरं रुचिरनूपुरहारकाञ्चीकेयूरकोर्मिकटकादिभिरुज्ज्वलाङ्गम् ।
दिव्यानुलेपनपिशङ्गितमंसराजद्म्लानचित्रवनमालमनङ्गदीप्तम् ॥

वेणुं धमन्तं हरिं ध्यायेत्, अपूपादिपक्वमन्नं नैवेद्यं पायसमावितैर्जलैस्तर्पणम । त्रिसृषु पूजासु आवरणदेवताविशेषानाह क्रमदीपिकाकारः ।

तापिन्यां तु अङ्गवासुदेवादिरुक्मिण्यादिस्वशक्ति नन्दादिवसुदेवादिपार्थादिनिध्यादिवीतं यजेत् । सन्ध्यासु प्रतिपत्तिभिरुपचारैस्तेनास्याखिलं भवतीति साम्येनावरणदेवता विहिता इति नेह विशेषा उच्यन्ते । मध्याह्नपूजायां अपान्ते नित्यहोमं कुर्यात् । स, इत्थं प्राणान्तवस्यासनादिबन्धौ विधाय पञ्चाङ्गन्यासौ कृत्वा शुद्धमृन्मयचतुरस्रकुण्डं मूलेन वीक्ष्यास्त्रेण परिस्तीर्य कवचेनाभ्युक्ष्य त्रिकोणं विलिख्य रमित्यग्निं प्रतिष्ठाप्य परिसमूहनपरिस्तरणान्वाधानादिसिद्धहविरासादनान्तं स्वगृह्योक्तविधिना विधायाग्नौ पूर्वोक्तपीठं, अभ्यर्च्य पीठदेवताभ्य आज्याहुतीः पीठमन्त्रान्ते हुत्वा देवमावाह्य ध्यायेत् ।

तप्तजाम्बूनदप्रख्यं शङ्खचक्रगदाम्बुजैः ।
लसच्चतुर्भुजं शान्तं पद्मकिञ्जल्कवाससम् ॥
स्फुरत्किरीटकटककटिसूत्राम्बराङ्गदम् ।
श्रीवत्सवक्षसम्भ्राजत्कौस्तुभं वनमालिनम् ॥

इत्युक्तं भागवते । अथाज्यभागान्तं कृत्वाष्टाविंशतिवारं मूलमन्त्रेण पुरुषसूक्तेन च प्रत्यृचमाज्यप्लुतेन सिद्धान्नेन हुत्वा आवरणदेवताभ्योऽप्येकैकमवदानं दत्त्वाचमनताम्बूलादिसमर्चनत्वा साङ्गं देवमुद्वास्य पञ्चाङ्गानि न्यस्त्वा मूलेन भस्म धृत्वा देवे कर्म निवेदयेत् ॥ इति मध्याह्नपूजा ॥*॥

॥ अथ रात्रिपूजा ॥

तत्र ध्यानम्—

रात्रौ चेन्मन्मथाक्रान्तचेतसं देवकीसुतम् ।
यजेत् रासपरिश्रान्त गोपीमण्डलमध्यगम् ॥
इतरेतरबद्धकरप्रमदागणकल्पितरासविहारविधौ ।
मणिशङ्कुगमप्यमुना वपुषा बहुधाविहितस्वकदिव्यतनुम् ॥

तरुणीकुचयुग्मपरिरम्भमिलद्घुसृणारुणवक्षगतिम् ।
शिववेणुसमीरितगानपरं स्मरविह्वलितं भुवनैकगुरुम् ॥

इति । रजतपात्रेषु शृतं सशर्करं पयो नैवेद्यम् । शेषं पूर्ववत् । सायाह्ने तृतीयपूजापक्षे द्वारकायां ध्यानम् ।

सायाह्ने द्वारवत्यां तु चित्रोद्यानोपशोभिते ।
द्व्यष्टसाहस्रसंख्याकैर्भवनैरभिसंवृतः ॥

इत्यादिक्रमदीपिकोक्तेः । पायसं=नैवेद्यं । शर्करामिश्रितक्षीरभावितैर्जलैस्तर्पणम् । इति श्रीकृष्णपूजा ॥

अथैमामनुतिष्ठतोऽनुष्ठेयपुरश्चरणसंक्षेपो लिख्यते ।

वैशम्पायनसंहितायाम् ।

अस्नातस्य फलं नास्ति नचातर्पयतः पितॄन् ।
नासत्यमभिभाषेत नेन्द्रियाणि प्रबोधयेत् ॥
शयनं दर्भशय्यायां शुचिः प्रयतमानसः ।
नैकवासा जपेन्मन्त्रं बहुवस्त्राकुलो न च ॥
उपर्यधोबहिर्वस्त्रे पुरश्चरणकृत् त्यजेत् ।
स्त्रीशूद्राभ्यां न भाषेत रात्रौ जपपरो भवेत् ॥ इति ।

मन्त्रप्रकाशिकायां दशाक्षरं प्रकृत्य अस्य चतुर्लक्षजपात्पुरश्चरणं पायसेन दशांशो होम इति ।

गौतमीये तु—

दशाक्षरं मनुवरं सिद्ध्यै दशलक्षकम् ।
जप्त्वा तदन्ते होमादि विधिना कर्म्म चाचरेत् इति ।

नारदीये—

जपस्य तु दशांशेन होमः कार्यो दिने दिने ।
अथवा लक्षसम्पूर्तौ होमः कार्य्यो विपश्चिता ॥ इति ।

जपान्ते वा कार्य्यः । किं वा यस्य जपो यावत् तत्पूर्त्तौ होममाचरेदिति चन्द्रिकोक्तेः ।

प्रातरारभ्य जपथ्यं कालं मध्यन्दिनावधि ।
नैरन्तर्यविधिः प्रोक्तो न दिनं व्यतिलङ्घयेत् ।

होमासम्भवे ब्राह्मणेन तत्संख्याद्विगुणः चतुर्गुणो वा जपः कार्य्यः ।

गौतमीतन्त्रे—

ततो होमदशांशेन तर्पयेत्पुरुषोत्तमम् ।
आदौ मन्त्रं समुच्चार्य श्रीपूर्वं कृष्णमित्यपि ॥
तर्पयाम्यहमित्युक्त्वा नमोऽन्तस्तर्पणे मनुः ।
तर्पणस्य दशांशेन ह्यभिषेकं समाचरेत् ॥

कृष्णात्मानं स्वमात्मानं ध्यात्वा रश्मिसमन्वितम् ।
कुसुमं तोयमेकं च सुगन्धिपरिमिश्रितम् ।
जलाञ्जलिं समादाय मूलमुच्चार्य साधकः ॥
श्रीकृष्णमभिषिञ्चामि नम इत्यभिषेचयेत् ।
अभिषेकदशांशेन ब्राह्मणान् परितर्पयेत् ॥
विप्रभोजनमात्रेण व्यङ्गं साङ्गं भवेद् ध्रुवम् ।
यत्र भुङ्क्ते द्विजश्रेष्ठस्तत्र भुङ्क्ते हरिः स्वयम् ।
यत्र भुङ्क्ते श्रियःकान्तस्तत्र भुङ्क्ते जगत्त्रयम् ॥

इति क्रतुः ।

भक्ष्यनियमोऽपि तत्रैव ।

विष्णोर्निवेदितान्नं यत् रात्रावद्यादकुत्सयन् ॥ इति ।

नारदीयेऽपि—

मृदु सोष्णं सुपक्वञ्च कुर्यादै लघुभोजनम् ।
नेन्द्रियाणां यथा तृप्तिस्तथा भुञ्जीत साधकः ॥ इति ।

पुरश्चरणं च करिष्यन्नयुतचतुष्कं जपेद् इति क्रमदीपिकाकृतः । तत्र गोभ्यो ग्रासदानं स्नानकाले द्वादशवारमन्त्रोक्त्या मूर्ध्न्यभिषेकः, चतुर्विंशतिवाराभिमन्त्रितजलेनाऽऽचमनं तथैवाभिमन्त्रितान्नभोजनं सप्तवाराभिमन्त्रितगन्धपुष्पादिधारणं ब्रह्मचर्यं रात्रिभोजित्वञ्चेति धर्माः । अयञ्च जपो मानसपूजान्ते कार्यः, पुरश्चरणजपस्तु बाह्यपूजान्त इति भाटीकाकृतः । अष्टादशाक्षरस्य तु पूर्वजपः अयुतद्वयं लक्षपञ्चकञ्चोत्तरः, इति विशेषः । पूजायां त्वयं विशेषणय अमुष्यच्छन्दः? । क्लीमिति बीजं पूर्ववत् ऋष्यादिन्यासान्तं कृत्वा दशतत्त्वन्यासं च कृत्वा पञ्चपदैर्हृदयादिपञ्चाङ्गमन्त्रान्तैः करदशाङ्गुलीहृदयादिषु च पञ्चाङ्गन्यासं च कृत्वा मूलेन सकलशरीरे व्यापकन्यासं त्रिर्विधाय प्रथमं शिरोभालभ्रूमध्यकर्णद्वयवदनग्रीवाहृन्नाभिकटिद्वयगुह्यजानुपत्सु मन्त्राक्षराणि न्यस्त्वा नेत्रमुखहृदयगुह्यपत्सु पञ्चपदानि न्यसेत् । ततः पञ्चाङ्गन्यासमृष्यादिन्यासं च कृत्वा मूर्तिपञ्जरन्यासादि पूर्ववत् कुर्यात् । पञ्चाङ्गन्यासोऽनन्तरोक्तो ज्ञेयः । जपे तु ऋष्यादिन्यासान्ते कराङ्गुलीषु हृदयादिषु च पञ्चाङ्गन्यासं कृत्वा—

शिरोललाटदृग्द्वन्द्वश्रोत्रगण्डोष्ठजानुषु ।
कण्ठबाहुषु हृत्कुक्षिकटिगुह्योरुजानुषु ॥
अङ्घ्र्याचरणयोर्वर्णान् विन्यसेच्च यथाक्रमम् ।

अथ ध्यायेत् ।

अध्यान्मीलत्कलापद्युतिरहिरिपुपिच्छाढ्यलसत्केशजालो
गोपीनेत्रोत्पलाराधितललितवपुर्गोपगोवृन्दवीतः ॥
श्रीमद्वक्त्रारविन्दप्रतिहसितशशाङ्काकृतिः पीतवासा
देवोऽसौ वेणुवाद्यक्षपितजनधृतिर्देवकीनन्दनो वः ॥ इति ।

ततो जपं कुर्यात् । शेषं पूर्ववत् । इति मन्त्रप्रकाशिकोक्तो जपः ।

॥ इति श्रीकृष्णपूजनम् ॥

अथ संक्षेपेण रामपूजाविधिः ॥

ब्राह्मे मुहूर्ते, उत्थाय—

प्रातः स्मरामि दिननायकवंशभूषं
वेदान्तवेद्यमभयङ्कुरराजवेषम् ।
वैदेहीलक्ष्मणयुतं स्वजनाभिरामं
संसारसर्पगरलोपशमाय रामम् ॥

इत्यादिरामस्तोत्रं पठित्वा वैदिकतान्त्रिके स्नानसन्ध्ये विधाय भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासादिपीठन्यासान्तं कुर्यात् । प्राणायामो राममिति बीजेन, इतरत्रापि राम मां पावयेत्येवमूहः कार्य्यः । अथ श्रीषडक्षरं प्रणवपुटितं करतलादौ न्यस्य अस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दः श्रीरामो देवता राममितिबीजं नम इति शक्तिः, इत्युच्चार्य ऋष्यादि न्यसेत् । पूर्ववत् दक्षवामस्तनयोर्वा बीजशक्ती न्यसेत्, "दक्षवामयोस्तनयोः" इति रामतापिनीयोक्तेः । ततः करन्यासाङ्गन्यासौ तनुयात् । तद्वित्थम् । रां हृदयाय नमः, अङ्गुष्ठयोः, रीं शिरसे स्वाहा तर्जन्योः, रूं शिखायै वषट् मध्यमयोः, रैं कवचाय हुं, अनामिकयोः, रौं नेत्रत्रयाय वौषट् कनिष्ठिकयोः, रः अस्त्राय फट् करतलकरपृष्ठयोः, इति विन्यस्यैतैरेव मन्त्रैर्हृदादिषु न्यसेत् रामित्यादिषु न्यसेत् रामित्यादि षट्रेफार्या स्थाने न्यस्तानि मूलमन्त्राक्षराणि वाच्यानि ।

यथोक्तं रामपूजाकल्पे ।

अथ मूलमन्त्रस्य वर्णैर्न्यस्तैः षडङ्गकमिति ।

अथ शिरोभ्रूमध्यहृदयनाभिगुह्यपत्सु प्रणवपुटितान् नमोन्तान् षड्वर्णान् विन्यस्य त्रीणि पदानि शिरोनाभिपत्सु विन्यस्त्वा पुनः षडङ्गन्यासादिन्यासौ कृत्वा शङ्खादिमुद्रासप्तकं प्रदर्श्य धनुर्बाणकापिमुद्रा दर्शयेत् ।

मध्यमाग्रेण संपीड्य तर्जन्यग्रं तु वामतः (१) ।
अनामिकां कनिष्ठां च तस्याङ्गुष्ठेन पीडयेत् ।

---

(१) वामस्य मध्यमाग्रे तु तर्जन्यग्रं योजयेत् । इतियामलतन्त्रे पाठः ।

दर्शयेत् स्वभुजे वामे मुद्रेयं धनुषो मता।
तिर्यक्प्रसारितौ दक्षः समुष्टिर्ऋजुतर्जनिः।
बाणमुद्रेति कथिता रामसन्तोषवर्द्धिनी॥
कनिष्ठानामिकामध्याः करयोरूर्ध्वयोजिताः।
मिलिताङ्गुष्ठमूलस्थे तर्जन्यौ मारुती मता॥

अथास्त्रमुद्रयास्त्रमन्त्रेण दिग्बन्धः कार्यः, इति क्रमं केचिदाहुः।

रामार्चनचन्द्रिकाकृतस्तु—

तनुन्यासानन्तरं मूर्तिपञ्जरन्यासं किरीटन्यासमिन्द्रियन्यासं च कृत्वा ऋष्यादि विन्यस्य मन्त्राक्षराणि मन्त्राक्षरपदानि च सबीजानि न्यस्त्वा पीठन्यासं किरीटन्यासं इन्द्रियन्यासं व्यापकन्यासं च कृत्वा दिग्बन्धं कुर्यादित्याहुः।

ॐ किरीटहारकेयूरमकरकुण्डलशङ्खचक्रगदाम्भोजहस्तपीताम्बरधरश्रीवत्साङ्कितवक्षस्थलश्रीभूमिसहितस्वात्मज्योतिर्ज्योतिर्मयदीप्तिकराय सहस्रादित्यतेजसे नम इति मन्त्रं मूर्ध्नि न्यस्त्वा ध्यायेत्।

उद्यत्कोटिदिवाकराभमनिशं शङ्खं गदां पङ्कजं
चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम्।
कोटीराङ्गदहारकुण्डलधरं पीताम्बरं कौस्तुभो-
द्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे॥ इति किरीटन्यासः॥

अथेन्द्रियन्यासः।

ॐ दिग्भ्यो नमः, इति श्रोत्रयोः, वायवे, आदित्याय, वरुणाय, अश्विभ्याम्, अग्नये, इन्द्राय, विष्णवे, मित्राय, प्रजापतये, चन्द्रमसे, ब्रह्मणे, रुद्राय, क्षेत्रज्ञायेति क्रमेण त्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थमनोबुद्ध्यहङ्कारचित्तेषु, ईश्वराय इति सकलवपुषि। इतीन्द्रियन्यासः।

दिग्बन्धान्ते—

अयोध्यानगरे रम्ये रत्नमण्डपमध्यगे।
ध्यायेत् कल्पतरोर्मूले रत्नसिंहासनं शुभम्॥
तन्मध्येऽष्टदलं पद्मं नानारत्नप्रतिष्ठितम्।
तत्र श्रीरामचन्द्राख्यं ध्यायेत्तेजः परात्परम्॥
प्रकृत्या सीतया श्यामं स्थित्युत्पत्तिलयावहं(वहम्)।
देवासुरमुनीन्द्रैश्च योगिवृन्दैश्च सेवितम्॥
चतुर्भुजं शङ्खचक्रगदापङ्कजधारिणम्।
किरीटहारकेयूररत्नकुण्डलशोभितम्॥

देवतागुरुमन्त्राणां भावयेदैक्यमात्मना।

इति ध्यात्वा मानसपूजाबाह्यपूजे कुर्यात्। "ध्यानं पूजा जपश्चेति सर्वमन्त्रेष्वयं क्रमः" इति रामपूजाकल्पोक्तेः। पात्रप्रक्षालनादिनिर्माल्यापसरणान्तं पूर्ववत् विधाय चतुरस्रषट्कोणत्रिकोणानि स्वरतः कृत्वा मूलेन गन्धादिभिः सम्पूज्य तेषु त्रिपादिकां सपुष्पामालाधाय प्रक्षालितशङ्खं तत्र संस्थाप्य गन्धपुष्पाक्षतं तत्र हृन्मन्त्रेण निक्षिप्य सानुस्वारप्रतिलोमस्वाहान्तमातृकावर्णैः शुद्धोदकेनापूर्य दशकलात्मने वह्निमण्डलाय नमः, इति त्रिपादीं प्रपूज्य, अष्टादशकलात्मने सूर्यमण्डलाय नमः, इति शङ्खं सम्पूज्य, ॐ षोडशकलात्मने सोममण्डलाय नमः, इति तोयं सम्पूज्य—

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु॥

इति रविमण्डलात्तीर्थानि जलमावाह्यावाहनादिमुद्राः प्रदर्श्य स्वहृत्कमलात् श्रीहरिमावाह्य पुनस्ताः प्रदर्श्य शिखामन्त्रेण गालिनीं मुद्रां दर्शयेत्।

कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम्।
तर्जनी मध्यमानामाः संहता भुग्नवर्जिताः।
मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता॥

जलं नेत्रमन्त्रेण प्रोक्ष्य वर्ममन्त्रेणावगुण्ठ्य षडङ्गानि तत्र विन्यस्यास्त्रेण परितो दिग्बन्धं कृत्वा गन्धादि दत्वा श्रीरामरूपत्वेन ध्यात्वा अष्टवारं षडक्षरं जपन् कूर्चेनाभिमृश्य कलशे किंचिज्जलं क्षिप्त्वा तज्जलेन स्वात्मानं सकृन्मूलमन्त्रेण प्रोक्ष्य त्रिर्गन्धादि चाभ्युक्ष्य शङ्खपार्श्वयोः पाद्यार्घ्यपात्रे प्राक् पश्चाच्चाचमनीयमधुपर्कपात्रे संस्थाप्याथ त्रिषु कलशजलं गन्धादिभिः प्रपूज्य पाद्ये श्यामाकदूर्वाब्जविष्णुकान्तानि निक्षिप्यार्घ्ये कुशाग्रतिलयवदूर्वासर्षपान्, आचमनीये जातिफललवङ्गकक्कोलानि, मधुपर्के दधिमधुघृतानि क्षिप्त्वा सर्वत्र धेनुमुद्राः प्रदर्श्य पुनः स्वहृदि रामचन्द्रं मानसैरुपचारैः सम्पूज्य पूर्ववत् बहिः पीठं प्रकल्पयेत्। पीठगतप्रतिमादौ पूर्ववत् राघवमावाह्यावाहनादिमुद्राः शङ्खादिमुद्राश्च प्रदर्श्य मूलेन "दाशरथाय विद्महे सीतावल्लभाय धीमहि। तन्नो रामः प्रचोदयात्" इति रामगायत्र्या च पुष्पाञ्जलिं दत्वोक्तविधयासनादिपुष्पोपचारान्तं कृत्वा पुष्पाञ्जलित्रयं समर्पयेत्। वामदेशे श्रीसीतायै नमः, इति जानकीं सम्पूज्य, लं लक्ष्मणाय नमः, इति दक्षिणकोणाग्रिमभागे लक्ष्मणमभ्यर्च्य, दक्षिणवामपार्श्वयोः शरान् शा-

ॐ धनुषे शं शार्ङ्गाय नमः, शं शरेभ्यो नमः, इति सम्पूजयेदिति रामार्च-
नचन्द्रिकाकृतः । रामपूजाकल्पे तु हृदादिपूजानन्तरं सीतापूजनमुक्तम् ।

अथावरणपूजा ।

पूर्ववत् षडङ्गानि । प्रथमावरणं पुनः हनुमते नमः । सुग्रीवाय, भर-
ताय, विभीषणाय, लक्ष्मणाय, अङ्गदाय, शत्रुघ्नाय, जाम्बवत इति आ-
ग्नेयादिकोणदिक्षु इति द्वितीयम् । सृष्टये, जयन्ताय, विजयाय, सुराष्ट्रा-
य, राष्ट्रवर्द्धनाय, अकोपाय, धर्मपालाय, सुमन्तायेति तद्बहिर-
ष्टदिक्षु इति तृतीयम् । इन्द्रादिदिक्पालान् सायुधान् तद्बहिः पूर्वव-
दभ्यर्चयेत् इति चतुर्थम् । वसिष्ठाय, वामदेवाय, जाबालाय, गौतमाय,
भरद्वाजाय, विश्वामित्राय, वाल्मीकये, नारदाय, सनकाय, सनन्दनाय,
सनातनाय, सनत्कुमारायेति तद्बहिः इति पञ्चमम् । अनलाय, नीलाय,
सुषेणाय, मैन्दाय, शरभाय, द्विविदाय, चन्दनाय, गवाक्षायेति वानररा-
जास्तद्बहिः, इति षष्ठम् । एतानि रामपूजाकल्पोक्तानि आवरणानि, प्र-
त्यावरणं च करप्रक्षालनं देवाय गन्धदानम् ।

दयाब्धे ! त्राहि संसारसर्पान्मां शरणार्थिनम् ।
भक्त्या समर्पये त्वाहमाद्यमावरणार्चनम् ॥

इति पुष्पाञ्जलिसमर्पणं च कार्य्यम् । द्वितीयावरणार्चनमित्येवमुत्त-
रत्रोहः । दीपदाने--

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामभद्रम् ॥ इति ।

ततस्ताम्रिकहोमं निर्वर्त्य जपदशांशसङ्ख्यया तर्पणं तद्दशांशेन प्रो-
क्षणीजलेन स्वात्मनोऽभिषेचनं च कृत्वा नैवेद्यविसर्जनगण्डूषदानादिस्वा-
त्मसमर्पणान्तं निर्वर्त्य—

श्रीरामचन्द्र रघुपुङ्गव राजवर्य्य
राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन रामभद्र
दासोऽहमद्य भवतः शरणागतोऽस्मि ॥

इति प्रार्थ्य शङ्खोदकपादोदकधारणपाने विधायागस्त्यर्षिकं गाय-
त्रीछन्दस्कं लमितिबीजमन्तंनमःशक्तिकं लक्ष्मणमन्त्रं पूर्वोक्तमष्टो-
त्तरशतवारं जप्त्वा राममन्त्रस्य षट्सहस्रं जपं कुर्य्यात् ।

"एवं ध्यात्वा जपेन्मन्त्रं षट्सहस्रं हि तद्दिने" इति रामपूजाक-

न्योक्तेः । ततो देवे कर्म समर्प्य महायज्ञादि नित्यकर्म कुर्यात् । सायं सन्ध्यान्ते श्रीराममभ्यर्च्य-

बलीयसा पदा स्वामिन्पदवीमवधारयन् ।
आगच्छ शयनागारं सीतया सह राघव ॥

इति प्रार्थ्य—

पर्य्यङ्केऽकिलके प्रशस्तफलके भोगीन्द्रचित्राङ्कके
स्वच्छप्रच्छदभावुके मृदुचितस्थासोपधानादिके ।
उन्मीलत्कुलशीलया दयितया श्रीसीतया संस्कृते
शेते नित्यमगण्यपुण्यफलदः श्रीकोशलेन्द्रो नृपः ॥

इति भावयेदिति । षडक्षरमन्त्रस्य च षट्लक्षं जपस्तद्दशांशेन मधुरत्रययुतपायसेन बिल्वफलैश्च होमः, शेषं पूर्ववत् , इति पुरश्चरणम् , इति रामपूजाविधिः ।

अथ श्रीनृसिंहपूजनम् ॥

ब्राह्मे मुहूर्ते, उत्थाय—

प्रातः स्मरामि नृहरिं रमयासमेतं
शङ्खचक्रकार्मुकवराभयहस्तमीशम् ।
ब्रह्माजशम्भुशशिसूर्य्यगणेशदुर्गा-
वस्वादिदेवसहितं निजकर्णिकायाम् ॥

इत्यादिस्तोत्रं पठित्वा वैदिकतान्त्रिकस्नानादि पीठन्यासान्तं विदध्यात् । प्राणायामो"ह"मितिबीजेन । अन्यत्रापि नृसिंहतापिन्यां पावयेत्यूहः । अथास्य श्रीनृसिंहानुष्टुभमन्त्रराजस्य विधिः। ब्रह्मा प्रजापतिर्ऋषिः अनुष्टुप् छन्दः श्रीनृसिंहो देवता हामिति बीजं ईमितिशक्तिरित्युच्चार्यर्ष्यादिन्यासं कृत्वा षडङ्गन्यासं कुर्य्यात् । स इत्थं, हामादयश्चत्वार आद्या वर्णा हृन्मन्त्रः । तदग्रिमाश्चत्वारो ह्रीमादयः शिरोमन्त्रः । हूमादयोऽष्टौ शिखायाम् , हैमादयः षट् कवचे, ह्रौमादयस्तावन्तो नेत्रे, हः इत्यादयश्चत्वारोऽस्त्रे । अथवा ह्रां ह्रीं ह्रूं ह्रैं इत्यादय आनन्दात्मने मायात्मन इति चरचतुर्थ्यान्ताश्चत्वारः पादाः हृच्छिरःशिखाकवचमन्त्राः। ह्रौमादिज्वालात्मन इत्यन्तं प्रथमार्द्धं नेत्रमन्त्रः। हूमादिः सकलो ज्ञानात्मन इत्यन्तोऽस्त्रमन्त्रः, सर्वत्रान्ते नमः शब्द इति मन्त्रप्रकाशिकाकृतः।

नृसिंहतापनीये तु ।

चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति सप्रणवं सर्वं पञ्चमं भवतीत्युक्तम् । अथ करयोरङ्गुष्ठादिकयाङ्गुलीनां त्रिषु त्रिषु पर्वसु त्रिशाखस-

राणि विन्यस्य शिष्टद्वयं करतलयोर्न्यसेत् । सर्वत्र प्रणवपुटितत्वं नमोऽन्तत्वं च, ततः शिरोललाटदृङ्मुखकरपदसन्धिषु साग्रेषु· उदरहृद्गलपार्श्वे· ष्वपरे ककुदि क्रमात्, न्यसेत् वर्णान् । अपरे अपराङ्गे । अथ पादगुल्फ· जानुकटिनाभिहृद्बाहुकण्ठचिबुकोष्ठगण्डकर्णास्यनासापुटनेत्रमूर्द्धसु द्वे द्वे अक्षरे विन्यस्य मुखमूर्द्धनासाचक्षुःश्रोत्रास्यहृन्नाभिकटिजानुपत्सु पदानि न्यस्त्वा नासाग्रनेत्रश्रोत्रनाभिहृदयमूर्द्धबाहुपत्सु चत्वारि च· त्वारि अक्षराणि विन्यस्य चतुरः पादान् शिरोहृन्नाभिषु सर्वं च न्य· सेत् । ततो मूर्द्धादिहृत्पर्यन्तं पूर्वार्द्धं न्यस्त्वा पादादिहृत्पर्यन्तमुत्तरार्द्धं न्यसेत् । अथ मुखे, शिरोनासयोः नेत्रयोः श्रोत्रयोः केशरस्थाने हृदा दिनाभौ कट्यादिपर्य्यन्तं उग्रमुग्रं नमाम्यहमित्येवं नवपदानि विन्यस्यो· ग्रं वीरं नमाम्यहम् वीरं वीरं नमाम्यहमित्येवं पुनः एष्वेव स्थानेषु न्यस्त्वोग्रं नृसिंहं नमाम्यहमित्येवं पुनरेष्वेव स्थानेषु न्यसेत् । तत आद्यवर्णं मूलाधारे न्यसेत् । तदादिनाभिपर्य्यन्तं वर्णत्रयं तदादि हृत्प· र्य्यन्तं वर्णषट्कं वर्णत्रयं नेत्रत्रये द्वे शिरसि दश कराङ्गुलीषु द्वे चर· णयोः अन्त्यं सकलवपुषि । अस्य न्यासस्य हरिन्यास इति संज्ञा । एतन्माहिम्नो हरिणैव वक्तुं शक्यत्वादिति मन्त्रप्रकाशिकाकृतः । अथ पुनः षडङ्गर्ष्यादिन्यासौ कृत्वा शङ्खादिमुद्राः प्रदर्श्यास्त्र चक्रदंष्ट्राकर्णकेसरनार· सिंहमुद्रा दर्शयेत् ।

हस्तावधोमुखौ कृत्वा नाभिदेशे प्रसार्य च ।
तर्जन्यौ हस्तयोरूर्ध्वमानीयावाह्यमुद्रिका ॥
हस्तावूर्ध्वमुखौ योतद्वैसंयोज्य मध्यमे ।
वामायां नासिकायां तु दक्षिणायां विनिक्षिपेत् ॥
तर्जन्यौ पृष्ठतो लग्ने त्वङ्गुष्ठौ तर्जनीश्रितौ ।
चक्रमुद्रा भवेदेषा हरिसान्निध्यकारिका ॥
चक्रमुद्रां तथा कृत्वा तर्जनीभ्यां तु मध्यमे ।
पीडयेद्दंष्ट्रमुद्रैषा सर्वपापप्रणाशिनी ॥
हस्ताभ्यां प्रसृतिं कृत्वा कर्णमूले निधाय तु ।
प्राङ्मुखे च तथैवो कर्णमुद्रा प्रकीर्तिता ॥
मुष्टिं बध्वा तु हस्ताभ्यां तर्जन्यौ द्वौ प्रसार्य च ।
कर्णदेशे समारभ्य चालयेदूर्ध्वतस्तथा ॥
मुद्रा केशरसंज्ञैषा सर्वसम्पत्प्रदायिनी ।
जानुमध्ये करौ कृत्वा चुबुकोष्ठौ समावृतौ ॥
हस्तौ तु भुवि संलग्नौ कम्पमानः पुनः पुनः ।

मुखं विवृतकं कुर्य्याज्जिह्वा स्याच्च सुलेलिहा ॥
एषा मुद्रा नारसिंही प्रधानेति प्रकीर्तिता(१) ।
ततोऽस्त्रेण दिग्बन्धं विधाय श्रीनृसिंहं ध्यायेत् ।
तत्र शान्तध्यानम्—
आन्त्रोरासक्ततीक्ष्णस्वनखरुचिलसद्बाहुसंस्पृष्टकेश-
श्चक्रं शङ्खं च दोर्भ्यां दधदनलसमज्योतिषा भग्नदैत्यः ।
ज्वालामालापरीतं रविशशिदहनप्रेक्षणं सप्तजिह्वं
दंष्ट्रोग्रं धूमकेशं वदनमभिवहत्पातु मां नारसिंहः ॥ इति ।
अथोऽग्रध्यानम्—
उद्यद्भास्वत्सहस्रप्रममशनिनिभं श्रीक्षणैर्निष्किरन्तं
वह्निनहाय विद्युत्ततिविततसटाभीषणं भूषणैश्च ।
दिव्यदादीप्तदेहेभिशितनखलसद्बाहुदण्डैरनेकैः
सम्भिन्नं भिन्नदैत्येश्वरतनुमतनुं नारसिंहं नमामि ॥
इति ध्यात्वा "भद्रं कर्णेभिः शृणुयाम देवाः" । "स्वस्ति नऽइन्द्रो वृद्धश्रवाः" इत्येतदृद्वयमुच्चार्य्य शान्तिरिति त्रिः पठित्वा शङ्खपूजा-दिपुष्पदानान्तं विधाय देववामाङ्के रमां समभ्यर्च्यावरणदेवताः पूजयेत्। हृदादिभिराद्यावरणम् । गरुडाय नम इति पुरतः । शर्वाय, अनन्ताय-कमलासनायेति शेषदिक्षु । श्रियै ह्रियै तुष्ट्यै इति विदिक्षु इति द्विती-यम् । स्तम्भनकारिणे नृसिंहाय, वश्यकारिणे नृसिंहाय, मोहनकारिणे नृसिंहाय, विद्वेषकारिणे नृसिंहाय, उच्चाटनकारिणे नृसिंहाय, आकर्षण-कारिणे नृसिंहाय, पुष्टिप्रदाय नृसिंहाय, निधिप्रदाय नृसिंहाय, विद्याप्रदाय नृसिंहाय,इति दिक्षु,
अत्र च गुणविशेषाः ।
चक्रिणं नखिनं स्वर्णवर्णं श्यामलवाससम् ।
नृसिंहं स्तम्भितारातिं दले प्राच्चि प्रपूजयेत् ॥
धृताम्बुजगदाशङ्खचक्रं वश्यक्रियाक्षमं ।
सिन्दूरारुणमाग्नेये पूजयेदथ दक्षिणे ॥
आन्त्रमाले शङ्खचक्रे गदाखड्गौ च बिभ्रतम् ।
भिन्नदैत्योरसं कृष्णं त्रिनेत्रं मारणे क्षमम् ॥
विद्वेषोच्चाटनकरं नीलोत्पलसमान्वितम् ।
शङ्खचक्रगदालोहदण्डिनं नैर्ऋते दले ॥
प्रतीच्यां शङ्खचक्रासिपाशान्वितचतुर्भुजम् ।

(१) नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्धिनी ॥ इत्यन्यत्र पाठः ।

शक्तियुक्तं जपापुष्पसममाकर्षणक्षमम् ॥
वायवीये तु धवलं शङ्खचक्रगदाभये ।
बिभ्राणं पुष्टिदं नेत्रत्रितयालङ्कृताननम् ॥
उदीचीने नरहरिं पाञ्चजन्यसुदर्शने ।
गदानिधी च बिभ्राणं लक्ष्म्या युक्तं निधिप्रदम् ॥
विद्यामूर्तिमुदक्पूर्वे क्षीराभं पीतवाससम् ।
पाशाङ्कुशधरोद्दामुंशङ्खचक्रगदाधरम् ॥
हृत्सरोरुहमध्यस्थं चन्द्रपुञ्जसुनिर्मलम् ।
लक्ष्म्या युक्तं नारसिंहं चिन्तयेत्साधकस्तथा ॥ इति ।

उग्रं नृसिंहं नमाम्यहं स्तम्भनकारिणं नृसिंहं नमाम्यहमित्येवं पूजनमिति तृतीयम् । चक्राय खड्गाय पद्माय मुसलायेति देवदक्षिणे, शङ्खाय खेटाय गदायै शार्ङ्गायेति देववामे, इति चतुर्थम् । दक्षिणे लक्ष्म्यै श्रीवत्साय, वामे तुष्ट्यै कौस्तुभाय, मध्ये वनमालायै पीताम्बराय, ब्रह्मसूत्रायेति नाभौ, किरीटादीनि भूषणानि पुरोभाग इति पञ्चमम् । श्रद्धायै, मेधायै, भीमायै, पापायै, भयानकायै, आर्द्रायै, दीक्षायै इति, प्रागादिदिक्षु इति षष्ठम् । इन्द्रादिभिर्वज्रादिभिश्च सप्तमाष्टमे पूर्ववत् । एतानि मन्त्रप्रकाशिकोक्तानि, आवरणानि । अथ नृसिंहाष्टकपरिवृतं मध्यनृसिंहव्यूहनृसिंहशब्दाभिधेयं सपरिवारं स्तुत्यादिभिः प्रदक्षिणान्तैरुपचारैरभ्यर्च्य यथाशक्ति मूलमन्त्रं नारसिंहमुद्राप्रदर्शनपूर्वकं जपेत् । "इमां मुद्रां जपादौ च पूजान्ते चैव दर्शये"दिति नृसिंहाराधनरत्नमालोक्तेः । तान्त्रिकहोमं कृत्वा मूलेन पञ्चवारं सपरिवारनृसिंहतर्पणं विधाय नृसिंहसामभी रथन्तरादिभिस्तुत्वा गीतनृत्यादिभिर्देवं सन्तोष्य कर्म समर्पयेदिति । अनुष्टुभो नृसिंहमन्त्रस्य च पुरश्चरणात्पूर्वंजपो द्वात्रिंशत्सहस्रसंख्यः, द्वात्रिंशदयुतसंख्यः पुरश्चरणम्, तद्दशांशेन पायसहोमः । शेषं पूर्ववत् । अमुष्य द्वात्रिंशल्लक्षजपात्तु भगवान् नृसिंहः प्रत्यक्षो भवति । इति नृसिंहपूजनम् ॥

अथ शिवपूजा ॥

ब्राह्मे मुहूर्ते उत्थाय–

प्रातः स्मरामि वृषवाहनमद्रिजेशं
भस्मानुलिप्ततनुमर्धशशाङ्कभालम् ।
नागेन्द्रवेष्टितजटायुनदीं दधानं
रुद्राक्षबिल्वदलानिर्मितभूरिमालम् ॥

इत्यादिस्तोत्रं पठित्वा वैदिकतान्त्रिकस्नानान्ते त्रिपुण्ड्रधारणं कुर्या-

त् । यथोक्तं—

बृहन्नारदीये—

शिवप्रियाः शिवासक्ताः शिवपादार्चने रताः ।
त्रिपुण्ड्रधारिणो ये च ते वै भागवतोत्तमाः ॥ इति ।

कौर्मेऽपि—

सुपीतवसनाः सर्वे श्रीवत्साङ्कितवक्षसः ।

इति वैष्णवानभिधायोक्तं—

अन्ये महेश्वरपरास्त्रिपुण्ड्राङ्कितमस्तकाः ॥ इति ।

ब्रह्माण्डेऽपि—

मध्यमानामिकाङ्गुष्ठैर्ललाटे यत्त्रिपुण्ड्रकम् ।
तत्त्रिपुण्ड्रं भवेत् शस्तं महापातकनाशनम् ॥
सितेन भस्मना तिर्यक् त्रिपुण्ड्रस्य च धारणम् ।
शैवागमेषु निष्ठानां तत्तन्मन्त्रेषु शस्यते ॥ इति ।

कालाग्निरुद्रोपनिषद्यपि त्रिपुण्ड्रधारणां प्रकृत्य व्रतमेतच्छाम्भवमिति । इदं चोर्ध्वपुण्ड्रं कृत्वा विधेयम्, अदृष्टार्थयोरनयोर्नारिष्टहोमोपहोमवत्समुच्चयस्यैव युक्तत्वात्, [पू.मी.अ. १० पा. ४ अ० १ सू. १-२] उदाहृतमदनपारिजातवचनेनोर्ध्वपुण्ड्रस्यावश्यकत्वोक्तेश्च । आह च—

जाबालिः—

ऊर्ध्वपुण्ड्रं विना मोहात् यदि कुर्यात् त्रिपुण्ड्रकम् ।
न तस्य फलमाप्नोति दानस्याश्रोत्रिये यथा ॥ इति ।

नचोर्ध्वपुण्ड्रे त्रिपुण्ड्रकरणे ललाटे यत्त्रिपुण्ड्रकमिति निर्देशस्य गौणत्वप्रसङ्गः । "तदभावो नाडीषु तच्छ्रुतेरात्मनि च"-[उ० मी० अ० ३ पा० २ अधि० २ सू० ७] इति न्यायेनाभयोरपि मुख्याधिकरणत्वोपपत्तेः । यथा हि नाडीषु शेते पुरीतति शेते इति, य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सति सम्पद्यत्यनेकेषामपि अधिकरणानां समुच्चयः, एवमनयोरपि । किञ्चोर्ध्वपुण्ड्रोपरि क्रियमाणस्यापि त्रिपुण्ड्रस्यास्तिभालैकदेशसम्बन्धः, ऊर्ध्वपुण्ड्रस्य भालाव्यापित्वात्, तावता च ललाटाधिकरणत्वव्यवहारः सङ्गच्छते । सूर्याचन्द्रमसोः सहवासस्य तिथ्यन्तक्षणसम्बन्धेनैव तिथ्यधिकरणत्वव्यवहारः, अमावास्येयं तिथिरिति उक्तं च तन्त्ररत्ने पञ्चमे । व्यक्तं चैतत् यदेकदेशे वर्तते कतिपयतदेकदेशिन्यपि यथा क्षिपद् स्थितोऽपवरको ग्रामे जनपदेऽवस्थितो भवति, यदि च भालस्य त्रिपुण्ड्रेऽस्य विहितः स्यात् तर्हि औदुम्बरीस्पर्शेन तद्वै(१)···क्षिणा मूर्ध्नि [यदि च माल

---

(१) अत्रादर्शपुस्तके पाठस्त्रुटितः, अस्माभिः कल्पितपाठस्तु [ ] एतच्चिह्नमध्ये सन्निवेशितः ।

स्योर्ध्वपुण्ड्रेण त्रिपुण्ड्रस्य विहतिः स्यात् तर्हि औदुम्बरीस्पर्शेन तद्वेष्टनमपि विहन्येतेति । अथ श्रीकण्ठादिन्यासं कुर्यात् । स यथा—अस्य श्रीदक्षिणामूर्तिमन्त्रस्य ब्रह्मा] ऋषिः गायत्रीछन्दः दक्षिणामूर्तिर्देवता पुरुषार्थचतुष्टये विनियोगः, इत्युच्चार्य्य ऋष्यादिन्यासं विधाय ऐं ह्रीं श्रीं अ कं खं ङं [गं घं] आं अङ्गुष्ठाभ्यां नमः । इत्येवं बीजत्रयपूर्वकाङ्गुलिन्यासं विधाय षडङ्गन्यासं कृत्वा—

सिन्दूरकाञ्चनसमोभयभागमर्धनारीश्वरं गिरिसुताहरभूषचिह्नम् ।
पाशाभयाक्षवलयेष्टदहस्तमीशं स्मृत्वा न्यसेत्सकलवाञ्छितवस्तुसिद्धै॥

मुखादिकेशवादिस्थानेषु ऐं ह्रीं श्रीं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमः । एवमुत्तरत्रापि बीजत्रयसानुस्वारमातृकार्णनमःशब्दोक्तिः । अनन्तेशविरजाभ्यां, सूक्ष्मेशशाल्मलीभ्यां, त्रिमूर्तीशलोलाक्षीभ्याम्, अमरेशवर्तुलाक्षीभ्यां, उर्वीशदीर्घघोणाभ्यां, भारभूतीशदीर्घमुखीभ्यां, अतिथीशगोमुखीभ्यां, स्थाण्वीशदीर्घजिह्वाभ्यां, हरेशकुण्डोदरीभ्यां, भौतिकेशविकृतमुखीभ्यां, सद्योजातेशज्वालामुखीभ्यां,(१)इति स्वराणाम् । क्रोधेशमहाकालीभ्यां, चण्डेशसरस्वतीभ्यां,पञ्चान्तकेशगौरीभ्यां,शिवोत्तमेशत्रैलोक्यविद्याभ्याम्, एकरुद्रेशमन्त्रशक्तिभ्याम्, कूर्मेशात्मशक्तिभ्याम् । एकाननेशभूतमातृकाभ्याम् , चतुराननेशलम्बोदरीभ्याम् , भूतेशद्राविणीभ्याम् , सर्वेशनागरीभ्याम् , सोमेशखेचरीभ्याम् , लाङ्गलीशमञ्जरीभ्याम् , दारुकेशरूपिणीभ्याम् , अर्धनारीश्वरवीरिणीभ्याम् , उमाकान्तेशकोदरीभ्याम् , आषाढीशपूतनाभ्याम् , दण्डीशभद्रकालीभ्याम् , अत्रीशयोगिनीभ्याम् , मीनेशशङ्खिनीभ्याम् , मेषेशगर्जिनीभ्याम् , लोहितेशकालरात्रिभ्याम् , शिखीशकुण्डलिनीभ्याम् , छगलण्डेशकपर्दिनीभ्याम्, द्विरण्डेशवज्राभ्याम् , महाकालेशजयाभ्याम् , इति वर्गाणाम् । त्वगात्मभ्यां वालीशसुमुखेश्वरीभ्यां, असृगात्मभ्यां भुजङ्गेशरेवतीभ्याम् , मांसात्मभ्यां पिनाकीशमाधवीभ्याम् , मेदात्मभ्यां खड्गीशवारुणीभ्याम् , अस्थ्यात्मभ्यां केशवायवीयाभ्याम् , मज्जात्मभ्यां श्वेतेशरक्षोपचारिणीभ्यां, शुक्रात्मभ्यां भृग्वीशसहजाभ्यां, प्राणात्मभ्यां नकुलीशमहालक्ष्मीभ्याम् , क्रियाशक्तीभ्यां शिवेशव्यापिनीभ्याम् , इति यादीनां लान्तानाम् । क्षं परमात्मभ्यां संवर्तकेशमहामायाभ्यामिति व्यापकन्यासं कुर्य्यात् । इति श्रीकण्ठादिन्यासः ।

---

(१) अनुग्रहेशोल्कामुखीभ्याम्, अक्रूरेशश्रीमुखीभ्याम्, महासेनेशविद्यामुखीभ्याम् , इत्यधिकमन्यत्र ।

अथ तत्त्वन्यासं प्रणवान्तनादेन प्राणायामं च कृत्वा पीठन्यासं कुर्यात । विमलादिदेवतास्थानेषु वामायै, ज्येष्ठायै, गौर्यै, रौद्र्यै, काल्यै, कलविकारिण्यै, बलविकारिण्यै, बलप्रमथिन्यै, सर्वभूतदमन्यै, मनोन्मन्यै, इति देवताः पूजयेत् । ततः श्रीदक्षिणामूर्तिमन्त्रस्य ब्रह्मा ऋषिर्गायत्री-च्छन्दः श्रीदक्षिणामूर्तिर्देवताप्रणवान्तो नादो बीजं स्वाहाशक्तिरित्युच्चार्य्य, ऋष्यादि विन्यस्य आं ईं ऊँ पं ओं अः इत्येतैर्वर्णैः प्रणवसम्पुटितैः षडङ्गमन्त्रैरङ्गुलिन्यासहृन्न्यासौ विधाय मूर्ध्नि भाले चक्षुषोः श्रोत्रयोर्नासयोः पृष्ठे गण्डयोर्दन्तपङ्क्त्योः जिह्वाग्रे नासाग्रे श्रोत्रयोः कण्ठे बाह्वोर्हृदि नाभौ गुह्ये गुदे ऊर्वोर्जान्वोर्जङ्घयोः पाष्ण्योः पदोर्मन्त्राक्षराणि२२ न्यस्त्वा सर्वाङ्गेषु व्यापकन्यासं कृत्वा पाष्ण्यादिन्यासाङ्गन्यासौ पुनर्विधाय हृत्कमले श्रीसदाशिवं ध्यायेत् ।

ध्यायेत्यानुद्राक्षमाले कमलसुलिखिते बाहुभिर्वामपार्श्वं
बिभ्राणो जानुमूर्ध्नापदजलनिहितापस्मृतिर्दुन्दुमाद्यः ।
सौवर्णे योगपीठे लिपिमयकमले सुपविष्टस्त्रिनेत्रः
क्षीराभश्चन्द्रमौलिर्वितरतु विपुलां शुद्धबुद्धिं शिवो नः ॥ इति ।

ततो मानसपूजां कृत्वोक्तविधया शङ्खादिपूजां कृत्वा प्रतिमादौ देवमावाहयेत् । "सहस्रशीर्षा" "सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः । भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः । सावित्र्या मूलमन्त्रेण च व्यस्तसमस्तव्याहृतीभिर्महादेवमावाहयामीत्यन्ताभिरावाहनम् । एवमुत्तरत्रापि पुरुषसूक्तगततन्मन्त्रसावित्रीमूलोच्चारणम् ।

आवाहनादिमुद्राः प्रदर्श्य । वामदेवाय नमः । ज्येष्ठाय नमः । श्रेष्ठाय नमः । रुद्राय नमः । कालाय नमः । कलविकरणाय नमः । बलविकरणाय नमः । बलप्रमथनाय नमः । सर्वभूतदमनाय नमः । मनोन्मनाय नमः । इत्यासनम् ।

ततो देवाग्रतो ब्रह्मणे विष्णवे, दक्षिणतः स्कन्दाय विनायकाय, पश्चिमतः शूलाय महाकालाय, उत्तरतः उमायै नन्दिकेश्वरायासनं कल्पयामीत्यासनमेषां कल्पयित्वा, "तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात्" इति सपरिवारं सन्निधाप्य, अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य इति सन्निरुध्य ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्म शिवो मे अस्तु सदा शिवोमिति देवं पञ्चोपचारैरभ्यर्च्य षडङ्गान्यस्मिन् न्यस्त्वा यो रुद्रो अग्नौ यो अप्सु य ओषधिषु यो रुद्रो विश्वा भुवनानि आविवेश । तस्मै रुद्राय नमो अस्तु इति

पाद्यं समर्पयेत् । सावित्र्याचमनं अर्घ्यंदानं पूर्ववत् ।

अथ स्नानं हेमाद्रौ महापूजाप्रकरणे ।

शिवधर्मे—

पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् ।
ईशानादिमन्त्रैः संस्नाप्य शिवलोकमवाप्नुयात् ॥
यः पुमांस्तिलतैलेन करयम्भोद्भवेन च ।
शिवाभिषेकं कुरुते स शैवपदमाप्नुयात् ॥
स्नानं पलशतं ज्ञेयमभ्यङ्गः पलविंशतिः(१) ।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम् ॥

तत्रैव पुराणान्तरे ।

पञ्चविंशत्पलेनैव अभ्यङ्गं कारयेदथ ।
शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन वै ।
पलानां त्रिसहस्रेण महास्नानं विधीयते ।
तावता मधुना चैव दध्ना चैव ततः पुनः ।
तावतैव हि क्षीरेण गव्येनैव भवेत्ततः ॥
भूयः सार्धसहस्रेण पलानामैक्षवेण तु ।
रसेन कारयेत् स्नानं भक्त्या चोष्णाम्बुना ततः ॥
पुनः शीताम्बुना दत्त्वा वस्त्रपूतेन मन्त्रवित् ।
स्नापयेद्भक्तितो भूपो गन्धपात्रस्थितेन तु ॥

त्रयाणां वर्णानां रुद्रसूक्तेन स्नपनं चतुर्थस्य तु महिम्नस्तोत्रादिना स्नापयेत् । ततो भवं देवं तर्पयामि शर्वं देवं तर्पयामि ईशानं देवं, पशुपतिं देवं, रुद्रं देवम् , उग्रं देवं, महान्तं देवमिति तर्पयित्वा आचमनवस्त्रोपवीताभरणानि पुरोवन्निवेद्य "नमस्ते रुद्रमन्यव उतोत इषवे नमः । नमस्त अस्तुधन्वने बाहुभ्यामुत ते नम इति गन्धं दत्त्वा "भुवनामधिश्रियम् । स्तोम्य उरुकृतसुवीरम् । हविष्पाणसपत्या अभिः भूरसि जहि शत्रुं स्यमृधो उदस्व" इति अक्षताः समर्प्य सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् । तेषां सहस्रयोजने वधन्वा नितन्मासि । इति पुष्पाणि निवेद्य तदुपरि निश्छिद्रकोमलसंयुतबिल्वदलत्रयं दद्यात् । यथोक्तम्—

बिल्वपत्रैरखण्डैस्तु यो लिङ्गं पूजयेत्सकृत् ।
सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ इति ।

---

(१) तैलशोधनार्थं स्नानीयजलपरिमाणमेतदिति स्मृतिकौस्तुभे ।

करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ॥ इति च ।

अत्र विशेषो हेमाद्रौ—

विधिना स्नाप्य चानेन गोरोचनयालिम्पेत् ।
कृष्णाकुङ्कुमकर्पूरचन्दनागुरुयुक्तया ।
कृष्णा=कस्तूरी ।
लेपयित्वा ततो लिङ्गमापीडेन घनं शुभम् ॥
नीलोत्पलसहस्रेण मालां बध्वा प्रपूजयेत् ।
अलाभेतु सहस्राणामर्धार्धेनैव पूजयेत् ।
उत्पलानामलाभे तु पद्मैश्च शीतरोर्यजेत् ।

अनुलेपनपरिमाणं च लैङ्गे

अनुलिम्पेच्च तत्सर्वं पञ्चविंशत्पलेन वा ॥ इति ।

तत आवरणपूजा ।

हृदादिभिः षडङ्गैः प्रथमावरणम् । अ आं नम इत्येवमष्टाभिः स्वरयुग्मैर्द्वितीयम् । कादिपञ्चवर्गैरन्तस्थाभिरूष्मांमळक्षाभ्यां च तृतीयम् । सरस्वत्यै ब्रह्मणे सनकाय सनन्दनाय सनातनाय सनत्कुमाराय शुकाय वेदव्यासाय गणेश्वराय इति चतुर्थम् । पार्वत्यै सुभगायै भद्रायै क्रीडायै, शान्त्यै, रौद्र्यै, काल्यै विजृम्भायै, इति पञ्चमम् । लोकपालैः षष्ठम् । एतान्यावरणानि उक्तानि मन्त्रप्रकाशिकायाम् । ततो धूपदीपनैवेद्योपचारान् समर्पयेत् ।

नैवेद्यपरिमाणम्—

हेमाद्रौ—

दशद्रोणैस्तु नैवेद्यमष्टद्रोणैरथापि वा ।
शतद्रोणसमं पुण्यमाढकेन विधीयते ।
वित्तहीनस्य मर्त्यस्य नात्र कार्या विचारणा ॥ इति ।

कुडवं प्रस्थमाढकं द्रोणं च खारिका चेति पूर्वपूर्वाच्चतुर्गुणम् ।

बाणरावणचण्डीशनन्दिभृङ्गिरिटादयः ।
सदाशिवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः ॥

इति चण्डभागं दत्त्वा करोद्वर्तनं समर्प्याग्नौ शेषान्नेन भवाद्युक्ताष्टैर्देवनामयुतैश्चतुर्थ्यन्तैरष्टाहुतीस्तन्त्रोक्तविधया हुत्वा आवरणदेवताभ्यामपि सकृत् हुत्वा इदं फलमिति फलं समर्प्य नीराज्य होममन्त्रैस्तत्समसंख्यपुष्पाञ्जलीर्दत्त्वा ताम्बूलमुखवासौ दद्यात् । तल्लक्षणं हेमाद्रौ रत्नकोशे—

महापिप्पलपत्राणि क्रमुकस्य फलानि च ।
शुक्तिक्षारेण संयुक्तं ताम्बूलमिति संज्ञितम् ॥

श्वेतपत्रं च चूर्णं च क्रमुकस्य फलानि च।
नारिकेलफलोपेतं मातुलिङ्गसमायुतम्॥
एलाकङ्कोलकर्पूरैर्मुखवासं प्रचक्षते।
एतेषामप्यलाभे तु तत्तद् द्रव्यं स्मरेद् बुधः॥ ततः।
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्।

इति पुनर्नीराजयेत्। तत्र विशेषो हेमाद्रौ।

शालिपिष्टोद्भवैः सिद्धैर्घृतपूर्णैः समुज्ज्वलैः।
ततो नीराजनं दीपैः षड्विंशत्या तु कारयेत्॥
सर्षपैर्दधियुक्तैश्च दूर्वागोरोचनाक्षतैः।
शातकुम्भं ततः पद्ममष्टपत्रं सकर्णिकम्॥
ध्यात्वा निवेदयेन्मूर्ध्नि लिङ्गस्य कुसुमैः सह।
सूक्ष्मवस्त्रयुगं पीतं श्वेतं वा पद्मसन्निभम्॥
चामरं दर्पणं चैव दीपवर्त्तिं प्रदापयेत्।
वितानकध्वजौ दद्यात्किङ्किणीस्तबकान्वितौ॥
अष्टाङ्गैः क्षितिः पीड्या अङ्गैर्भक्त्या तु दण्डवत्।
तत उच्चैः पठेत्स्तोत्रं शाङ्करं च शिवाप्रियम्॥
प्रदक्षिणं ततो गच्छेच्छनैर्निर्माल्यवर्जितः॥ इति।

ऋतं सत्यमिति नत्वा तिस्रः प्रदक्षिणाः कुर्य्यात्। अथ गीतादिभिः सन्तोष्य "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति आत्मानं समर्प्य प्रार्थ्य निर्माल्यं प्रसादत्वेन शिरसा गृह्णीयात्॥

निर्माल्यं धारयेद्भक्त्या शिरसा पार्वतीपतेः।
राजसूयस्य यज्ञस्य फलं प्राप्नोति निश्चितम्॥

इत्यादित्यपुराणे वचनात्।

यत्तु—

शिवनिर्माल्यभोक्तारः शिवनिर्माल्यलङ्घकाः।
शिवनिर्माल्यदातारः स्पर्शस्तेषां हि पुण्यहा॥

इति स्कान्दवचनं तदशैवविषयम्।

शालग्रामयुतं शिवनिर्माल्यं तु सर्वग्राह्यं-

शिवनिर्माल्यसंयुक्तं पत्रं पुष्पं फलं जलम्।
शालग्रामस्य संसर्गात् सर्वं याति पवित्रताम्॥

इति स्कान्दोक्तेः।

अत्र निर्माल्यशब्दस्य पत्रादिषु प्रयोगात् "निर्माल्यं धारयेत्" इत्येनन सर्वेषामेषां प्रतिप्रसवो गम्यते तत् शैवैः शिवतीर्थमपि ग्राह्यमिति। ततो दक्षिणामूर्तिमन्त्रं अष्टोत्तरशतम् अष्टोत्तरसहस्रम् वा रुद्राक्षमालया जपेत्-

व्याहरन्ति तु नामानि ये शम्भोः परमात्मनः।
रुद्राक्षालङ्कृताः सन्तस्ते वै भागवतोत्तमाः॥

इति बृहन्नारदीयोक्तेः। ततः-

साधु वासाधु वा कर्म्म यद्यदाचरितं मया।
तत्सर्वं भगवन् शम्भो गृहाणाराधनं परम्॥

इति प्राग्वोपसंहारमुद्रां प्रदर्श्य भगवति कर्म्म निवेदयेत्।

इति शिवपूजा।

यथोक्तविष्णुपूजाशिवपूजयोरसम्भवे भक्त्या पत्रैः पुष्पैः फलैरद्भिर्वा पूजनं कार्य्यम्। यथोक्तं गीतासु भगवता।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ इति।

श्रीभागवतेऽपि—

अण्वप्युपहृतं प्रेष्ठं भक्तेन मम वार्यपि।
भूर्य्यप्यभक्तोपहृतं न मे तोषाय कल्पते॥ इति।

बृहन्नारदीये वेदमालिजानन्ति संवादे।

पत्रैः पुष्पैः फलैर्वापि दूर्वाभिः पल्लवैरथ।
पूजयस्व जगन्नाथं नारायणमकामतः॥
कन्दमूलफलैर्वापि सदा पूजय माधवम्।
प्रदक्षिणानमस्कारैः स्तोत्राणां पठनैरपि॥ इति।

कौर्मेऽपि—

आराधयेन्महादेवं भावपूतो महेश्वरम्।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथवा पुनः॥
ईशानेनाथवा रुद्रैस्त्र्यम्बकेन समाहितः।
पुष्पैः पत्रैरथाद्भिश्च चन्दनाद्यैर्महेश्वरम्॥ इति।

उक्तञ्च तातचरणैः—

नानोपचारैः समयानुसारैर्गङ्गाजलैर्वा तुलसीदलैर्वा।
तमेव देवं परिपूजयामः संसारमेनं सहसा जयामः॥ इति।

(१) हरिं वा हरं वाहरं वार्चयध्वं कुरुध्वं स्वयध्वं समार्यं ? मुपाधि-साङ्गार्यवस दोषाय । त्रिविधं वा तत्प्रवृत्तिनिमित्तमिति श्रद्धादिशब्द-वशात्मार्थ्यतेति केचित् ।

त्रिविधायाः मोक्षफलत्वं श्रीभागवते ।

तत्तेऽनुकम्पां सुसमीक्षमाणो भुञ्जान एवात्मकृतं विपाकम् ।
हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ इति॥
(श्री भा० स्कन्ध० १० अ० १४ श्लो० ८)

विदधन् जीवेतेति निर्देशादनुवृत्ता नतिर्मुक्तिहेतुरिति सूचितम् । तद्धेतुत्वं न साक्षात् किन्तु प्राणाडिकमिति सूचयितुमनुकम्पासु समीक्षमाण इत्युक्तम् । अनेन तेषामेवानुकम्पार्थमित्युक्तं ज्ञानं मुक्तौ द्वारमुक्तं भवति । सालोक्यहेतुत्वं-

बृहन्नारदीये ।

अर्चितं शङ्करं दृष्ट्वा विष्णुं वापि नमेत्तु यः ।
स विष्णुभवनं प्राप्य वसेदृष्टशतं नृप ॥ इति ।

पापक्षयहेतुत्वं-

श्रीभागवते—

पतितः स्खलितो वार्तः क्षुत्वा वा विवशो गृणन् ।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ।
(श्रीभा० स्क० १२ अ० १२ श्लो० ४६)

गारुडेऽपि—

शाठ्येनापि नमस्कारः प्रयुक्तश्चक्रपाणये ।
संसारस्थूलबन्धानामुद्वेजनप्रदो हि सः ॥

स्थूलबन्धाः=पापानि । उद्वेजनं=निवृत्तिमात्रम् । सवासनपापक्षयस्तु श्रद्धापूर्वकानुवृत्त्या । अत एव तत्राग्रे-

आसीनो वा शयानो वा तिष्ठन् वा यत्र तत्र वा ।
नमो नारायणायेति मन्त्रैकशरणो भवेत् ॥ इति ।

तथा—

नम इत्येव यो ब्रूयात्मद्भक्तः श्रद्धयान्वितः ।
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि शौनक ॥ इति ।

नानापापवासनावान् श्वपाक इति तद्ग्रहणेन सवासनपापक्षयः सूचितः । लोकनं लोकः स्वप्रकाशं चैतन्यम् । अक्षयो लोकः परमात्मा

---

(१) अत्र—हरिं वा हरं वादरेणार्चयध्वं स्तुवीध्वं कुरुध्वं भवध्वंसमार्याः ! अत्रोपधेयसाङ्कर्य—इति पाठ उचितो युक्त इति ।

ततोऽन्यस्य "अतोऽन्यदार्त्तम्" इति अनित्यत्वश्रवणात्। तत्रत्यशब्दे तत्पदं नमनानुरागपरम्। नतिरूपसाधनभक्तेर्विधानादेव सिद्धेरन्य-साधनभक्तेरवकाशव्यावृत्तेः। अतश्च भक्त्या नतिरूपप्रधानभक्त्यैकशरणस्य सवासनपापक्षयजन्यो यो भगवदनुरागस्तत्स्फूर्तिश्च भवतीत्युक्तं भवति। एवं च पूजाप्रयोगे यद्यपि नतिरुक्ता-

पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा।
वचसा मनसा चेति प्रणामोऽष्टाङ्ग उच्यते॥
भूमौ निपत्य यः कुर्यात् कृष्णेऽष्टाङ्गनतिं सुधीः।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात्॥

इति गौतमीतन्त्रे पूजाप्रकरणे।

निपत्य=दण्डवद् भूमौ निपत्य,

तथा गारुडे—

प्रणम्य दण्डवद् भूमौ नमस्कारेण योऽर्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि॥

श्रीभागवते—(स्क० ११ अ० २७ श्लो० ४६-४७)

शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परम्।
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्॥
इति शेषां मया दत्तां शिरसाधाय सादरम्॥ इति।

तथापि भिन्नप्रयोगमपि क्रियमाणा मुक्तिहेतुः "नम इत्येव यो ब्रूया" दित्यवधारणाश्रुतेः। किञ्च "अर्चनं वन्दनं दास्य"मित्यर्चनातिरेकेण वन्दनग्रहणं भिन्नप्रयोगतां गमयति। अन्यथा गन्धादिदानवत् पृथक् कीर्तनं न स्यात्।

शृण्वतां गदतां शश्वदर्चतां त्वाभिवन्दताम्।
नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम्॥

इति च भिन्नप्रयोगश्रवणादिप्रायपाठाच्च भिन्नप्रयोगत्वमवसीयते। आग्नेयादिप्रधानप्रायपाठ इवोपांशुयाजप्राधान्यम्। यथाहुः, अग्रप्राये लिखितं दृष्टा वदन्त्ययमग्रय इति। ततश्च राजसूयान्तर्गताया अवेष्टेरिव वन्दनस्यापि प्रयोगद्वैविध्यमिति सिद्धम्।

नमन्तु देवकीसुतं हृदा शरीरतो गिरा।
त्यजन्तु संसृतिं जना भजन्तु मोक्षसम्पदम्॥ १॥
त्रिधा निरूपिता नतिर्हरेर्जगत्त्रयीशितुः।
तदर्पणं निरूपणं भवेदहोऽखिलं कृतम्॥२॥ इति वन्दननिर्णयः।

अथ दास्यनिर्णयः ॥

तत्र दास्यं सर्वकर्म्मणां भगवत्यर्पणं क्रियाद्वैतापरपर्य्यायम् । यथोक्तं-श्रीभागवते ।

यद् ब्रह्मणि परे साक्षात्सर्वकामसमर्पणम् ।
मनोवाक्तनुभिः पार्थ ! क्रियाद्वैतं तदुच्यते ॥ इति ।
[स्क० ७ अ० १५ श्लो० ६४]

तस्य विधिरपि तत्रैव-
कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वानुसृतस्वभावात् ।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत् तत् ॥ इति ।
[श्रीभा० स्कन्ध० ११ अ० २ श्लो० ३६]

तत्रैव गृहस्थधर्म्मेषु ।
गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ।
वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ इति
[श्री० भा० स्क० ७ अ० १४ श्लो० २]

भगवद्गीतायामुक्तं—
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥ इति ।
[अ० ९ श्लोक० २७]

उक्तविधदास्यस्य भगवत्सन्तोषद्वारा परमपदप्राप्तिहेतुत्वं—
बृहन्नारदीये,
वेदोदितानि कर्म्माणि कुर्य्यादीश्वरतुष्टये ।
यथाश्रमं त्यक्तकामः प्राप्नोति परमं पदम् ॥ इति ।

पद्यते ज्ञायत इति पदम् । असङ्कुचितवृत्तिः परमपदशब्दः, अनावृत पूर्णानन्दस्वरूपपरः, अत एव मुक्तिहेतुत्वं—
ब्रह्मवैवर्त्ते,
काम्यं विषयभोगार्थमिहामुत्र प्रयुज्यते ।
मोक्षाय सुकृतं तद्धि ब्रह्मार्पणधिया कृतम् ॥ इति ।

कर्म्मकुशलानां भगवदर्पणबुध्या तदनुरूपतदाराधनं श्रेयोमार्गो नान्य इत्युक्तम् ।
नारदे, नृसिंहपरिचर्य्यायाम्, विष्णुपुराणे च ।
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारणम् ॥ इति ।

श्रीभागवतेऽपि—

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति यदर्पणं विना तस्मै सुभद्रश्रवसे नमो नमः ॥ इति ।

[स्क० २ अ० ४ श्लो० १७]

एवमाराधनवतां तद्दासानां कृतार्थता—

श्रीभागवते—

यन्नामस्मृतिमात्रेण पुमान् भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते(१) ॥

दास्यमाचरतां हि सन्तुष्टो भगवान् तदधीनो भवतीत्युक्तं तत्रैव ।

किञ्चित्रमच्युत ! तवैतदशेषबन्धो !
दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ॥ इति ।

[श्री० भा० स्क० ११ अ० २९ श्लो० ४]

एवञ्च "यमेवैष वृणुते स तेन लभ्य" इति श्रुतेर्दासानां भगवत्प्राप्तिः सुकरेत्युक्तं भवति । अत एव, "न कर्मणा न प्रजया धनेन" । "नास्त्यकृतः कृतेन" । "प्लवा ह्येते अदृढा यज्ञरूपा" इत्यादिवाक्यैर्न विरोधः । दास्यबुद्ध्याऽननुष्ठितकर्मविषयत्वात्तेषाम् । ज्ञानाभावे हि न मोक्षः । दास्यबुद्ध्या च केवलमनुष्ठितकर्मभिः प्रसन्नो भगवान् काशीमरणन्यायेन ज्ञानं ददातीति नानुपपत्तिः । अत एव ।

गीतागारुडयोः-

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दन्ति मानवाः ॥ इति ।

भगवद्गीतासु—

असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ।

इत्युक्त्वा—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।

इत्युक्तम् । अत्र ते अयुक्तः सर्वसंन्यासः कर्मणां मदर्पणं स एव योगस्तत्र युक्त इत्युक्तं श्रीधरस्वामिभिः । न चात्राध्यात्मविचारस्य श्रवणकीर्तनादेश्चोपसंहार इति वाच्यम् । कर्मणैवेत्यवधारणाश्रुतिविरोधात् । अतश्च यो भगवदर्पणबुद्ध्या कर्मानुतिष्ठति न तदेकनिष्ठः स तदनुष्ठानाच्छुद्धसत्त्वः श्रवणसङ्कीर्तनादौ, अध्यात्मविचारे वा प्रवर्तत इति तादृशानुष्ठानस्यान्तःकरणशोधकत्वमुक्तं साम्प्रदायिकैरिति न विरोधः ।

---

(१) स्क ९ अ० ५ श्लो० १६ ।

ननु तथापि—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
[गी० अ० १८ श्लो० ६६]

इति कर्मत्यागाभिधानेन विरोध इति चेत्। नेदं सर्वथा कर्मत्यागाभिप्रायम्। यत्करोषीत्याद्यनेकवचनाविरोधात्। किन्तु कर्मत्यागाभिधानेन भगवदेकशरणता विधीयते।

तदेकशरणत्वं नाम सामस्त्येनैकैकश्येन वा नवविधभक्तिनिष्ठत्वं तदेकप्रवणताविघातकर्त्रादितरनिष्ठतानिवृत्तिः सिद्ध्यति आतिथ्याया इडान्तताविधाविधानुयाजादिनिवृत्तिः। एवञ्च पुत्रकलत्रादिविषयनिष्ठताया इव विहितत्वात् केवलमवश्यमनुष्ठेयानि कर्माणीति कर्मनिष्ठतया निवृत्तिः सिद्ध्यति तस्या अपि नश्वरपितृलोकपर्य्यवसायित्वात्। सानूद्यते "सर्वधर्मान्परित्यज्य" इति। "कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः" इत्यनेनार्जुनकर्मनिष्ठताया भगवतावगतत्वात्। न तु दास्यरूपभक्त्यनुष्ठानेन नित्याधिकारविरोधः, काम्यज्योतिष्टोमाद्यनुष्ठान इव तन्त्रेणोभयसिद्धेः। तत्तत्कर्मकाले दैवाद् भक्त्यैकान्तिकत्वेन भगवत्कथाश्रवणादौ व्यासक्तस्य तु कर्मानुष्ठानात् प्रत्यवायः स्यादिति शङ्कां व्यावर्त्तयितुम्। "अहं त्वा सर्वपापेभ्य" इत्युक्तम्। तदुक्तं श्रीधरस्वामिभिः। मद्भक्त्यैव सर्वं भविष्यतीति दृढविश्वासेन विधिकैङ्कर्य्यं त्यक्त्वा मदेकशरणो भव, एवं वर्त्तमानः कर्मत्यागनिमित्तं पापं स्यादिति मा शुचः शोकं मा कार्षीः, यतः त्वां मदेकशरणं सर्वपापेभ्योऽहं मोचयिष्यामीति। अत्र विधिकैङ्कर्य्यशब्देन विधिविहितत्वेन कर्मनिष्ठतोच्यत इति। अतो भगवदर्पणबुद्ध्या कर्मानुष्ठानरूपदास्यस्य भक्तिरूपत्वेन न तन्निष्ठत्वे विरोधः। किञ्च "तस्मात् युध्यस्व भारत" इति युद्धरूपधर्मे प्रेरणात् "सर्वधर्मान् परित्यज्य" इति न सर्वधर्मत्यागाभिप्रायम्, मोक्षनिष्ठताप्रतिपादनात्तु पितृलोकपर्य्यवसायिकर्मनिष्ठता व्यावर्त्यते।

आचार्य्यैस्तु भगवदेकप्रवणतायाः पूर्वमेव सपरिकरप्रतिपादनेनोपसंहारात्तत्त्वज्ञानप्रतिपादनपरमेतदित्युक्तम्। "सर्वधर्मान् परित्यज्य" इति नैष्कर्म्यमभिधीयते "मामेकं शरणं व्रज" इति मदतिरिक्तं सर्वं तुच्छं जानीहीति तत्त्वज्ञानमभिधीयते। "अहं त्वा सर्वपापेभ्यः", इति सकलकर्मबन्धननिवृत्तिस्तत्त्वज्ञानादभिप्रेतेत्युक्तं तदा न काप्यविरोधः। भगवदेकशरणताप्रतिपादनावसरे पूर्वकर्मत्यागानभिधानादिति।

श्रीमागवतेऽपि "कायेन वाचा" इत्यादिना तत्र तत्र भगवदर्पणबुध्या कर्मानुष्ठानप्रतिपादनात् "धर्मान् सन्त्यज्य यः सर्वान् मां भजेत स सत्तमः"। इत्यत्र विहिता इत्येवं केवलं क्रियमाणानाम्, अत एव नश्वरपितृलोकपर्य्यवसायिनां त्यागोऽभिप्रेतः। अत एव एतद्व्याख्यानावसरे ध्यानविक्षेपकत्वं त्यागहेतुत्वेनोक्तम्। दास्यरूपा तु भक्तिर्भगवदनुग्रहहेतुरिति न तस्या विक्षेपकत्वम्। सत्त्वशुद्धिपर्यवसायिकर्मत्यागो वाभिप्रेतः, सत्त्वशुद्धिं विना भक्तिदार्ढ्यायोगेन तस्मिन् सति तदनुपयोगात्। अत एव तदा स्वल्पः कर्माधिकार इत्युक्तं "तावत्कर्माणि कुर्वीत" इत्येतद्व्याख्यानावसरे। दास्यं तु भक्तिरेवेति न तत् त्यागो युक्तः। विद्धैकादशीकृष्णैकादश्योरुपवासानुपवासौ, अनिवेद्य श्राद्धादयो (१)ये भक्तिविरुद्धा धर्मास्तत्त्यागो वेत्युक्तं श्रीधरस्वामिभिः। तत् सिद्धं दास्यरूपा भक्तिर्भगवदनुग्रहफलत्वादवश्यमनुष्ठेयेति।

यस्य हासावलोकेन रासाह्वयक्रीडतो दासवद्गोपपत्न्योऽभवन्।
यस्य भासाऽखिलम्भासतेऽदो जगत्तस्य दासा भवामो वयं सर्वदा॥
अकारि दास्यचिन्तनं वकारिपादपद्मयोः।
सुखप्रकारि जायतामदोऽविकारिणीश्वरे॥ इति दास्यनिर्णयः।

अथ सख्यनिर्णयः।

सख्यं नाम,

अनन्याश्चिन्तयन्तो मां ये जनाः पर्य्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥
[गी० अ० ९ श्लो० २२]

यद्गोविन्देति चुक्रोश कृष्णा मां दूरवासिनी।
ऋणमेतत्प्रवृद्धं मे हृदयान्नापसर्पति॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
विष्णुर्भक्तकुटुम्बीति वदन्ति विबुधाः सदा।
तदेव पालयिष्यामि सज्जनो नानृतं वदेत्॥

इत्यादिभगवद्वचनविश्वासादित्युक्तं साम्प्रदायिकैः। लोके सख्युः सख्यन्तरवचसि भवति विश्वासः। आर्तौ सङ्कटप्राप्तौ च तन्निवेदनम्। सङ्कटनिवारणसमर्थश्चेत् तदेकशरणतया तदाश्रयणात् तत्र प्रीतिः।

---

(१) विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्।
पितृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते॥
इत्यादि वचनाद् भगवन्निवेदनपूर्वकश्राद्धादीनां भक्त्यविरुद्धत्वादनिवेद्येति।

तदिदमादिशब्दार्थः । अत एवंरूपेणावस्थानरूपं भगवत्सख्यं, "सख्यमात्मनिवेदनम्" इत्यनेन विधीयते । एवंरूपेणावस्थितस्य वाञ्छितसिद्धिरुक्तवाक्यैरेव निर्णीयत इत्यनन्तरं वक्ष्यामः ।

तथा—

(१)वनौकसस्तात ! नित्यं वनशैलनिवासिनः ।
तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ॥

इत्येवं भगवद्वचसि विश्वस्तैर्नन्दादिभिस्तथैव कृते कुपितेन्द्रकृतमहावृष्टिसङ्कटप्राप्तौ ।

(२)कृष्ण ! कृष्ण ! महाभाग ! त्वन्नाथं गोकुलं विभो ।
त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ! ॥

इति निवेदने कृते भगवत्कृतगोवर्द्धनोद्धारणेन निर्णीयते । एवं कुर्वतां नन्दादीनां च—

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥
[श्री० भा० स्क० १० अ० १४ श्लो० ३२]

इति ब्रह्मकृतस्तुतितोऽपि विधिराश्रीयते ।

तथा—

अथाब्रवीद् वृत्रमिन्द्रो हनिष्यन् सखे विष्णो वितरं विक्रमस्वेति वृत्रोपद्रुतेन्द्रेण सङ्कटप्राप्तौ सखिशब्देन भगवत्सम्बोधनं सख्यस्य फलवत्वं गमयति । एवं प्रार्थितभगवता सामर्थ्ये दत्त इन्द्रो वृत्रं हतवान् इति गम्यते । एवं--

प्रीतिरूपसख्यस्य सर्वानर्थनिवर्तकत्वं श्रीभागवते,

एवं मनः कर्म्मवशं प्रयुङ्क्ते अविद्ययात्मन्युपधीयमाने ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ इति ।

अस्य तात्पर्यं साम्प्रदायिकैरुक्तं मयि=मय्येव । वासुदेवे=सर्वाश्रये । यावत् न प्रीतिः=सख्यं तावद्देहयोगेन न मुच्यते अर्थात्सख्येनैव सर्वानर्थनिवृत्तिरिति मया सख्यं कुर्य्यादेवेति भाव इति ।

तदेकशरणतदाश्रयणरूपसख्यस्य फलम्—

रामायणे,

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ इति ।

---

(१) श्री० भा० स्क० १० अ० २४ श्लो० २३–२४ ।

(२) श्री० भा० स्क० १० अ० २५ श्लो० १३ ।

भयम्=संसारः। द्वितीयाद्वै भयं भवतीति श्रुतेः। तदभावो मोक्षः।
श्रीभागवते।

किं दुरापादनं तेषां पुंसामुद्दामचेतसाम्।
यैराश्रितस्तीर्थपदश्चरणो व्यसनापहः।

तथा।

शारीरा मानसा दिव्या वैयासे ये च मानुषाः।
भौतिकाश्च कथं क्लेशाः बाधन्ते हरिसंश्रयम्॥

तथा—

(१)देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन्।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम्।

तथा—

(२)कः पण्डितस्त्वदपरं शरणं समीया-
द्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात्।
सर्वान् ददाति सुहृदो भजतोऽभिकामा-
नात्मानमप्युपचयापचयौ न यस्य॥ इति।

तथा—

तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश!।
पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात्॥ इति।

तदिदं सख्यं भक्त्यन्तरेण सह समुच्चीयते।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।

इति भगवद्वचसि विश्वासमवलम्ब्य दास्यध्यानादिकुर्वतां संसारतरणं सर्वसाध्यम्। तत्र सख्यस्य तद्व्यतिरेकेण फलानुपलम्भात्। "श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः" इति श्रद्धानत्वापरपर्यायसख्यस्य तस्मिन्नेवाध्याये तुल्यवन्निर्देशात्। ननु "ये तु सर्वाणि कर्माणि" इत्यत्र दास्यध्यानयोः श्रवणात् समुच्चयो युक्तः, न सख्येनाश्रवणादिति चेत् न। प्रकृतवाक्यैकवाक्यतापन्नप्रधानविधिवशात् प्रकृतानां समुच्चयावगमेऽपि वाक्यान्तरवशेनाश्वदाभ्यप्रवर्ग्यादीनामनारभ्याधीतानां समुच्चयवत् स्वातन्त्र्येण सख्यविधायकवाक्यवशात् समुच्चयोपपत्तेरिति।

---

(१) श्री भा० स्क० ११ अ० ५ श्लो० ४१।
(२) श्री० भा० स्क० १० अ० ४८ श्लो० २६।

चेतः कुरु हरिसख्यं कृतमपि सकलं निवेदयामुष्मिन्।
सम्प्रति मा भव मित्रं पुत्रकलत्रादिविषयाणाम् ॥ इति सख्यनिर्णयः ॥

अथात्मनिवेदननिर्णयः ॥

आत्मा देहः, तस्य निवेदनं भगवति समर्पणम्। यद्वा आत्मनः आत्मीयस्य देहदारादेः। अत एवोक्तम्।

श्रीभागवते,

दारान् सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम्।

प्राणानिति देहोपलक्षणम् ॥

गारुडे च--

मनस्त्यज्य च गार्हस्थ्यमसंसेव्य महत्तपः।
छिनत्ति वैष्णवीं मायां कृष्णार्पितमानसः ॥

मनोग्रहणं देहादेरुपलक्षणम्। दारादीनां समर्पणञ्च सेवकतया। अर्पणं च मां मदीयं च सकलं हरये सम्यगर्पये ॐ तत्सदिति मन्त्रेणेत्युक्तं क्रमदीपिकाद्यागमग्रन्थेषु। एवं चान्यस्मै दत्तस्य गवाश्वादेर्भरणपालनादिचिन्ता यथा न क्रियते तथा देहदारादेरपि। यथोक्तम्।

यदुवरचरणसरोजे सम्प्रति सर्वात्मनार्पितो देहः।
सोऽयं विलसतु पुष्टो भवतु क्लिष्टोऽथवा विपद्यै ॥ इति।

समर्पणस्य फलं श्रीभागवते उक्तम्।

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे।
तदाऽमृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥

[श्री० भा० स्क० ११ अ० २९ श्लो० ३४]

यत एव त्यक्तसमस्तकर्मा सन् स निवेदितात्मा भवति अत एवासौ मे मम विचिकीर्षितः=विशिष्ट उत्कृष्टश्चिकीर्षितो यदा तदेत्यन्वयः। मया सेति शेषाहारः। निवेदितात्मनः--अत एव भरणपालनादिचिन्तामकुर्वतः सांसारिकमुत्कृष्टत्वमपि मत्तो भवतीति विचिकीर्षितपदेनोक्तम्। नन्वात्मनिवेदनं दास्यादि वा तावत् क्रियाविशेषः क्रियायाश्च क्षणिकत्वात् साक्षात्कालान्तरभाविफलहेतुत्वं न सम्भवतीति अपूर्वस्य द्वारत्वं "चोदना पुनरारम्भ" इत्यत्रोक्तम्। न चापूर्वस्य मोक्षहेतुत्वं युक्तं "नास्त्यकृतः कृतेन"इत्यादिश्रुतिविरोधात्। देवतायाः प्राधान्यं फलदातृत्वं च नवमे निराकृतम्। तत् कथं भक्तेः प्राधान्यम्। उच्यते। तत्राद्यविधिषु फलभावनाकरणत्वेनेष्टसाधनत्वेन चान्वयिनो यागादेरिव भक्तेरपि प्राधान्यं सङ्गच्छते। तत्र स्वरूपेण क्षणिकायाः

किंद्वारा फलकरणत्वमित्यपेक्षायां तत्र भगवदनुग्रहद्वारा ज्ञानप्राप्तिः श्रूयमाणा द्वारत्वेनाश्रीयते, अत्यन्ताश्रुतानेकापूर्वाणां द्वारताकल्पनातः श्रूयमाणानां द्वारत्वकल्पनाया उचितत्वात्। अपूर्वाणां हि उपस्थिति-द्वारत्वं चेत्युभयं कल्प्यम्। तत्तद्वाक्यसिद्धानां तु द्वारत्वमात्रकल्पने लाघवम्। अत एव रात्रिसत्रादौ विश्वजिन्न्यायेन न स्वर्गफलत्वं आर्थवादिकप्रतिष्ठादेरेव तु फलत्वं अनुपस्थितस्योपस्थितिं कृत्वा फलत्वकल्पनात उपस्थितस्य फलत्वमात्रकल्पने लाघवात्। अस्य न्यायस्य द्वारकल्पनायामपि तुल्यत्वात्। तदुक्तं महर्षिणा "फलमत उपपत्तेः" इति।

किञ्च—

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इत्येवमादीनां सिद्धार्थानामपि वाक्यानां विध्यपेक्षितफलविशेषप्रतिपादकत्वेन प्रामाण्यमाश्रीयते न तु निरालम्बनत्वं स्वाध्यायाध्ययनविध्यधीतस्य सति सम्भवे तदयोगात्। एवं "भक्तिर्विरक्तिर्भगवत्प्रबोध" इत्यादीनामपि विध्यपेक्षितद्वारविशेषप्रतिपादकत्वे सति न निरालम्बनत्वं वक्तुं युक्तम्। "चत्वारो वर्णाः शृणुयुः" इति दृष्टार्थविध्युपात्तत्वेन तदयोगात्। क्षणिकक्रियाया द्वारं विना कालान्तरभाविफलसाधनत्वेन विधानायोगात् द्वारविशेषोऽपि फलविशेषवद्विध्यपेक्षितः। न चैवं वायव्यादिकर्मस्वपि तत्तदर्थकवाक्यैर्देवतानुग्रहावगमाद्देवतायाः प्राधान्यापत्तेरङ्गत्वं न स्यादिति वाच्यम्। पुरुषवदुपपत्तेः। अधिकारित्वेन प्रधानस्यापि सतः कर्तृत्वेन गुणत्वाश्रयणात् तद्वद्देवताया अपि क्रियानिर्वर्त्तकत्वेनाङ्गत्वोपपत्तेः। ताद्धितश्रुत्या शब्दतो गुणत्वेनैवावगतिः। अनुग्रहाश्रयतया प्राधान्यं त्वार्थिकं अतो न वैरूप्यं दोषाय। देवतायाः कर्मसमवायनियमश्च नाश्रीयते, अतो न कर्मणि विरोधः। न च येषु कर्मसु वायव्यादिवाक्यवत् अनुग्रहो न ते तत्र किं द्वारमिति वाच्यम्।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हितान्॥

इत्यादिवाक्येषु सर्वकर्मसाधारण्येन तच्छ्रवणात्।

इत्यात्मसंनिवेदननिर्णयः॥

अथोक्तभक्तीनामवान्तरभेदनिर्णयः॥

श्रवणादिनवविधभक्तिष्वेकैका त्रिविधा, तामसी राजसी सात्त्विकी चेति। तामसी त्रिविधा, हिंसार्था दम्भार्था मात्सर्यनिमित्ता च। राजसी त्रिविधा। विषयार्था, यशोऽर्था, ऐश्वर्यार्था च। सात्त्विकी त्रिधा उपक्षयार्था, परमेश्वरप्रीत्यर्था, सिद्ध्यर्था चेति। यदाह—

कपिलः।

(१)अभिसन्धाय यद्धिंसां दम्भं मात्सर्यमेव च।
संरम्भी भिन्नदृग् भावं मयि कुर्यात् स तामसः।
विषयानभिसंधाय यश ऐश्वर्यमेव वा।
अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः॥
कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणम्।
यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः॥ इति।

अर्चादावित्यस्य मध्यश्लोकपठितस्य पूर्वोत्तरश्लोकयोरनुषङ्गः। संरम्भी=क्रोधी। भिन्नदृक्=भेददर्शी सन् हिंसामभिसन्धाय परो म्रियतामित्युद्दिश्येत्यर्थः। दम्भं परवञ्चनामभिसन्धाय मनसि कृत्वेति यावत्। मात्सर्यमभिसन्धाय मनस्युत्पन्नमत्सरेणेति यावत्। भावं श्रवणादिरूपां भक्तिम्। विशेष्यतया पुंप्रतीतिं जनयन्तोऽपि तामसादिशब्दा भक्तिभेदप्रतिपादनपराः। भक्तिभेदे देवहूत्या पृष्टे "भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते" इत्युपक्रम्यैतदाम्नानात्।

अत एव "अर्चयेत्" इत्यर्चनग्रहणमितरभक्त्युपलक्षणार्थम्,
सामान्यतो भक्तिभेदानामेव वक्तव्यत्वेन प्रक्रमात्।

अत एवोक्तं श्रीधरस्वामिभिः।

एवञ्च श्रवणकीर्तनादयो नवापि प्रत्येकं नव नव भेदा इति।

श्रवणादीनां विहितत्वेन भगवत्सम्बन्धित्वेन च स्वरूपेण तामसत्वाभावेऽपि तत्करणकभावनाया वैरिमरणोद्देश्यत्वाविच्छेदेन श्येनभावनावन्निषेधविषयत्वात् दम्भमत्सरयोश्च निषिद्धत्वेन तन्निमित्तानुष्ठेयत्वेन तस्य निषिद्धत्वान्निषेधातिक्रमस्य च तमःकार्यप्रमादरूपत्वात् नाशव्यापारमिश्रत्वेन तामसत्वम्। एतावांस्तु श्येनात् हिंसादिप्रयुक्तज्योतिष्टोमादेश्च श्रवणादौ विशेषः, साङ्कृत्यादिन्यायेन भगवत्सम्बन्धिन्यमुष्मिन्ननुष्ठिते आनुषङ्गिकोऽघक्षयोऽपि भवतीति।

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥

---

(१) भा. स्क. ३ अ. २९ श्लो. ८–१०।

इति स्मृतेः। विषयानिति विषयशब्दो गोबलीवर्दन्यायेन यशऐश्वर्यव्यतिरिक्तविषयपरः। पृथग्भावो=भेददृक्। श्रवणादेराजसत्वमपि तद्भावनाया रजोगुणकार्य्यफलविशेषाभिसन्धिमिश्रत्वात्। आनुषङ्गिकाघक्षयहेतुत्वेनेतरकाम्यकर्मवैलक्षण्यं प्राग्वत्। कर्म्मनिर्हारम्=पापक्षयमन्तःकरणशुद्धिमिति यावत्। परस्मिन्=परमेश्वरे। अर्पणं तत्प्रीतिमुद्दिश्येति यावत्। यजेदित्यपि पूर्ववदितरभक्त्युपलक्षणार्थम्। यष्टव्यमिति विधिसिद्धिमुद्दिश्य, न वयं फलविशेषसिद्धिं विद्मः पूर्वैः कृतत्वात्परं कुर्म इति बुद्ध्यानुष्ठानमिति यावत्। अस्य चानुष्ठानस्य पापक्षयोद्देश्यकत्वाभावेऽपि तत्फलकत्वं पूर्ववत्। अत्र तु फलाभिसन्धेरपि सत्वकार्य्यतत्वज्ञानोपयोगित्वेन सत्वकार्य्यत्वं, तन्मिश्रिततयाऽपि भगवद्भक्तेः सात्विकत्वमित्याशयेन तदुक्तिः। ननु नवविधभक्तीनां प्रत्येकं नव नव भेदा इत्याचार्य्यैरुक्तम्। तत्र सङ्गच्छते। भगवति कर्मार्पणरूपदास्यस्य परस्मिन् वा तदर्पणमित्येवं सात्विकैकरूपत्वप्रतीतेरिति चेन्न। गुणकार्य्यत्वव्यपदेशस्तावत् फलाभिसन्धिनिमित्तः। तद्विशेषकार्य्यत्वोक्तिरपि फलविशेषोद्देशकृता। हिंसादिफलविशेषात्। तत्र श्रवणादिरूपा दास्यातिरिक्ता भक्तिर्यथा हिंसादिफलोद्देशेनानुष्ठीयमाना तामसादिव्यपदेशं लभते। एवं हिंसाद्यर्था परमेश्वरप्रीतिमुद्दिश्य कर्मानुष्ठानरूपं दास्यमपि तामसत्वादिभिर्व्यपदिश्यते। नन्वेवमपि दास्यस्याष्टावेव भेदाः स्युः। सात्विकद्वितीयभेदासम्भवात्। न हि हिंसादिवत् परमेश्वरप्रीतिं प्रति परमेश्वरप्रीतेरुद्देश्यत्वं सम्भवति। उच्यते। द्विविधं तावत्परमेश्वरप्रीतेरुद्देश्यत्वम्। फलान्तराद्यर्थतया स्वरूपेण च, तत्र द्वितीयपक्षावलम्बने "परस्मिन् वा तदर्पणम्" इत्युक्तमिति सिद्धा दास्यस्यापि नव भेदाः। न च परमेश्वरप्रीतेः सुखदुःखाभावान्यतरत्वाभावेनापुरुषार्थत्वात् स्वरूपेणानुद्देश्यत्वम्। "किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने"। इति पुरुषार्थपर्यवसायितयावगताया अस्या आधानइवाग्नीनां स्वरूपेणोद्देश्यत्वसम्भवात्। यदा तु फलाभिसन्धिर्नकोऽपि हृदि समुल्लसति परमेश्वरेऽनुरागादेव तु श्रवणादौ प्रवृत्तिः, तदानुष्ठीयमानश्रवणादीनि निर्गुणभक्तितया व्यवह्रियन्ते। यदाह—

कपिलः—

(१)मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥

---

(१) श्री. भा. स्क. ३ अ. २९ श्लो. ११–१२।

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ इति ।

मद्गुणाः=अनावृतपूर्णानन्दरूपत्वादयः । मात्रपदव्यावर्त्यमाह । अहैतुकी=फलाभिसन्धिरहिता। पूर्वभक्तिष्विव न निर्गुणभक्त्या भगवन्मूर्तिस्फूर्त्यतिरिक्तसमीहितदर्शनमस्तीत्याशयः । सर्वगुहाशये=सर्वान्तर्यामिणीति यावत् । अविच्छिन्ना=सन्तता । विषयतिरस्कारेण मद्गुणमात्रश्रवणोत्थकेवलभगवदनुरागान्मनसोगतिर्भगवद्विषयश्रवणाद्येकनिष्ठतया श्रवणाद्यनुष्ठानमिति या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणं स्वरूपमिति वाक्यार्थः । गुणकार्यफलाभिसन्धानाभावान्निर्गुणत्वमित्याशयः । अत एवाग्रे कपिल उदाजहार ।

(१)सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ इति ।

अनेन कैमुत्यन्यायेन सकलफलाभिसन्ध्यभावो द्योतितः । अत एवोक्तं—

तथापि तत्परा राजन्न हि वाञ्छन्ति किञ्चन । इति ।

फलाभिसन्ध्यभावेऽपि श्रवणाद्यनुतिष्ठतां यथा मोक्षसिद्धिस्तथोपपादितमधस्तादिति नेह तन्यते । तदित्थमेतत्फलाभिसन्धिना क्रियमाणा सगुणा भगवदनुरागेणानुष्ठीयमाना तु निर्गुणेति । अत एवोत्तममध्यमप्राकृताधिकारिनिरूपणं सङ्गच्छते । कथम्?

(२)न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥
(३)त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दात्
क्षणनिमिषार्धमपि स वैष्णवाग्र्यः ॥ इति ।

अस्यार्थश्च प्राग् व्याख्यातः, भगवदपेक्षया सर्वस्य तुच्छत्वं स्मरन् यो न चलतीत्यर्थ इति चोक्तं श्रीधरस्वामिभिः । न चैवंविधस्य फलाभि-

(१) श्री. भा. स्क. ३ अ. २९ श्लो. १३ ।
(२) श्री. भा. स्क. ११ अ. २ श्लो. ५० ।
(३) श्री. भा. स्क. ११ अ. २ श्लो. ५३ ।

सन्निधिना भगवद्भक्त्यनुष्ठानं युज्यते। तस्मादस्य निर्गुणभक्तावेवाधिकारः।

(१)अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥ इति।

अस्य तु सगुणभक्तिषु तिसृष्वपि अधिकारः। तत्र सात्त्विकभक्तिमभ्यस्यतोऽमुष्य कालेनोत्तमावस्थाप्राप्तिर्भवतीत्याशयेन प्राकृतोक्तिः। तदुक्तं श्रीधरस्वामिभिः।

प्राकृतः अधुनैव प्रारब्धभक्तिर्भवतीत्याशयेन शनैः शनैरुत्तमो भविष्यतीत्यर्थ इति।

(२)ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥ इति।

अत्र यथाक्रमं ईश्वरादीनां प्रेमादिभिरन्वयः। अस्य तु तामस इत्यादिवत्सत्यपि पुंविशेष्यत्वनिर्देशे भक्तिभेदप्रतिपादकत्वेन नाधिकारिप्रतिपादकत्वमिति वाच्यम्। "अथ भागवतं ब्रूत" इत्यधिकारिनिरूपणस्यैव प्रक्रमात्। तामसादिवाक्येषु "भक्तियोगो बहुविध" इत्युपक्रमवदत्र भक्तिभेदप्रतिपादनोपक्रमाभावात्। तदेवमधिकारिभेदाम्नानात् तामसादिनिर्देशभेदाच्च भक्तेरनेकप्रकारत्वे सिद्धे भक्तेर्ज्ञानद्वारा मुक्तिहेतुत्वेन वेदान्तविचारेण सह विकल्पाभिधानं तत्सात्त्विकभक्तिनिर्गुणभक्त्यभिप्रायम्। राजसतामसभक्त्योः फलान्तरार्थत्वेन मुक्त्यनुपयोगात्। न च सात्त्विकनिर्गुणभक्त्योर्मुक्त्यर्थतया विकल्पप्रसङ्गः, अनुष्ठितसात्त्विकभक्तेः पुंसो भगवदनुरागविषयविरागसमुत्पत्तिसमनन्तरमेव निर्गुणभक्त्यनुष्ठानसम्भवात्। तथाह।

(३)तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ इति।

भगवता च प्रीतिपूर्वकं सततभक्त्यनुष्ठानं मुक्त्युपयोगितया निर्दिष्टम्, एवंविधं च भक्त्यनुष्ठानं निर्गुणमिति कपिलेनोक्तमुक्तश्लोके। भगवत्प्रीतिश्च।

(४)इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः।

(१) श्री. भा. स्क. ११ अ. २ श्लो. ४७।
(२) श्री. भा. स्क. ११ अ. २ श्लो. ४६।
(३) श्री. गी. अ. १० श्लो. १०।
(४) श्री. भा. स्क. ११ अ. २ श्लो. ४३।

भवन्ति वै भागवतस्य—

इति सात्त्विकभक्तिजन्यतयाऽवगतेति सात्त्विकभक्त्युत्तरकालमेव निर्गुणभक्त्यनुष्ठानसम्भवान्नानयोर्विकल्पः । बहुधाधानोत्तरकालानुष्ठेयाः पवमानेष्टयः सत्यप्येकार्थ्येऽन्याधेये न विकल्प्यन्ते । न च "भक्तिर्विरक्तिर्भगवत्प्रबोध" इति फलभक्त्यनन्तरं भगवत्साक्षात्कारसिद्धौ निर्गुणभक्त्यनुष्ठानं व्यर्थमिति शङ्क्यम् । यथा "अश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम्" । इति तरतमभावेन प्रीत्युत्पादावगमात् । निरतिशयप्रीतेः प्राङ्निर्गुणभक्त्यनुष्ठानसम्भवात्, निरतिशयप्रीतिसमनन्तरं च भगवत्साक्षात्कारोदयात, तत् सिद्धमेतत्सात्त्विकनिर्गुणभक्त्योर्मुक्त्युपयोगितेति । नन्वयुक्तमेतत् ।

कामाद् द्वेषाद्भयात् स्नेहात् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ।
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥

इति भक्त्येकत्वस्य विवक्षितत्वादिति चेत् । न । स्वामिसप्तदशाः कर्मसामान्यात् । [पू० मी० अ० ३ पा० ७ अधि० १८] इति सत्यपि सप्तदशकर्तृत्वे मुख्यकर्त्रभिप्रायेण यजेतेत्येकवचनोपपादनवत्सत्यपि भक्तिद्वयसमुच्चये साक्षात्साधननिर्गुणभक्त्यभिप्रायेणैकवचनोपपत्तेः । सात्त्विकभक्तेर्भगवद्विषयानुरागजनकत्वेन व्यवधानात् । अत्र च कामादयो यद्यपि भक्तिवन्न विहिता प्रत्युत "यस्तु नारायणं द्वेष्टि"इत्यादिना भगवति द्वेषो निषिद्धः, कामोऽपि परपुरुषविषयो निषिद्धः, तथापि भगवद्विषया एते सन्ततमनुवर्त्तमाना मुक्त्युपयोगि सन्ततं भगवन्मूर्त्तेः स्फूर्त्यपरपर्यायध्यानं जनयन्तीति भक्तिसमकक्षतयोपदिश्यन्ते । उक्तनिषेधातिक्रमाज्जातमपि दुरितं भगवत्स्फूर्त्यैव विनश्यतीत्याशयेन तदघं हित्वेत्युक्तं श्रीधरस्वामिभिः । राजसतामसभक्त्योस्तु सत्यपि भगवद्विषयत्वे सकृत्प्रयोगादेव हिंसादिफलसिद्धेरनुवृत्त्या भगवत्स्फूर्तिहेतुत्वाभावाच्च मुक्त्युपयोगितेत्यलमतिविस्तरेण ।

प्रह्लादोक्तनवप्रकारभजनप्रत्येकभेदान् बहून्
मात्रे श्रीकपिलोऽब्रवीदखिलनॄनुद्धर्तुकामो भवात् ।
तेषां निर्णय एष वारिधिसुतानाथे कृपावारिधौ
तोषं सम्प्रति सन्तनोतु सजलाम्भोदप्रभायुक्तनौ ॥ १ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरण-
कमलश्रीमन्महाराजप्रतापरुद्रतनूजश्रीमन्महाराजमधुकरसाहसूनु-
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीम-
न्महाराजाधिराजश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डिता
त्मजपरशुराममिश्रसूनुसकलविद्यापारावारपारीणधु-
रीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातु-
श्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनि-
बन्धे भक्तिप्रकाशे नवविधभक्तीनामवा-
न्तरभेदनिर्णयः।

अथ भजनीयनिर्णयः।

नवविधभक्त्येश्वरो भजनीय इत्युक्तं तत्र कोऽसौ-ईश्वरः। उच्यते। "यः सर्वज्ञः स सर्वविद्" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै"। "सर्वस्य वशी सर्वस्येशानः सर्वमिदं प्रशास्ति"। एको दधार भुवनानि विश्वा" "अनश्नन्नन्योऽभिचाकशीति" इत्या-दिवाक्येषु पुरुषसूक्ते विष्णुसूक्ते रुद्रसूक्तेष्वन्तर्यामिब्राह्मणादौ अष्टा-दशपुराणादिषु यो निरूप्यते यश्च शैवपुराणेषु शिवशब्देन व्यह्रियते वैष्णवेषु विष्णुशब्देन। तथा हि। श्रीसदाशिवस्य तावत् पशूनां पतये वृक्षाणां पतये मरुतां पतय इति विश्वाधिको रुद्र इति रुद्राध्याये सर्वाधिकत्वमुक्तम्। तथा श्वेताश्वतरोपनिषदि "एक एव रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिः" इति। तथा तत्रैव "तमीश्वराणां परमं महेश्वरं तं देवानां परमं च दैवतम्। पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्"। न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्। सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" इति। "विश्वस्मादिन्द्र इति। विश्व-स्मादिन्द्र उत्तर इत्येवमादीनां तु कर्माङ्गस्मारकाणां (करणाद्य) स्वार्थे तात्पर्याभावाद्देवताधिकरणन्यायेनार्थसिद्धिर्वाच्या। न च सा युज्यते, अनन्यपरोक्तवेदान्तविरोधात् इन्द्रस्य कर्मजन्यत्वश्रुतेश्च। एवञ्च कृतकत्वलिङ्गकानित्यत्वानुगृहीतया "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति जन्यत्वश्रुतेश्च। एवञ्च कृतकत्वलिङ्गकानित्यत्वानुमानानुगृहीतया "तद्यथेह कर्मजित" इति श्रुत्या विरोधात् "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति श्रुतिर्यथा यावत्प्रलयं सुकृतास्तित्वप्रतिपादनपराऽऽक्षीयते तथो-

कश्रुतिविरोधात् "विश्वकर्मा" इत्यादिश्रुतिः सङ्कुचितैश्वर्यं प्रतिपादयति। न तु निरङ्कुशम्।

ब्रह्मादयोऽपि लोकानां सर्गस्थित्यन्तहेतवः।
निग्रहानुग्रहं प्राप्ताः शिवस्य वशवर्त्तिनः॥
शिवः पुनर्न कस्यापि निग्रहानुग्रहास्पदम्।

तथा—

ईशानः सर्वविद्यानां स एवादिगुरुर्बुधाः।

इति पुराणवाक्यैरपि सदाशिवस्य सर्वेश्वरत्वं निर्णीयते।

लिङ्गपुराणेऽपि शिववाक्यम्—

त्रिधा भिन्नोऽस्म्यहं विष्णो ! ब्रह्मविष्णुभवाख्यया।
सर्गरक्षालयगुणैर्निष्कलः परमेश्वरः॥ इति।

कौर्मे—

ईश्वरगीतास्वीश्वरः।

अहं वै सर्वसंसारान्मोचको योगिनामिह।
संसारहेतुरेवाहं सर्वसंसारवर्जितः॥
अहमेव हि संहर्त्ता स्रष्टाहं परिपालकः।
मायावी मामिका शक्तिर्माया लोकविमोहिनी॥ इति।

जगज्जन्मादिकारणत्वरूपं ब्रह्मलक्षणं श्रीशङ्करस्योक्तम्। शतशः शिवस्य परमेश्वरत्वप्रतिपादकानि वाक्यान्युपनिषत्सु तदुपबृंहणपुराणेषु च दृश्यन्ते। न चैषां मोहशास्त्रत्वं युक्तमाश्रयितुम्। अध्ययनविध्युपात्तापौरुषेयोपनिषत्सु तदेकार्थत्वेन तन्मूलेषु "श्रावयेच्चतुरो वर्णान्" इति विध्युपात्तेषु शिष्टजनपरिगृहीतेषु पुराणेषु च तदयोगात्।

एषमोऽहं सृजाम्याशु यो जनान्मोहयिष्यति।
त्वञ्च रुद्र महाबाहो मोहशास्त्राणि कारय॥
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज।
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु॥

इत्यादीनि वाक्यानि नोपनिषद्विषयाणि। अपौरुषेयत्वेन तासां करणायोगात्। तदेकार्थानां च पुराणानां तन्मूलत्वेन तथ्यादिरूपत्वायोगात् न तद्विषयाणि, किं तर्ह्यसज्जनपरिगृहीतकापालिकपाशुपताद्यसच्छास्त्रविषयाणीति। न च तत्र तत्र शिवादिशब्दैः श्रीनारायण एवोच्यते विष्णुसहस्रनामस्तोत्रान्तर्गतानां तेषां तत्प्रतिपादकत्वदर्शनादिति वाच्यम्। उपक्रमोक्तं "अव्यक्तात्पुरुषः परः" इत्यत्र परत्वेन यः श्रीनारायणः प्रतिपादितः, अस्याश्चोपनिषदि तत्त्वं नारायणः पर

इत्युक्तः। तमेव तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति परत्वेनानूद्य महेश्वराभेदः प्रतिपाद्यते शिवमच्युतमिति शिवाभेदेन नारायणोपासनां विधातुमिति युक्तम्। यथा "विश्वं नारायणम्" इति सकलविश्वाभेदेन नारायणोपासनं विधातुं विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवतीत्युक्तम्। नह्यत्र विश्वशब्देन प्रत्यक्षवस्तुमात्रनिर्देशः। इदमित्यविशेषोपादानात्। यच्च किञ्चिज्जगत्सर्वमिति वाक्यशेषाच्च। यो वै वा व लोके एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्मेत्यत्र कर्मशब्दवत्। सत्यपि श्रीसदाशिवस्यापि शास्त्रान्तरैस्तुरीयत्वप्रतिपादनेऽत्र नारायणस्यैव पुनः पुनरभ्यासात् तस्यैव तुरीयत्वेन प्रतिपादनमाश्रित्योपासनं विधीयत इति युक्तम्। एवं यत् किञ्चिज्जगदित्यादिना सर्वात्मत्वेन प्रतिपादयिष्यमाण एव, अणोरणीयान्महतो महीयानात्मेति सर्वात्मत्वेनोक्तस्य तमिति सर्वनामनिर्देशपूर्वकमीशाभेदः प्रतिपाद्यते। सामानाधिकरण्यात् अभेदोपासनं विधातुम्। ईशमित्यस्य सत्यपि द्वितीयान्तत्वेऽव्यवहितपश्यतिनान्वयेन व्यवहितोपासनयाऽनन्वयात्। पश्यतेश्च ज्ञानमर्थो नोपासनम्। अतोऽयं मन्त्रो विधास्यमानोपासनायाः सद्वारकफलनिर्देशः। एवं "यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः" इतिमन्त्रे रुद्रशब्दो रुद्रवैदिकशब्दस्तत्प्रतिपाद्य इत्येवं तावत् पूर्वाचार्यैर्व्याख्यातः। रुद्रार्थग्रहणेऽपि प्रथमान्तत्वेन न कल्पयिष्यमाणभावनयान्वेति कारकाणां क्रियान्वयात् "स नो देवः शुभया स्मृत्या संयुनक्तु" इति संनिहितेनान्वयाच्च। महर्षिशब्दस्य च पुराणेषु "धर्मस्य दक्षदुहितुर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशान्तः" इत्येवं श्रीनारायण एव प्रसिद्धः सामानाधिकरण्येनाभेद एव प्रतिपाद्यते, इत्यपि वक्तुं शक्यं पूर्ववत्, न च पुनः पुनरभेदाभिधानवैयर्थ्यम्। तत्त्वमसीति नवकृत्वःपाठवद्वेदपाखण्डनिरासकत्वात्। एवं चोपक्रमोपसंहारलिङ्गैरुदाहृतवाक्यानामुमापतिप्रतिपादकत्वदर्शनात्। न हि तत्र रमापतिप्रतिपादने किञ्चिल्लिङ्गमस्ति। स्तोत्रान्तर्गतानामेव तादृशशब्दानां तत्प्रतिपादकत्वं न सर्वत्र। अत एव विश्वादिशब्दानां स्तोत्रान्तर्गतानां तत्प्रतिपादकत्वेऽपि विश्वादिशब्दस्वरूपापक्षयोद्देशेन सर्वदा न तत्प्रयोगः शिष्टानां दृश्यते। तत् सिद्धं श्रीसदाशिवः परमेश्वर इति तत्र श्रूयत इति। तथा श्रीनारायणस्यापि परमेश्वरत्वं तत्र तत्रोपनिषत्सु मन्त्रार्थवादेषु पुराणेषु चोमापतेरिव श्रूयते—

तथाहि।

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं प्रभुम्॥
विश्वतः (१)परमं नित्यं विश्वं नारायणं हरिम्।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति॥
पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्।
नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥
नारायणपरो ज्योतिरात्मा नारायणः परः॥
नारायणपरं ब्रह्म तत्त्वं नारायणः परः।
नारायणपरो ध्याता ध्यानं नारायणः परः॥
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥
अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशम्भुवम।
पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्॥
अधोनिष्ठ्यावितस्त्यान्ते नाभ्यामुपरि तिष्ठति।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥
सन्ततं शिराभिस्तु लम्बत्याकोशसन्निभम्।
तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्॥
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः।
सोऽग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः॥
तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतताः।
सन्तापयति स्वंदेहमापादतलमस्तकम।
तस्य मध्ये वह्निशिखाणीयोर्ध्वा व्यवस्थिता॥
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीताभा स्यात्तनूपमा॥
तस्याः शिखाया मध्ये तु परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्॥ इति।

अत्र सहस्रशीर्षं देवमित्यादीनामनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशम्भुवमित्यन्तानां द्वितीयान्तपदानामन्तर्यामिपरमात्मविशेषणता बृहदारण्यके श्रीमद्भाष्यकारादिभिरुक्ता। य ईशः ईश्वरः नारायणाख्य इति भाष्यम्।

एतमेव समुद्दिश्य मन्त्रो नारायणात्मकः।
वेदविद्भिर्महाप्राज्ञैः पुरुषैर्विनियुज्यते॥

---

(१) परमाभित्यामिति मुद्रितोपनिषदि पाठः।

इति वार्तिकम् । अत्रानन्दगिरयः सहस्रशीर्षं देवं विश्वशम्भुवमित्यादिमन्त्रो वेदार्थविद्भिरन्तर्यामिणमुद्दिश्य विनियुक्तोऽतः स वैदिक इत्यर्थ इति । अस्मिंश्च प्रकरणे "अणोरणीयान्महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्" इति मन्त्रे गुहायां निहितः=इत्यन्तर्यामिनिर्देशः, ईशमिति परमात्मोच्यते । एवञ्च सहस्रशीर्षत्वादिगुणविशिष्टोऽन्तर्यामी ज्ञेयत्वेनैषु प्रतिपाद्यते इत्युक्तं भवति । ज्ञानस्य च ध्यानमन्तरेणासम्भवाज्ज्ञेयवस्तुध्यानम्, "दहरं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्" इति मन्त्रेणोक्तम् । दहरं गगनमिति शब्दो (१)दहराधिकरणन्यायेन "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुत्युक्तमायाशबलेश्वरं प्रतिपादयतः । अत एवानन्तरश्रुतिः ।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ इति ।

स्वरः=प्रणवः । एवं सति मायाशबलमेव चैतन्यं सत्त्वोपाधिना रमापतिशब्दाभिधेयं ज्ञेयत्वेन ध्येयत्वेन चास्यामुपनिषदि (२)निर्दिश्यते । अत एव विद्यारण्यैः सहस्रशीर्षमिति पूर्वार्द्धे उक्ताविराट्रूपदेहावस्थितमहेश्वरस्य निजस्वरूपम्, उत्तरार्द्धेन विश्वं नारायणमित्यनेनोच्यत इत्युक्त्वान्ते तस्याः शाखाया मध्ये, इत्यत्र सहस्रशीर्षमित्यादिवाक्यप्रतिपाद्यं तत्त्वं "पद्मकोशप्रतीकाश"मित्यादिप्रकारेणोपासीतेति तात्पर्यार्थ इत्युक्तम् । नचाभिधानकोशलोकप्रसिद्धिभ्यां महेश्वरत्वस्य शिवासाधारणत्वादुमापतेरेवात्रोपासनं विधीयते न रमापतेरिति वाच्यम् । शिवासाधारणत्वासिद्धेः । आनुशासनिके हि गिरिजापतिरीरितवान्मुनीन् प्रति । "परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः" । इति

किञ्च । महेश्वरशब्दस्य प्रोक्षणीशब्दवद्योगेनैव प्रवृत्त्युपपत्तौ रूढिकल्पने प्रमाणाभावः । अभिधानकोशलोकप्रसिद्ध्योः पङ्कजशब्दवत्प्रयोगबाहुल्यादप्युपपत्तेः । यौगिकस्यापि पङ्कजशब्दस्य प्रयोगबाहुल्यात् पद्मवाचित्वप्रसिद्धिरित्याहुः विवरणाचार्याः । पद्मत्वस्येवोमापतित्वस्य लक्षणयोपस्थित्युपपत्तौ रूढिकल्पने गौरवात्, अनन्यलभ्यः शब्दार्थ इति न्यायात् । अत एव गीताभाष्ये वैष्णवो मायायां प्रमाणत्वेन "मायां

(१) उ० मी० अ० १ पा० ३ अधि० ५ सू० १४
(२) नारायणोपनिषदीत्यर्थः ।

तु प्रकृतिं विद्यात्” इति श्रुतिरुदाहृता। महेश्वरशब्दस्योमापतौ रूढत्वे रौद्र्यामेव मायायामस्य वाक्यस्य प्रामाण्यम् न तु वैष्णव्यामिति मदमुदाह्रियेत। किञ्च अस्यां श्रुतौ विद्यादित्यस्यानुषङ्गान्मायोपहितस्य महेश्वरशब्दव्यवहार्यत्वं ज्ञेयत्वेन प्रतिपाद्यते। मायोपहितत्वञ्च हरिहरयोरविशिष्टं श्वेताश्वतरोपनिषदि “य एको जालवानीश” इत्यत्र मायिवाचकजालवच्छब्देनोमापतेरन्तर्यामित्वस्य प्रतिपादनात्। नृसिंहतापनीये च “माया वा एषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति” इति मायायाः वैष्णवीत्वोक्तेः। “दैवी ह्येषा गुणमयी मम माया दुरत्यया” इति गीतोक्तेश्च। “अहो विचित्रा महती शिवस्य विष्णोः परा मोहकर्त्री तु माया” इति ब्रह्मवैवर्त्ते उभयसम्बन्धित्वव्यपदेशाच्च। न च रमोमारमणयोर्द्वे माये स्तः। एकां गां दक्षिणां दद्यादितिवत् “अजामेकाम्” इत्यत्राजानुवादेनैकत्वविधानात्। तस्मान्महेश्वरशब्दप्रवृत्तिनिमित्तस्य मायित्वस्योभयोरविशेषात्तयोरुभयोर्महेश्वरत्वम्। एवञ्च “महेश्वरस्त्र्यम्बक एव नापर” इति लोकप्रसिद्ध्यादिवशात् महेश्वरशब्दस्य लोके नीलकण्ठे रूढत्वेऽपि त्रिवृदादिशब्दवच्छ्रुतौ परमात्ममात्रपरत्वम्। यदि चात्र महेश्वरशब्दबलात् त्रिलोचनोपासनाविधिराश्रियेत तदा तस्य लोकप्रसिद्धत एव शिवात्मत्वसिद्धेः “स शिवः” इति व्यर्थं स्यात्। कैवल्योपनिषदि तु उमासहायपरमेश्वरध्यानफलभूतब्रह्मावाप्तिसमस्तसाक्षि तमसः परस्तादिति निर्दिश्य पठितम्। “स ब्रह्मा स शिवः” इत्यादि। तत्र तमसः परं सर्वसाक्षिचिन्मात्रं तच्छब्देनोद्दिश्य सर्वात्मत्वप्रतिपादनं युक्तम्। “तमसः परस्तात्” इत्येतद्धि पूर्वाचार्यैर्व्याख्यातम्, आवरणविक्षेपशक्तिरूपाया अविद्यायाः परस्तात् अविद्याशून्यमित्यर्थ इति। युक्तञ्चैतत्। ध्यानस्य परममुक्तिसाधनत्वे महाफलत्वात्। यदि च प्राणशरीर इतिवद् भूतयोनिपदं बहुव्रीह्याश्रयणेन यौगिकं स्यात् तर्हि सन्निहितमुमापतिमाश्रयेत्, नचैवं, षष्ठीतत्पुरुषत्वात्। इहञ्च “यत्तदद्रेश्यमग्राह्यम्” इत्युपक्रम्य पठितस्य भूतयोनिपदस्य निर्विशेषब्रह्मपरत्वम् “अदृश्यत्वादिगुणको धर्मोक्तेः” इति न्यायात(१)। दहरविद्यात्वेनार्चिरादिमार्गोपसंहारवत् निर्विशेषब्रह्मप्राप्तेरर्वाक् तादृशविग्रहवद्ब्रह्मप्राप्त्युपसंहाराच्च ध्येयप्राप्यभेदकृतः कश्चिद्विरोधः। न च “स ब्रह्मा स शिवः” इत्यादिश्रुतिसाम्यात् कैवल्योपनिषद्वदिहमप्युपनिषदुमापत्युपासनं विधत्ते इति शङ्क्यम्। सत्यपि किञ्चित्साम्ये “सहस्र-

(१) ब्र० मी० अ० १ पा० २ अधि० ६ सू० २१

शीर्षम् "उमासहायम्" इत्युपक्रमभेदादभ्युदितोहिन्यायेन विद्याभेदस्यैव युक्तत्वात् । उमापत्युपासनविधिपरत्वे सहस्रशीर्षमित्याद्यनेकद्वितीयान्तशब्दवैयर्थ्याच्च । अथोपासनक्रियान्वयाभावेऽपि "तद्विश्वमुपजीवति" इति विश्वकर्तृकोपजीवनक्रियान्वयान्न वैयर्थ्यमिति चेत् । न । उपास्यसमर्पकत्वेन विधित्वे सम्भवति उपजीवतिक्रियान्वयाश्रयणेनार्थवादत्वाश्रयणस्यान्याय्यत्वात् । किञ्च परमत्वादेरर्थस्य पुनरुक्तिर्व्यर्थत्वाच्च दोषायेत्युक्तं पूर्वाचार्यैः । तद्विश्वमुपजीवतीति क्रियासम्बन्धे तु पुनरुक्तिर्व्यर्था स्यात् । किञ्च पुरुषस्तद्विश्वमुपजीवतीतिकर्त्रा पुरुषेणाव्यवहितेन विश्वेन कर्मणोपजीवतिक्रियासम्बन्धेन व्यवहितकर्मसम्बन्धो न्याय्यः, अत एव पूर्वाचार्यैर्यदिदं विश्वमिदानीमज्ञानदृष्ट्या दृश्यते, तत्सर्वं वस्तुतः परमात्मैव, स च परमात्मा विश्वमुपजीवति, स्वस्य व्यवहारार्थमुपजीवतीत्युक्तम् । युक्तं चैतत् । विश्वं नारायणमिति सामानाधिकरण्येन जडरूपताप्रसक्तौ तन्निराकरणस्य न्याय्यत्वात् । सर्वद्वितीयान्तानामुपजीवतिक्रियासम्बन्धे प्रथमचरममन्त्रपरित्यागेन मध्ये, उपजीवतिक्रियापाठस्य निस्तात्पर्यत्वात् । तस्माद् द्वितीयान्तानामुपास्यदेवतासमर्पकत्वमेव युक्तम् । न चैवमपि द्वितीयान्तपदमध्ये प्रथमान्तपदयुक्तयोर्नारायणपरं ब्रह्मेत्यादिमन्त्रयोः पाठो व्यर्थ इति वाच्यम् । उपासनाया विषययाथार्थ्यनियमाभावेन विषयासिद्धिशङ्कायां तत्सिद्ध्यै प्रथमान्तपाठात् । मध्योक्तिस्त्वर्थवादत्वभ्रमनिवृत्त्यर्था, अन्ते हि पाठेऽर्थवादत्वबुद्धिः स्यात्, अज्ञातोपास्यसमर्पणावसरपठितयोस्तु तत्साहचर्यात् प्रयाजाभ्यत्यभिक्रमणस्याङ्गत्वमिवाज्ञातार्थपरत्वं सिध्यतीति तत्र पाठः । नन्वेवमपि "तदुपासितव्यम्" इत्यनेन विहितमुपासनमनूद्य सहस्रशीर्षत्वाद्यनेकगुणविधाने वाक्यभेदः स्यादिति चेत् । "विष्णवे शिपिविष्टाय" इतिवत्सामानाधिकरण्येन विशिष्टैककारकविधानात् । तस्मिन्नुपास्यस्य दहरं विपापमिति मन्त्रे गगनशब्देनानुवादः, उपासनामात्रं तु विधीयते । अत एव महेश्वरशब्दोदितोमापतेरुपास्यस्योत्पत्तिशिष्टत्वेन सहस्रशीर्षेत्यादिनोपास्यसमर्पणं न सम्भवतीति, अपास्तम् । पशुत्वस्य सत्यप्युत्पत्तिशिष्टत्वेऽजत्वादिविशेषाश्रयण इव गगनशब्दोक्तमायाशबलस्य नारायणरूपविशेषरूपेणोपासने बाधकाभावाच्च । महेश्वरशब्दस्य मन्त्रान्तरे पाठाच्च । तद्यौगिकत्वादेरुक्तत्वाच्च । वस्तुतस्तु "य एवं विद्वानमावास्यां यजते" "य एवं विद्वान् पौर्णमासीं यजते" इति सत्यपि प्रत्यक्षवाजिश्रवणे "यदाग्नेयोऽष्टाकपाल" इत्यत्रा

नेकगुणश्रवणाद् द्रव्यदेवतासम्बन्धकल्पितविशिष्टयागविधानमाश्रित्य यथा तस्यानुवादत्वमाश्रीयते । एवं "सहस्रशीर्षमित्यादिमनन्तमव्ययं कविं समुद्रेन्तं विश्वशम्भुवमित्यन्तानां" पद्मकोशप्रतीकाशमित्यादिना समभिव्याहारात् तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिव इत्यादेरन्ते श्रवणाद् द्रव्यदेवतावच्चोपास्यहृदययोरुपासनारूपक्रियासंबन्धित्वात् तत्सम्बन्धकल्पितमनेकगुणविशिष्टमुपासनमत्र विधीयत इत्यवश्यं वक्तव्यम् । शिखामध्यस्थस्वस्य ब्रह्मादिविभूतिमत्त्वस्य प्राप्तत्वेन "दहरं विपापम्" इति मन्त्रसिद्धोपासनानुवादेन विधाने वाक्यभेदस्य वज्रलेपायितत्वात् । अत एव दीपिकायां तस्याः शिखाया इति मन्त्रे उक्तप्रकारेण ध्यायेदिति तात्पर्यार्थ इत्युक्तम्। "दहरं विपापम्" इतिमन्त्रे च उपासनमुच्यत इत्येवोक्तं न तु विधीयत इति। उचितं चैतत् । आघाराग्निहोत्राधिकरणादिन्यायेन भावनाया विधिसम्बन्धस्य स्थितत्वात् । धात्वर्थादीनां तद्द्वारेण तत्सम्बन्धात् । कृदन्तेषु भावनानभिधानात् ।

यथाहुः—

धात्वर्थकारकैरेव गुणभूतोऽवगम्यते ।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते ॥ इति ।

श्रेयःसाधनाविधिपक्षेऽपि कटस्त्वया कर्तव्यो ग्रामो गन्तव्य इत्यादिषु कर्मपरेषु न विधिराश्रयेन सम्भवतीत्युक्तं द्वितीयवर्णके । अन्योपसर्जनस्यान्येनानन्वयात् । "स्वाध्यायोऽध्येतव्य" इत्यादौ तु अपूर्वत्वेनागत्या तदाश्रयणम् । तस्मान्नारायणीयसमाख्योपनिषद्यस्यां सहस्रशीर्षमित्यादिनाऽनेकगुणविशिष्टनारायणकर्मिका, निहितोऽस्य अन्तोरिति षष्ठ्यन्तजन्तुशब्दोपास्थितजन्तुसम्बन्धिहृदयपद्मकोशाधिकरणिकोपासना विधीयत इति सिद्धं तस्यैवोपास्यविशिष्टत्वम् । एवं सति सर्वे शब्दा नाञ्जस्येनोपपद्यन्ते । इतरथा ध्यायेदिति कल्पितक्रियान्वयासिद्ध्यर्थं प्रथमान्तौ महेश्वररुद्रशब्दौ द्वितीयान्तत्वेन विपरिणमयितव्यौ स्याताम् । यच्चऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलमितिवचनं तस्यानुवाकान्तरे श्रवणान्नमस्काराख्यक्रियान्तरान्वयात्पद्मकोशेत्यादिनाऽसमभिव्याहाराच्च नोपासनाश्रय इति न तेनापि विरोधः । शिवपदस्य सत्यपि द्वितीयान्तत्वे तदनुवाकपाठे च नारायणपदस्यासकृच्छ्रुतत्वेनाभ्यासे भूयस्त्वमर्थस्य भवतीति न्यायेन प्राधान्यात् नारायणस्यैव शिवाभेदेनोपासनं सामानाधिकरण्यात् । एवञ्च महेश्वरेशरुद्रशब्दानां रूढत्वाङ्गीकारेऽपि न बाधकम् । तथा हि ।

विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः ।
ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुः ।
नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ।
नारायणः परो ऽव्यक्तात्—

इत्याद्युपबृंहणात्सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद‑मित्युपक्रमाच्च महतः परमव्यक्तमित्युपसंहरणार्थत्वात् । तस्मा‑द्विश्वमेवेदं पुरुष इत्यत्र विश्वाभेदोक्तिवत् महेश्वरादिशब्दयुतवाक्येषु विष्णुशिवयोरभेदः प्रतिपाद्यते । अयं तु विश्वाभेदाच्छिवाभेदस्य विशेषः । विश्वं कल्पितं तस्य वास्तवं स्वरूपं नारायणः, अधिष्ठान‑त्वात् । भुजङ्गस्येव रज्जुः । सोऽयं विश्वाभेदः । नैवं शिवाभेदः, किन्तु जीवेश्वरयोरिव, यथैव ह्येकस्यैवात्मन उपाधिभेदात्, जीवेश्वरभेदः । एवमेकस्यैव मायाशबलस्य परमात्मनस्तत्तद्गुणोपाधिकः शिवविष्णु‑भेद इति न तयोरीश्वरत्वे कश्चिद्विशेषः । तथा च मैत्रायणीयोपनिषच्छ्रुतिः। "अथ यो ह खलु वाव अस्य तामसोंऽशः, असौ च ब्रह्मचारिणो योऽयं रुद्रः, अथ यो ह खलु वावास्य राजसोंऽशः, असौ च ब्रह्मचारिणो योऽयं ब्रह्मा, अथ यो ह खलु वावास्य सात्त्विकोंऽशः असौ च ब्रह्मचारिणो योऽयं विष्णुः, स वा एष एकः त्रिधाभूत" इति । अत एवोपबृंहणमपि उभयोः सर्वोत्कर्षमविशेषेण वर्णयति । शिवोत्कर्षस्तावद् ब्रह्मादयो हि लोकानां सर्गे त्यादिबहुकमधस्तात् । श्रीनारायणोत्कर्षोऽपि महाभारते मोक्षधर्मेषु ।

सब्रह्मकाः सरुद्राश्च सेन्द्रा देवाः महर्षिभिः ।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् ॥ इति ॥
न हि विष्णुः प्रणमति कस्मैचिद्विबुधाय च ।
आनुशासनिके श्रीशङ्करवचनम् ।
अहञ्चैव नमस्यामि नित्यमेव जगत्पतिम् ॥ इति ।

नारायणीयेपि न हि विष्णुः पुरा नमतीति । तथा किमेकं दैवतं लोके इतिप्रश्ने—

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ॥ इति ।
हरिरेवैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक एव नापरः ।

इत्याद्या लोकप्रसिद्धिश्चाविशिष्टा ।

भगवतीश्वरस्य पुरुषोत्तमत्वं पुरुषेष्वमुत्तमस्य च महेश्वरत्वम् । तथा एक एव रुद्रो न द्वितीयोऽवतस्थ इति वत् "एको दधार भुव नानि विश्वा" इति वैदिकी प्रसिद्धिः । न चैवं परस्परविरोधः ।

त्रिधाभिन्नोऽस्म्यहं विष्णो ! ब्रह्माविष्णुभवाख्यया ।

एकमेव विजानीध्वं ततो यास्यथ निर्वृतिम् ॥
न विशेषोऽस्ति रुद्रस्य विष्णोश्चामरसत्तम ।
रुद्रो नारायणश्चेति सत्त्वमेकं द्विधा कृतम् ।

इत्येवं क्रमेण लिङ्गपुराणकूर्मपुराणहरिवंशमोक्षधर्मादिपर्य्यालोचनयाऽभेदस्यैव वस्तुतोऽभिप्रेतत्वात् । सत्त्वमेकमित्यत्र सत्त्वशब्देन स्वाश्रयाश्रयामोहकमायाभिप्रेता । द्विधाकृतमिति गुणकृतो भेदोऽभिप्रेतः । तथा—

वाराहेऽपि,

या श्रीः सा गिरिजा प्रोक्ता यो हरिः स त्रिलोचनः ।
एवं सर्वेषु शास्त्रेषु पुराणेषु च शस्यते ॥
यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्मा सोऽहमेव च ।
वेदत्रयेऽपि यज्ञेऽस्मिन् पण्डितेष्वेष निर्णयः ॥
अहं यत्र शिवस्तत्र शिवा यत्र वसुन्धरे ।
तत्राहमपि तिष्ठामि आवयोर्नान्तरं क्वचित् ॥ इति ।

बृहन्नारदीयेऽपि—

ये शिवे परमेशाने विष्णौ च परमात्मनि ।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः ॥
हरिं हरं विधातारं यः पश्येदेकरूपिणम् ।
स याति परमानन्दं शास्त्राणामेष निर्णयः ॥
रुद्रो वै विष्णुरूपेण पालयत्यखिलं जगत् ।
ब्रह्मरूपेण सृजति तदन्ते च स्वयं हरिः ॥ इति ।

स्कन्दपुराणेऽपि—

यथा शिवस्तथा विष्णुर्यथाविष्णुस्तथा उमा ।
उमा यथा तथा गङ्गा चतूरूपेण भिद्यते ॥ इति ।

ईश्वरगीतासु पार्वतीं प्रति वचनम् ।

ये त्विमं विष्णुमव्यक्तं मां वा देवं महेश्वरम् ॥
एकीभावेन पश्यन्ति न तेषां पुनरुद्भवः ।
तस्मादनादिनिधनं विष्णुमात्मानमव्ययम् ।
मामेव सम्प्रपश्यध्वं पूजयध्वं तथैव हि ॥ इति ।

वनपर्वणि—

शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे ॥ इति

आनुशासनिकस्थसहस्रनामभाष्ये श्रीमद्भाष्यकारैरुदाहृतं पौराणवचनम् ।

सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम् ।
स संज्ञां याति भगवान् एक एव जनार्दनः ॥ इति ।

श्रीभागवतेऽपि— [स्क० ४ अ० १ श्लो० २८]

एको मयेह भगवान् विविधप्रधानै
श्चित्तीकृतः प्रजननाय कथं नु यूयम् ॥
अत्रागतास्तनुभृतां मनसोऽपि दूरा
ब्रूत प्रसीदत महानिह विस्मयो मे ॥

इत्यत्रिणोक्ते— [स्क० ४ अ० १ श्लो० ३०]

यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा ।
सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायसि ते वयम् ॥

इति ब्रह्मविष्णुशिवानां वचनं त्रयाणामभेदं स्फुटं दर्शयति । हरिहरयोर्विषमदृष्टीनां जनितस्वगतबहुतरदुरितसृष्टीनां मन्दानां निन्दा चाभाणि तत्र तत्र ।

वाराहे तावत्—

विष्णुं रुद्रात्मकं ब्रूयाच्छ्रीगौरीति निगद्यते ।
एतयोरन्तरं यश्च ब्रूयात् सोऽधम उच्यते ॥
तं नास्तिकं विजानीयात् सर्वधर्मबहिष्कृतम् ।
यो भेदं कुरुतेऽस्माकं त्रयाणां द्विजसत्तम ! ॥
स पापकारी दुष्टात्मा दुर्गतिं समवाप्नुयात् ॥ इति ।

बृहन्नारदीयेऽपि ।

हरिरूपधरं लिङ्गं लिङ्गरूपधरो हरिः ।
ईषदप्यन्तरं नास्ति भेदकृत् पापमश्नुते ।
अनादिनिधने देवे हरिशङ्करसंज्ञिते ॥
अज्ञानसागरे मग्नं ते कुर्वन्ति हि पापिनः ।
हरिशङ्करयोर्मध्ये ब्रह्मणश्चापि यो नरः ॥
भेदको नरकं भुङ्क्ते यावदाचन्द्रतारकम् ॥ इति ।

स्कान्देऽपि ।

विष्णुरुद्रान्तरं यच्च श्रीगौर्योरन्तरं तथा ।
गङ्गागौर्य्यन्तरं यच्च यो ब्रूते मूढधीस्तु सः ॥
रौरवादिषु घोरेषु नरकेषु पतत्यधः । इति ।

ईश्वरगीतास्वपि ।

ममैषा परमा मूर्तिर्नारायणसमाह्वया ।
सर्वभूतात्मभूता सा शान्ता चाक्षरसंज्ञिता ॥

ये त्वन्यथा प्रपश्यन्ति लोके भेददृशो जनाः ।
न ते मां सम्प्रपश्यन्ति जायन्ते च पुनः पुनः ॥
ये त्वन्यथा प्रपश्यन्ति मत्वैवं देवतान्तरम् ।
ते यान्ति नरकान् घोरान् नाहं तेषु व्यवस्थितः ॥ इति ।

यत्र—

अहमेव परं ब्रह्मपरत्वं हि पितामह ।
अहमेव परं ज्योतिः परमात्मा त्वहं विभुः ॥

इति विष्णुना ब्रह्माणं प्रति उक्ते शिवस्य "संमोहं त्यज विष्णो! त्वम्" इति लैङ्ग वचनं, न तेन कश्चिद् विष्णोरपकर्षः सिध्यति ।

यत्पादसेवोर्जितयात्मविद्यया
हित्वा जनाद्यात्मविपर्ययग्रहम् ॥
लभन्त आत्मीयमनन्तमैश्वरं
कुतो नु मोहः परमस्य सद्गतेः ।

इति श्रीभागवतोक्त्या "स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्य-स्मृत्यनवकाशदोषप्रसङ्गा"दितिन्यायावतारात् । लिङ्गपुराणे च मायाशब-लस्यैव गुणविशेषोपाधिभिर्विष्ण्वादिरूपत्वं बहुधोक्तम् ।

हिरण्यगर्भो रजसा तमसा शङ्करः स्वयम् ।
सत्त्वेन सर्वगो विष्णुः सर्वात्मा तु महेश्वरः ॥ इति ।

अत्र रजसोपहिते हिरण्यगर्भशब्द उपचारितः । हिरण्यगर्भस्येश्व-राद्भिन्नत्वेनाचार्यैः प्रतिपादनात् । अत एव—

कूर्मपुराणे ।

प्रजापतेः परा मूर्तिरितीयं वैदिकी श्रुतिः ।
ब्रह्माण्डमेतत्सकलं सप्तलोकतलान्वितम् ॥

इति विराजमुक्त्वा—

द्वितीयं तस्य देवस्य शरीरं परमेष्ठिनः ।
हिरण्यगर्भो भगवान् ब्रह्मा वै कनकाण्डजः ॥

इति हिरण्यगर्भं निर्दिश्य—

तृतीयं भगवद्रूपं प्राहुर्वेदार्थचिन्तकाः ॥
रजोगुणमयं यद्वै रूपं तस्यैव धीमतः ।
चतुर्मुखोऽसौ भगवान् जगत्सृष्टौ प्रवर्तते ॥ इति उक्तम् ।

अत एव हिरण्यगर्भस्य स्रष्टृत्वेऽपि न जगत्स्रष्टृत्वं भूतजन्यत्वेन तदस्रष्टृत्वात् ।

सृष्ट्यन्ते पाति सकलं विश्वं वै विश्वतोमुखः ।

सत्त्वं गुणमुपाश्रित्य विष्णुर्विश्वेश्वरः स्वयम् ॥
अन्तकाले स्वयं देवः सर्वात्मा परमेश्वरः ।
तमोगुणं समाश्रित्य रुद्रः संहरते जगत् ॥

इत्युक्त्वा गुणोपाधिकानां तत्पदार्थत्वं न प्रजापतिहिरण्यगर्भयोरित्याशयेनोक्तम्—

एकोऽपि सन्महादेवस्त्रिधासौ समवस्थितः ।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरञ्जनः ॥ इति ।

सर्वात्मत्वे महेश्वर इति लक्ष महेश्वरशब्देन "मायिनं तु महेश्वरम्" इति श्रुतिसिद्धं मायोपहितमुच्यते। एवं च मायोपहितस्यैव त्रिरूपत्वान्मायायाश्च स्वाश्रयान्यामोहकत्वान्न किञ्चिद्गुणकृतं वैषम्यं मन्तव्यमित्यर्थः। एवञ्च संमोहशब्देन संमुह्यतेऽनेनेति व्युत्पत्त्या अहमेव परं तत्त्वमिति पूर्वश्लोकस्यैव काराभिहितमवधारणं निर्दिश्य निराक्रियते त्रयोऽपीश्वराः, न त्वेक एवेति । कथमन्यथा भगवान् बादरायणो विष्णुर्विश्वेश्वरः स्वयं सर्वात्मा परमेश्वरो रुद्र इति वदेत्, तस्मादभेद एवानयोर्युक्तः। तथा च नृसिंहतापनीयश्रुतिः । "ॐ तासत् ऋतं सत्यं परब्रह्म पुरुषं [नृकेसरिविग्रहं कृष्णपिङ्गलम् । ऊर्ध्वं रेतं विरूपाक्षं शङ्करं नीललोहितम्" इति । अत्र प्रह्लादाह्लमकाह्लादकरश्रीनृसिंहविग्रहं नारायणवाचकनृकेसरिशब्दस्य गिरिशपरकृष्णपिङ्गलादिशब्दानाञ्च सामानाधिकरण्यं मायाशबलत्वेन द्वयोरभेदं ज्ञापयति । तदुपपादनाय च परब्रह्मशब्देन परब्रह्मत्वं नारायणस्योच्यते । एवञ्च "नारायणपरब्रह्मेति प्रकृतोपनिषद्वाक्यं नारायणश्चासौ परब्रह्मेति कर्मधारय एवाश्रयणीयः, न तु नारायणात् परब्रह्मेति तत्पुरुषः, श्रुत्यन्तरेण स्पष्टं नारायणस्य परब्रह्मत्वोक्तेः । निषादस्थपतिन्यायेन (पू० मी० अ० ६ पा० १ अधि० १३ सू० ५१-५२) कर्मधारये सम्भवति तत्पुरुषस्यान्याय्यत्वाच्च । पितृयज्ञाधिकरणन्यायेन च सामानाधिकरण्यस्यैव वेदेषु युक्तत्वात् । उक्तानेकवचनस्य उभयोः साम्याच्च । वेदभाष्यकारैश्चैतद्व्याख्यानावसरे दीपिकायामुक्तम्, पुराणेषु नारायणशब्देन व्यवह्रियमाणो यः परमेश्वरः स एव परमुत्कृष्टं सत्यज्ञानादि वाक्यप्रतिपाद्यस्य ब्रह्मणस्तत्त्वम्, अतो नारायणः पर एवात्मा नत्वपरो मूर्तिविशेष इति । अतएव महाज्ञेयमित्यत्रापि महांश्चासौ ज्ञेयश्चत्येव विग्रहः, न तु भवादिनामाष्टकान्तर्गतमहच्छब्दस्य शम्भुपरत्वदर्शनान्महाच्छम्भुर्ज्ञेयो यस्येत्येवं विग्रहः, अन्यपदार्थोपस्थितिसापेक्षबहुव्रीहितस्तन्निरपेक्षसमानाधिकरणसमासस्यैवोचितत्वात् । "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते

वासुदेवः सर्वम्" इति बहुजन्मार्जितपुण्यपुञ्जविशुद्धान्तःकरणस्य पुंसो ज्ञेयत्वेनोक्तस्य वासुदेवस्य ज्ञेयान्तरासम्भवाच्च । सत्यपि महच्छब्दस्य पार्वतीशपरत्वे शिवशब्दस्य सदाशिवेऽत्यन्तं प्रसिद्धत्वात् भीमो भीमसेन इतिवच्च नामैकदेशे नामग्रहणमित्यपि सम्भवाच्छिवमच्युतमिति सामानाधिकरण्येनाभेदावगतौ सत्यां "वेदो वा प्रायदर्शनात् (पू० मी० अ० ३ पा० ३ अधि० १ सू० २) इति न्यायेन ऋगादिशब्दवन्महाज्ञेयमित्यत्राप्यभेदसमासो युक्तः पदावधारणे समभिव्याहाररूपवाक्यस्य प्रामाण्यात् ।

यथाहुः—

पदावधारणोपायान् बहूनिच्छन्ति सूरयः ।
क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः ॥ इति ।

एवं चाश्वो गच्छतीत्यत्र गच्छतिसमभिव्याहाराद् यथाश्व इति सुबन्तमेव न तु तिङन्तम् । तथाभेदसमभिव्याहारादभेदसमास एव युक्तः । किञ्च । भवादिनामाष्टकान्तर्गतस्यैव महच्छब्दस्य भवपरत्वं न सर्वत्र, महाब्राह्मण इत्यादौ महत्त्वमात्रप्रतिपादनात् । विश्वादिशब्देषु विष्णुसहस्रनामान्तर्गतेषु तथा दर्शनाच्च । अन्यथा रुद्रादिशब्दानां विष्णुसहस्रनामसु पाठाद् रुद्राध्यायादीनां विष्णुपरत्वापातः । व्याख्यातञ्च महाज्ञेयपदं पूर्वाचार्य्यैः' तत्त्वेषु प्रौढत्वान्महाज्ञेय इति । एवं "नारायणपरो ज्योति"रित्यत्रापि अभेदसमासो युक्तः । नारायणपदसामानाधिकरण्येन परशब्दे पुल्लिङ्गनिर्देशसम्भवाच्च । पञ्चमीसमासाश्रयणे ज्योतिःपदसामानाधिकरण्येन नपुंसकोक्तिप्रसङ्गात् । सति सम्भवे छान्दसत्वस्यायुक्तत्वाच्च । उक्तञ्च पूर्वाचार्य्यैः । परो ज्योतिर्यदेतदुत्कृष्टं ज्योतिः, छन्दोगैः परं ज्योतिरुपसम्पद्येत्याम्नातम्, तदपि नारायण एव । तस्मान्नारायणः परमात्मेति । अस्माच्च ग्रन्थात् "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते" इति छन्दोगश्रुतिरपि परञ्ज्योतिः शब्देन नारायणं वदतीत्याचार्य्याभिप्रायो गम्यते । युक्तश्चैषः, स उत्तमः पुरुष इत्यादिवाक्यशेषात् । श्रीमद्भाष्यकृद्भिश्चैतद्व्याख्यानावसरे छान्दोग्यभाष्य उक्तं कृतनिर्वचनो गीतास्विति । तत्र चानन्दगिरीयम् । यथोक्तोत्तमपुरुषे भगवत्सम्मतिं करोति । कृतेति ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।
[गी० अ० १५ श्लो० १६-१८] ।

इति स भगवान् ऊचिवानिति । "उत्तमः पुरुष" इत्यत्र श्लोके गीताभाष्यम् । उत्तमः=उत्कृष्टतमः पुरुषस्तु अन्यः=अत्यन्तविलक्षणः, आभ्याम् । परमात्मेति=परश्चासौ देहाद्यविद्याकृतात्मभ्य आत्मा च सर्वभूतानां प्रत्यक् चेतनपरमात्मेत्युदाहृत उक्तो वेदान्तेषु । ईश्वरः सर्वज्ञो नारायणाख्यः, ईशनशील इति तस्मात्पूर्वोत्तराग्रन्थाद्यानपर्य्यालोचनया गीतास्वारस्येन नारायणे प्रसिद्धतरोत्तमपुरुषशब्देन च नारायण एव परं ज्योतिः, मुक्तप्राप्यत्वेन अस्मिन् वाक्ये व्यपदिश्यते तथा च गीतासु तं प्राप्तानामनावृत्तिरुक्ता ।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥ इति ।
[अ० ८ श्लो० १५]

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ इति ।
[अ० ८ श्लो० १६]

आनुशासनिकेऽप्युमामहेश्वरसंवादे—

सायुज्यानां विशिष्टे द्वे मामकं वैष्णवं तथा ।
मां प्राप्य न निवर्त्तन्ते विष्णुं वा शुभलोचने ॥ इति ।

स्यादेतत् । "अमरत्वं शिवत्वं च तपसा प्राप्नुयान्नरः," इत्यानुशासनिके, एव प्रकृतग्रन्थे मुक्तवर्येन शिवत्वमितिशब्देन मुक्तेः शिवसायुज्यरूपतया निष्कृष्टत्वादुक्तवचनं विष्णुप्रतीकशिवोपासनया प्रथमं विष्णुसायुज्यं प्राप्तानां क्रमेण शिवपदप्राप्त्या स्वरूपाविर्भावे सत्यनावृत्तिपरमिति । नैवम् । तत्रैवोमामहेश्वरसंवादसमनन्तरं महेश्वरेण स्वीयान् प्रति स्वजनकत्वेन स्वममत्वत्वेन सर्वोत्कृष्टतया प्रतिपादितस्य श्रीनारायणस्य "ब्रह्मदृष्टिरुत्कर्षात् । [उ० मी० अ० ४ पा० १ अधि ४ सू० ५] इति न्यायेन प्रतीकत्वायोगात् ।

तथा हि—

पितामहादपि परः शाश्वतः पुरुषो हरिः ।
कृष्णो जाम्बूनदाभासो व्यभ्रे सूर्य इवोदितः ॥
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ।

ब्रह्मा तस्योदरभवस्तस्याहं च शिरोद्भवः ।
शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः ॥
साक्षाद्देवनाथः परन्तपः ?
सर्वसंश्लिष्टः सर्वगः सर्वतो मुखः । ?
परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः ।
न तस्मात्परमं भूतं त्रिषु लोकेषु विद्यते ॥
सनातनो वै मधुहा गोविन्द इति विश्रुतः ।
सुरकार्य्यार्थमुत्पन्नो मानुषं वपुराश्रितः ॥
ब्रह्मा वसति गर्भस्थं शरीरे सुखसंश्रितः ।
शर्वः सुखं संश्रितश्च शरीरे सुखसंस्थितः ॥
सर्वाः सुखं संश्रिताश्च शरीरे तस्य देवताः ।
योगमायः सहस्राक्षो निरपायो महामनाः ॥
आशयेनानुरूपेण युज्यन्ते तमनुव्रताः ।
दृष्टव्यस्तेन भगवान्वासुदेवः प्रतापवान् ॥
दृष्टे तस्मिन्नहं दृष्टो न मेऽस्त्यत्र विचारणा ।
पितामहो वा देवेश इति वित्त तपोधनाः ॥
स यस्य पुण्डरीकाक्षः प्रीतियुक्तो भविष्यति ।
तस्य देवगणः प्रीतो ब्रह्मपूर्वो भविष्यति ।
कर्मणा मनसा वाचा स नमस्यो द्विजैः सदा ॥
यत्नवद्भिरुपस्थाय दृष्टव्यो देवकीसुतः ।
तं दृष्ट्वा सर्वशोऽदेवं दृष्टाः स्युः सुरसत्तमाः ।
महावराहं तं देवं सर्वलोकपितामहम् ।
अहञ्चैव नमस्यामि नित्यमेव जगत्पतिम् ॥ इति ।

न मेऽस्त्यत्र विचारणेति च निर्णीतत्वोक्तिपुरःसरम् । "न बिभेति कुतश्चन" "अभयं वै जनक प्राप्तोसि" इत्यादिषु उक्तमोक्षरूपाभवेन तमनुव्रता युज्यन्त इत्युक्तं तद्धेतुज्ञानविषयतयोक्तस्य सर्वसंश्लिष्ट इत्यादिना च सर्वोपादानत्वोक्तेः । "तस्मिन् दृष्टे" इत्यादिना च यस्मिन् विज्ञात इति श्रुत्यर्थतयोक्तस्य कथं मुक्तप्राप्यत्वं न स्यात् अथ च प्रतीकत्वमिति । किञ्च । आनुशासनिक एव—

"किमेकं दैवतं लोके किं वाप्येकं परायणम्" इति युधिष्ठिरप्रश्ने भीष्मेण "अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्" इत्युक्त्वा—

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥

इत्युक्तम् ।

श्रीमद्भाष्यकारैश्चैतत्प्रश्नव्याख्यावसरे दैवतं=देव इत्यर्थः, स्वार्थे तद्धितविधानात् । लोके=लोकनहेतुभूते विद्यास्थान इत्युक्तम् । अस्मिंश्च लोके एकं परमयनं प्राप्तव्यं परायणम् । यस्मिन् निरीक्षिते—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥

यस्य च ज्ञानमात्रेणानन्दलक्षणो मोक्षः प्राप्यते । यद्विद्वान्न बिभेति कुतश्चनेति । यत्प्रविष्टस्य न विद्यते पुनर्भवः । यस्य च वेदनात्तदेव भवति । यद्विहायापरः पन्था नृणां नास्ति । तदुक्तमेकं परायणं च लोके यत्तत् किमिति द्वितीयः प्रश्न इत्युक्तम् । "परमं यो महत्तेजः" इत्येतद्व्याख्यानावसरे उक्तं, द्वितीयप्रश्नं समाधत्ते । परमं प्रकृष्टं तेजः चैतन्यलक्षणं सर्वावभासकम् । "येन सूर्य्यस्तपति तेजसेद्धस्तदेव ज्योतिषां ज्योतिर्न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः इत्यादिश्रुतेः । "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्" इत्यादिस्मृतेश्च "परमं तपस्तपति आज्ञापतीतितपः "य इमं च लोकं परमञ्च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति" इत्याद्यन्तर्यामिब्राह्मणे सर्वनियन्तृत्वं श्रूयते । तपतीष्ट इति वा तपः । भीषास्माद्वातः पवते भीषोदेति सूर्यः, इत्यादिश्रुतेश्च । तस्यैश्वर्यमनवच्छिन्नमतिमहत्त्वम् । "एष सर्वेश्वर" इति श्रुतेः । परमं सत्यादिलक्षणं परं ब्रह्म, महनीयतया महत् परमं प्रकृष्टम् पुनरावृत्तिशङ्कावर्जितम् । परमग्रहणात्सर्वत्रापरं तेजआदित्यादिकं व्यावर्त्तयति । सर्वत्र यो देव इति विशेष्यते । यो देवः परायणं तेजः परमं तपः परमं ब्रह्म स एकः सर्वभूतानां परायणमिति वाक्यार्थ इति । एवं चाचार्य्यव्याख्यातताप्पर्य्यैरनेकश्रुतिभिरुपबृंहणेन च श्रीनारायणत्वप्रतिपादनाच्च तं प्राप्तानां प्राप्यान्तरं वक्तुमुचितम् । नापि तस्य परज्योतिःशब्दाप्रतिपाद्यत्वम् । ज्योतिःपर्य्यायपरमतेजःशब्देन प्रतिपादनात् । श्रीविष्णुपरतयाचार्यव्याख्यातया "तदेव ज्योतिषां ज्योतिः इति श्रुत्युक्तत्वाच्च । किञ्च वेदभाष्यकृद्भिर्वेदभाष्ये "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" इत्यादिश्रुतिषु प्रसिद्धो नारायणः पुरुषसूक्ते देवतेत्युक्तम् । यज्ञमन्त्रसुधानिधौ च गणहोमे पुरुषसूक्ते देवतात्वेन नारायणस्तैरेवोक्तः । एवञ्च तदन्तर्गतेन "तमेव विदित्वाऽतिमृत्युमेती"तिमन्त्रेण नारायणं जानतां स्पष्टं मुक्त्यभिधानात् "विष्णुं वा शुभलोचने" । इत्यानुशासनिकवचनस्वरसात् "गुहां प्रविष्टौ" इति न्यायेन प्रतीयमानस्य सायुज्ययोः साम्यस्य भङ्गो न कर्तव्यः

भङ्गे च हिरण्यगर्भसायुज्यस्यापि क्रममुक्तिफलत्वान्मुक्तित्वसंख्यानुपपत्तिः । "यस्मिन्पञ्च पञ्चजना" इत्यत्र साङ्ख्याभिमततत्त्वोक्तौ आकाशस्य पृथगुक्त्या पञ्चविंशतिसङ्ख्यानुपपत्तिवत् । तस्माद्वानुशासनिकस्थेष्वमरत्वं शिवत्वं चेति प्राचीनश्लोकेषु अमरत्वमिन्द्रादिसाधारणं स्वीकृत्य शिवत्वमित्यनेन तन्माञ्चप्रत्ययो मा भूदिति "मां प्राप्य" इत्याद्युक्तमित्येव युक्तम् । श्रीसदाशिवश्रीनारायणयोरुभयोरपि मायाशबलपरब्रह्मरूपत्वेन प्रत्येकं निरपेक्षमोक्षहेतुत्वात् । ननु मिश्रं तैत्तरीयछान्दोग्योपनिषत्पर्यालोचनया नारायणस्य जगदीश्वरत्वम् । तथा चाथर्वणोपनिषदीयगोपालतापनीये ऽप्युक्तम् ।

कः परमो देवः । कुतो मृत्युर्बिभेति । कस्य विज्ञानेनाखिलं विज्ञातं भवति । तदुहोवाच ब्राह्मणः । श्रीकृष्णो वै परमं दैवतम् । गोविन्दान्मृत्युर्बिभेति । गोपीजनवल्लभज्ञानेनैतज्ज्ञातं भवतीति ।

रामतापनीयेऽपि हनुमद्वाक्यम् ।

राम एव परं ब्रह्म राम एव परायणम् ॥ इति ।

नारायणोपनिषद्यपि ।

अथ नित्यो देव एको नारायणो ब्रह्मा च नारायणः शिवश्च नारायण इति ।

नृसिंहतापनीये ।

प्रतद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा इति ॥

इत्थमियमृग्व्याख्याताचार्यैः । विष्णुर्मृगः सिंहः प्रस्तवते=स्तुतिं प्राप्नोति स्तुतिमन्त्रैः । तद्वीर्याय तत्सामर्थ्याय न भीमः=न भयङ्करः । कायं न चरति सर्वदेवाविग्रहेषु स्वयं विचरति सर्वदेवलीलाविग्रहधारीत्यर्थः । गिरिष्ठाः—गिरिः पर्वतः तत्स्थः ईश्वरात्मकः । यद्वा गिरिषु गुहासु स्तुतिषु यद्रूपमभिनवं स्तोता कामयते तद्रूपं स्वस्मिन् स्थापयतीति गिरिष्ठाः । यस्य त्रिषु विक्रमणेषु विग्रहेषु विविधं विक्रमणं तेषु ब्रह्मविष्णुशिवात्मकेषु अधीत्युपरि भावे अप्युरुषु बहुषु लीलादिविग्रहेषु भुवनानि क्षियन्ति निवसन्तीति । युक्तश्चैतद्व्याख्यानम् । नृसिंहपदनिर्वचनस्य श्रुतौ विवक्षितत्वात् ।

विष्णुसूक्तेऽपि ।

न ते विष्णो जायमानो न जातो देवमहिम्नः परमं न माया ॥ इति ।

एतद्व्याख्या । तव महिमत्वस्यावसानं नास्ति अत एव न सर्वैर्ज्ञायत इति भाव इति । तथा—

बह्वृचब्राह्मणे ।

अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः ।

इति सकलदेवतोत्कर्षो विष्णोः श्रूयते । नन्वाग्नावैष्णवपुरोडाशार्थवादस्य "अस्याग्निर्मुखं प्रथमो देवतानामग्निरेव तु प्रथमो देवतानाम्" इत्यादिश्रुतिभिरग्न्युत्कर्षप्रतीतेः सर्वदेवतान्यूनत्वायोगेनाग्निः अवम इत्यंशे कांश्चिद्देवताविशेषान्प्रत्येवान्वयपरतया सङ्कुचितार्थवादत्वे "ग्रहणार्थं च पूर्वमिष्टस्तदर्थत्वादिति (१)पूर्वतन्त्रसिद्धान्तविरोधः, अविवक्षितान्वाख्यानवाक्यशेषबलेन पूर्वपक्षे सति अहृदयवाचामहृदया एव वाचो भवन्तीत्यनेन न्यायेन तथाभूतमेवार्थवादान्तरमेतदवलम्ब्य निराक्रियत इति तत्रैव प्रकटितत्वात् इति चेन्न । वेदभाष्यकारैरस्याः श्रुतेरन्यथा व्याख्यानात् । तद्यथा । योऽयमग्निरस्ति सोऽयं देवतामध्येऽवमः प्रथमो द्रष्टव्यः । यस्तु विष्णुः सोऽयं परम उत्तमः । वैशब्द उक्तार्थे मन्त्रप्रसिद्धिद्योतनार्थः । "अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत्" इति हि मन्त्र आम्नाय इति । एवं चावमशब्देन न्यूनत्वस्यानुक्तत्वादग्निः प्रथमो देवतानामित्यादिभिर्विरोधोद्भावनं तत्परिहाराय च कांश्चिद्देवताविशेषान्प्रतीत्यध्याहाराश्रयणेन सङ्कुचितार्थत्वमसदालम्बनार्थवादत्वं वा युक्तमेव । युक्तश्चायमर्थः । एवमर्थस्य शाखान्तरपठितस्याग्नावैष्णवस्यैवार्थवादस्य "आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः, अग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चारभते, अग्निः प्रथमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवताश्चैव यज्ञं चोभयतः परिगृह्यावरुन्धे इत्यस्य दशमे "इष्ट्यारम्भसंयोगादङ्गभूतान्निवर्त्तेत आरम्भस्य प्रधानसंयोगात्" (२)इत्यधिकरणे शबरस्वामिभिरुदाहृतत्वात् । नचास्यासदालम्बनार्थवादत्वम् । कर्मणि सङ्गतानां देवतानां मध्ये यजमानेनाग्नेरेव प्रथममुद्देशात् । आधानसिद्धाग्न्यभावे उत्तरकर्मानधिकारात् । पवमानेष्टिषु चाग्नेरेव प्रथममुद्देशात् । विष्णोश्च परमत्वं तत्प्रीत्यर्थत्वात्सर्वकर्मणाम् । अत एव विष्णुर्यज्ञ इति तत्प्रीतिस्तत्साध्येत्यर्थः । उपबृंहणञ्च ।

> तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।
> आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥
> यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ॥ इति ।

(१) पू० मी० अ० १२ पा० १ अधि० १२ सू० २४

(२) पू० मी० अ० १० पा० १ अधि० २ सू० ४

एवञ्च देवताः प्रति शेषिभूतकर्म प्रति शेषिभूतस्य विष्णोर्देवताः प्रति प्राधान्यं युक्तं मन्त्रार्थवादयोर्देवताविग्रहन्यायेन प्रामाण्यात् । द्वाद-शाध्याये च ग्रहणार्थमित्यत्र भाष्यकारैरेतावद्बहुचब्राह्मणार्थवादो नो-दाहृतः । शाखान्तरस्थस्यैवोक्तार्थवादस्योदाहरणात् । तत्रैव देवताश्चैव यज्ञं चोभयतः परिगृह्णते तदर्थत्वश्रवणात् । असदर्थवादत्वं च नोभयो-रित्युक्तमेव । दीक्षासंस्कारार्थत्वेन विधौ दीक्षणीयायाः श्रवणाच्च देव-तापरिग्रहार्थत्वमिति देवतापरिग्रहांशोऽसदर्थवादत्वं तत्रोक्तम् । न तु विष्णोः परमत्वे । तस्सिद्धं बहुचब्राह्मणपर्य्यालोचनया विष्णोः सर्वोत्कृ-ष्टत्वम् । तथा लौगाक्षिगृह्ये अग्नये पृथिव्याधिपतये स्वाहेत्यारभ्य रुद्राय भूताधिपतये स्वाहेत्यन्तमन्त्रेण श्रीविष्णोः सर्वाधिपतित्वं प्रतिपाद्यते । ननु द्वादशहोमेषु प्रत्येकं विनियुक्तानामेषां मन्त्राणां एकवाक्यत्वा-भावात् । अन्येभ्यः सर्वेश्वरेभ्यश्चच्छेदे श्रीनारायणे प्रतिपादने च साम-र्थ्याभावाच्चैतेभ्यो नारायणस्य सर्वाधिपत्यासिद्धिः । रुद्राय भूताधिपतये स्वाहेति मन्त्राम्नातो रुद्रस्तु शिवकलाविर्भावयुक्तः कश्चिद् गणनाथः । कूर्मपुराणे लोकपालपुरीवर्णनप्रस्तावे "तस्यास्तु पूर्वदिग्भागे शङ्क-रस्य शुभा पुरी" इत्यादिनाविष्करणादिति चेत् । न । विष्णवे सर्वाधिप-तये स्वाहेति मन्त्रस्तावद्गुणविशिष्टां देवतां प्रतिपादयति । सर्वाधिपति-त्वगुणप्रत्यायनं च सर्वपदेन स्वार्थप्रत्यायनं विना न सम्भवति । तच्च सर्वनाम्नां सन्निहितपरामर्शित्वेनाध्ययनकाले सन्निहितानवश्यं परामृशति, सत्यपि भिन्नवाक्यत्वे सत्यपि च प्रत्येकभिन्नहोमविनियोगे । तद्यथा । यदि ऋक्तो यज्ञ आर्तिमियाद् यदि यजुष्ट इत्युक्त्वा यदि सर्वतो यज्ञ आर्तिमियादित्यत्र सत्यपि वाक्यभेदे अध्ययनकाले सन्निहितान् परामृशति । यथा वा एकदोहनाशप्रायश्चित्तवाक्ययोर्यस्योभयं हविरा-र्तिमार्छेदित्यस्य च सत्यपि वाक्यभेदे सत्यामपि चानुष्ठानकाले भिन्न-प्रयोगप्रवृत्तौ उभयपदमध्ययनकालेऽन्यदा च दधिपयसी परामृशति सर्वनामत्वात् । यथा वा सहस्रं देयमपरिमितं देयमित्यत्र सत्यपि वा-क्यभेदे सत्यामपि भिन्नप्रयोगप्रवृत्तौ अपरिमितपदोक्तं बहुत्वं सहस्रा-पेक्षं, अध्ययनकाले तस्य सन्निधानात् । यथा वा गायत्रीच्छन्दोरूपका-र्यद्वारा कारणब्रह्मणि चेतोवतारपरे वाक्ये भिन्ने अभ्युपस्थितं ब्रह्म "अथ यदतः परो दिव" इत्यन्योपासनान्तरपरे वाक्ये श्रुतेन यच्छब्देन निर्दिश्यते । तद्ब्रह्मणे लोकाधिपतये स्वाहेत्युक्त्वा प्रयुज्यमानं स-र्वपदं ब्रह्माणं लोकाश्चावश्यं परामृशतीति सिद्धं देवताविग्रहन्यायेन श्रीविष्णोर्विश्वपतित्वम् । यत्त्वत्र रुद्रोऽन्य इति । तन्न । रुद्रशब्दस्य

शङ्करेशानशब्दयोश्च कूर्मपुराणेऽनेकार्थत्वस्योपचरितार्थत्वस्य वा कल्पने प्रमाणाभावात्, सत्यपि सर्वाधिपत्ये कर्म्माङ्गगुणत्वेन भूताधिपत्यप्रतिपादने बाधकाभावात्। अत एव सर्वाधिपतित्वेनोक्तस्य विष्णोः, "विष्णुः पर्वतानामधिपति"रित्यत्र कर्म्माङ्गगुणत्वेन पर्वताधिपत्यं प्रतिपाद्यते। सर्वाधिपतेस्तदाधिपत्ये बाधकाभावात्। सत्यपि आदित्यप्राधपाठे विष्णोर्भगवदवतारत्ववत् तस्यापि सत्यपि लोकपालप्रायपाठे तदुपपत्तेः। उपपादितं च "अन्तस्तद्धर्मोपदेशात्"। (उ० मी० अ० १ पा० १ अधि०७ सू० २०) इत्यत्र। "ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानाञ्चे"ति वाक्योक्तं देशविशेषाधिपतित्वं परमेश्वरस्याचार्यैः, स एव न्यायः प्रकृतेऽपि देवः, तदित्थं लोकाधिपत्यालोचनया सर्वपतित्वं विष्णोः। तथा भगवद्गीतासु। "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्"इति "मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय"इति च सर्वाधिष्ठानत्वं सर्वपतित्वं च श्रूयते।

नन्वनयोर्वाक्ययोर्मन्मना भवेत्यादौ च यदि श्रीकृष्ण एवाभिप्रेतः कथं तर्हि, "कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः" "अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्" इत्यादिवचनान्वितं गीताशास्त्रमाद्यं श्रुतवतः "स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव" इति गुरुं प्रत्युक्तवतोऽर्जुनस्य यावज्जीवं शिवपूजारतत्वमभवत्। कथञ्च युद्धमध्ये शिवाय कल्पितेन नित्यपूजोपहारेण कृष्णं शिवबुद्ध्यैव अर्च्चयत्। अतः शिवस्य परमात्मत्वेन भजनीयत्वेन च प्रतिपादनं गीतासु युक्तम्। एवं शिवाराधकस्य सतोऽर्जुनस्य शिवबुद्ध्या कृष्णार्चकत्वमुपपद्यते। अत एव तदीयपूजोपहारस्य कैलासे शिवसमीपे दर्शनमुक्तं द्रोणपर्वणि।

तं चोपहारं विततं नैशं नैत्यकमात्मनः।
ददर्श त्र्यम्बकाभ्याशे वासुदेवनिवेदितम्॥ इति।

एवं भगवद्गीतायाः शिवपरत्वे सत्येव,

ज्ञानं तदैश्वरं दिव्यं यथावद्विदितं त्वया॥
स्वयमेव हृषीकेशः प्रीत्योवाच सनातनम्।
गच्छ गच्छ स्वकं स्थानं न शोकं कर्त्तुमर्हसि॥
भजस्व परया भक्त्या शरण्यं शरणं शिवम्॥

इति कूर्मपुराणे अर्जुनं प्रति व्यासवचनम्।

तत्रैवेश्वरगीतान्ते।

नारायणोऽपि भगवान् देवकीतनयो हरिः।
अर्जुनाय स्वयं साक्षाद्दत्तवानिदमुत्तमम्॥

इति कथनञ्च सङ्गच्छते। "दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्"। "कथं विद्यामहं योगिन्! त्वां सदा परिचिन्तयन्" "योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्"।"एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः"। "यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः" इति गीताम्नातासु कृष्णार्जुनसञ्जयोक्तिषु कृष्णस्येश्वरविषययोगत्वस्योक्तत्वाच्च।

तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी" इति श्रीकृष्णेन स्पष्टं स्वस्मिन् शिवयोगसत्त्वाभिधानाच्च। नचात्र शिवलिङ्गाप्रतीतेः तदीययोगसत्त्वोक्त्यसम्भवः। "प्रज्ञा च तस्मात्प्रसृता पुराणी" इति श्वेताश्वतरोपनिषद्गतमन्त्रभागसमानार्थेन "यतः प्रवृत्तिः प्रसृता पुराणी" इत्यंशेन शिवशक्तेरुक्तेः। किञ्च अनुगीतारम्भे श्रीकृष्णेनैव "परं हि ब्रह्म कथितं योगयुक्तेन तन्मया" इति शिवयोगमास्थाय मया गीतोपदेशः कृत इत्युक्तत्वाद्विभूत्यध्याये च "आदित्यानामहं विष्णुः" इतीश्वरपूर्वावताररूपोपेन्द्रस्य "वृष्णीनां वासुदेवोऽस्मि" इति स्वविभूतिषु परिगणनपूर्वकं विश्वरूपाध्याये "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्" इति वक्त्रिणेन प्रत्यक्षहननात् प्रागेव स्ववीर्यप्रभावानिहतत्वमुपवर्ण्य मोक्षधर्मेषु पार्थं प्रत्येव "निहतास्तेन वै पूर्वं हतवानसि यान् रिपून्" इत्युक्तत्वात्,चरितोपदेशस्य सर्वस्यापि शिवविषयत्वं प्रकटीकृतमिति गीतायाः कार्त्स्न्येन शिवविषयमवश्यमभ्युपगन्तव्यम्। तस्मात्कृष्णस्य "मन्मना भव" इत्यादिवचनं शिवदृष्ट्यैव, "मयैवैते निहता" इतिवदिति।

अत्रोच्यते।

"यत्तावत् कामैस्तैस्तैरित्याद्यभवदित्यन्तम्। तन्न। तत्र ह्यन्यदेवताः क्षुद्रदेवता विवक्षिताः। गीताशास्त्रात्श्रीकृष्णस्य परमात्मत्वमवगच्छतोऽपि शिवार्चनरतत्वं तु न दोषाय। यतः श्रीनारायणश्रीसदाशिवयोस्तेनाभेद एव निर्णीतोऽस्ति। अत एव वनपर्वणि शिवस्तुत्यर्जुनेनोक्तम्।

शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे।
दक्षयज्ञविनाशाय हरिरुद्राय वै नमः॥ इति।

संहारहेतुत्वेन च तस्य प्रसिद्धेः कर्णभीष्मादिसंहारार्थं तदाराधनमुचितम्। अत एव तत्रार्जुनेन प्रार्थितम्—

भगवन्!

वरं ददासि चेन्मह्यं कामप्रीत्या वृषध्वज!
कामये दिव्यमस्त्रं तद् घोरं पाशुपतं प्रभो।

यच्छूलशिरोधाम रौद्रं भीमपराक्रमम् ।
युगान्ते दारुणे प्राप्ते कृत्स्नं संहरते जगत् ॥
कर्णभीष्मकृपद्रोणैर्भविता तु महाहवः ।
त्वत्प्रसादान्महाबाहो जयेयं तान् यथा मृधे ॥ इति ।

एवञ्च युद्धमध्ये शिवबुद्ध्या कृष्णार्चनं तस्मिन् निवेदितपूजोपहारस्य शिवलिङ्गे दर्शनञ्च सङ्गच्छते । परमेश्वरत्वेन संहारकर्तृत्वेन च शिवपूजायां तदादरात् । शिवपूजारतत्वमेवेत्यवधारणंत्वयुक्तम् । वासुदेवे निवेदितोपहारस्य त्र्यम्बकाभ्याशदर्शनानन्तरं "ततो विपूज्य मनसा शर्वं कृष्णं च पाण्डव" इत्युक्तत्वात् । शिवायेत्याद्यनुपपत्तेश्चेति । यदपि "एवमित्यादि" सङ्गच्छत इत्यन्तमुक्तम् । तदप्यसत् । न हि तद्वाक्यबलेन नारायणस्वरूपाविवक्षया शिवपरत्वं वक्तुं शक्यम् । यत ईश्वरगीतायां तस्मिन्नेवाध्यायेऽनुपदमेव शिवनारायणयोरभेदो विस्पष्टः प्रतिपादितः ।

अहं नारायणो योऽहमीश्वरो नात्र संशयः ।
नान्तरं ये प्रपश्यन्ति तेषां देयमिदं परम् ॥
ममैषा परमा मूर्त्तिर्नारायणसमाह्वया ।
सर्वभूतात्मभूता सा शान्ता चाक्षरसंज्ञिता ॥
ये त्वन्यथा प्रपश्यन्ति लोके भेददृशो जनाः ।
न ते मां सम्प्रपश्यन्ति जायन्ते च पुनः पुनः ॥
ये त्विमं विष्णुमव्यक्तं मां वा देवं महेश्वरम् ।
एकीभावेन पश्यन्ति न तेषां पुनरुद्भवः ॥
तस्मादनादिनिधनं विष्णुमात्मानमव्ययम् ।
मामेव सम्प्रपश्यध्वं पूजयध्वं तथैव हि ॥
ये त्वन्यथा प्रपश्यन्ति मत्वैवं देवतान्तरम् ।
ते यान्ति नरकान् घोरान् नाहं तेषु व्यवस्थितः ॥
मूर्खं वा पण्डितं वापि ब्राह्मणं वा मदाश्रयम् ।
मोचयामि श्वपाकं वा न नारायणनिन्दकम् ॥

इत्यादि । एवं कूर्मपुराणे बहुषु स्थलेषु अभेदप्रतिपादनेन तत्प्रतिपादने च फलश्रवणेन भेददृष्टौ निन्दार्थवाददर्शनेन "शिवाय विष्णुरूपाय" इत्याद्युपबृंहणान्तराच्चाभेदाभिप्रायमेव ज्ञानं तदद्वैतमित्यादि । तथा नारायणोऽपि भगवानित्यादि । न तु नारायणाविवक्षया शिवपरत्वाभिप्रायम् । तथा तत्रेश्वरगीतायामृषीन्प्रति "सहस्रबाहुं जटिलं चन्द्रार्धकृतशेखरम् । वसानं चर्म्म" त्यादिरूपदर्शनवदर्जुनं प्रत्यपि

दर्शनीयम् न "किरीटिनं गदिनं चक्रिणम्" इति । सनत्कुमारादिभिरिव नारायणेनोपदिष्टमेतावता न तत्तुल्यत्वं विवक्षितम् ईश्वरगीतायाम् । यतस्तत्र तादृशदर्शनावसर उक्तम् ।

क्षणेन जगतो योनिं नारायणमनामयम् ।
ईश्वरेणैकतापन्नमपश्यन् ब्रह्मवादिनः ॥
दृष्ट्वा तदैश्वरं रूपं रुद्रं नारायणात्मकम् ।
कृतार्थं मेनिरे सन्तः स्वात्मानं ब्रह्मवादिनः ॥ इति ।

तस्माद्भगवद्गीतायाः सत्यपि नारायणपरत्वे ईश्वरचैतन्यमेव तत्तदुपाधिभदेभिन्नं गीताद्वयप्रतिपाद्यमित्यभिप्रेत्य नारायणोऽपि भगवानित्युक्तम् । शिवपरत्वञ्च भगवद्गीतासु वदता बहवो मयेत्यादिशङ्का उपचरितार्था व्याख्येयाः । अस्मन्मते तु मायोपहितेश्वरचैतन्यस्य सत्वोपहितनारायणरूपेण प्रतिपादनान्नैष दोषः । तद्यथा चतुर्थेऽध्यायेऽर्जुनेन "अपरं भवतो जन्म परं जन्म विवस्वतः । कथमेतद्विजानीया"मितिपृष्टे उक्तं भगवता ।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ इति ।

अस्य व्याख्यानं गीताभाष्ये या वासुदेवेऽनीश्वरासर्वज्ञाशङ्का मूर्खाणां तां परिहरन्नाह । बहूनीति । बहूनि मे व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन ! तान्यहं वेद जाने न त्वं वेत्थ जानीषे धर्म्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात् । अहं पुनः नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिरिति वेद हे परन्तप ! इति । कथं तर्हि तव नित्येश्वरस्य धर्म्माधर्माभावे जन्मेति ।

उच्यते—

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥
(गी० अ० ४ श्लो० ६)

अजोऽपि=जन्मरहितोऽपि सन् तथाऽव्ययात्माऽक्षीणज्ञानशक्तिस्वभावोऽपि सन् तथा भूतानां=ब्रह्मादिस्तम्बपर्य्यन्तानाम् ईशनशीलोऽपि सन् प्रकृतिं ममैव वैष्णवीं मायां त्रिगुणात्मिकां यस्या वशे सर्वं जगद्वर्तते यया मोहितः सन् स्वमात्मानं वासुदेवं न जानाति तां प्रकृतिं स्वामधिष्ठाय=स्वीकृत्य सम्भवामि=देहवानिव सञ्जात आत्मनो मायया न परमार्थतो लोकवदिति ।

तच्च जन्म कदा किमर्थं चेति ।

उच्यते—

यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्म्मस्य तदात्मानं सृजाम्यहम् ॥

(गी० अ० ४ श्लो० ८)

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ इति ।

वामदेवादितुल्यत्वे हि ज्ञानप्रदमहद्दविशेषजं स्वजन्माद्युक्तं स्यात् । नारदेनैव व्यासं प्रति न केवलं "यदा यदा हि"त्येव । अप्रतारकत्वात् । न हि वामदेवतुल्यस्य प्रतारणा सम्भवति । किञ्च भावनानामको ध्यानापरपर्य्यायो धर्म्मविशेषः तत्कृतशिवाभेददृष्टौ भगवत उच्यमानायां—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्म्मणि ॥
यदि ह्यहं न वर्तेयं जातु कर्म्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥
उत्सीदेयुरिमे लोकाः न कुर्य्यां कर्मचेदहम् ।

इत्यादि लोकसङ्ग्रहमात्रोक्तिर्विरुध्येत । "न मां कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा" इति च वक्तुं न युज्यते ।

किञ्च गीतायाः श्रीकृष्ण परत्वाभावे श्रीकृष्णो देवता न स्यात् । शिव एव देवता स्यात् । न चैतत्सम्भवति । गीतोपक्रमे श्रीकृष्णो देवतेति सर्वत्र पाठात् । भावनाद्यर्थकृतशिवाभेददृष्टौ च,

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

इति न वदेत् । किञ्च ।

"तानि सर्वाणि संयम्य युक्त आसीत मत्परः" इत्यत्र "मत्परः= अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्पर इत्युक्तं श्रीभाष्यकृद्भिः । तथा "योगिनामपि सर्वेषां मद्गतेनान्तरात्मना" इत्यत्र योगिनामपि सर्वेषां रुद्रादित्यपराणां मद्गतेन मयि वासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो मां स मे युक्ततमो मत इति । "दैवी ह्येषा गुणमयी मम माया दुरत्यया" इत्यत्र देवस्य महेश्वरस्य विष्णोरित्युक्तम् ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

इत्यत्र ईश्वरः=सर्वज्ञो नारायणाख्य ईशानशील इत्युक्तम् । "ईश्वरः सर्वभूताना" मित्यत्रापि, ईशानशीलो नारायणाख्य इत्युक्तम् । "मन्मना भव मद्भक्त" इत्यत्र च तत्रैवं वर्त्तमानो वासुदेव एव समर्पितसाध्यसाधनप्रयोजन इति । एवं व्याकुर्वतां च "मयि सर्वाणि कर्माणि संन्यस्य" इत्यादौ मयि देवे सर्वज्ञे परमेश्वर इति साधारणोक्तिरपि नारायणपरैवावसीयते । न तु कश्चिदपि मद्भाष्यः शिवपरत्वेन तैरुक्तः । तस्माद्गीताव्यवस्थात्पूर्वाचार्यव्याख्यानाच्च गीतायाः श्रीकृष्णपरत्वं निर्णीयते ।

यत्तु "दिव्यं ददामि" इत्यादिवाक्ये श्रीकृष्णस्येश्वरविषयो योगः प्रतिपादित इति । तन्न । "न मे पार्थास्ति कर्तव्यम्" इत्यादिना विरोधात् "नृत्यामि योगी सततम्" । "ज्योतिर्मयं प्रपश्यन्ति" स योगी दृश्यते किल", "महादेवं महायोगम्" "ज्ञानवैराग्यनिलयं ज्ञानयोगं सनातनम्" । "योगेश्वरं रूपमनन्तशक्तिम्" इत्येवमीश्वरगीतायामीश्वरेऽपि योगश्रवणाच्च । "त्वमव्ययः शाश्वतधर्मगोप्ता" इत्यादिवचनबलेनान्यथा व्याख्यानं प्रकृतेऽपि तुल्यम् । श्रीमद्भाष्यकारैकगीतावाक्यानामविरोधेन व्याख्यानात् । "दिव्यं ददामी" त्यत्र ऐश्वरं ईश्वरस्य मम ऐश्वरं योगं शक्त्यतिशयमित्युक्तम् । युक्तञ्चैतत् । "ईश्वरोऽहमहं योगी" इत्यादौ लोके च स्वामिमात्रे प्रयुज्यमानानामीश्वरेशेशानशब्दानां स्वामित्वादेव शङ्करे प्रयोगोपपत्तौ तन्मात्रनिष्ठस्वाम्यविशेषविषयरूढिकल्पनायोगात् । बर्हिःशब्दस्येव संस्कृते बर्हिषि, पुरुषशब्दस्येव नारायणे । अन्यथाऽथर्वशिखागतपुरुषशब्देनापि तन्निर्देशापातात् । उक्तञ्च पुरुषेश्वरशब्दयोः शिवविष्णुसाधारण्यं क्रमेण—

वाराहकौर्मयोः ।

पुरुषो विष्णुरित्युक्तः शिवो वा नामतः स्मृतः ।
अहं नारायणो योऽहमीश्वरो नात्र संशयः ॥ इति ।

विष्णौ रूढस्यापि पुरुषशब्दस्य शिवाद्यनेकशब्दसमभिव्याहाराच्छिवपरत्ववच्च शिवे रूढस्यापीश्वरशब्दस्य गीतासु विष्णुपरत्वम् । अन्यथा "गदिनं चक्रिण" मित्याद्यनेकशब्दानुपपत्तेः ।

ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्त्तन्ति भूयः ।
तमेव चाद्यं पुरुषम्—

इत्यत्र तु ततः=पश्चात् यत्पदं वैष्णवं तत्परिमार्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः । कथं परिमार्गितव्यमित्यत आह । तमेव च=यत्पदत्वेनोक्तस्तं पुरुषं प्रपद्य इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थे इ·

त्युक्तम् । युक्तं चैतत् । एकवाक्यत्वात् । प्रपद्य इति क्रियायां श्रीकृष्णस्य कर्तृत्वे एकस्मिञ्श्लोके वाक्यभेदः स्यात् । यदपि न चात्रेत्याद्युक्तेरित्यन्तम् । तदप्यसत् । न हि "प्रसृता पुराणी" इति वर्णसाम्यमात्रेण समानार्थत्वम् । "यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः । तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी" इति श्वेताश्वतरमन्त्रे शिवशब्दश्रवणाद्युक्तस्तच्छब्देन तत्परामर्शः । "ततः परं तत्" इत्यत्र तु पुरुषश्रवणाद्यत इति यच्छब्देन "यदतः परो दिवो ज्योतिः" इतिवत्तस्य परामर्शः । पुरुषस्य च सदाशिवसामानाधिकरण्येन गीतापञ्चदशाध्याये समस्तगीतायां वाऽश्रवणात्प्रत्युत श्रीकृष्णसामानाधिकरण्येनैव श्रवणात् शक्तिसाधारण्येऽपि तत्रैव प्रसिद्धतरत्वाचार्यैश्च तन्मात्रपरतया व्याख्यानाच्च सदाशिवपरतावगम्यते । अक्षरसाम्यमात्रं तु पशुकामेष्ट्यभ्युदितेष्टिवाक्ययोरिवार्थभेदेऽपि सम्भवति । न हि ये मध्यमा इत्याद्यक्षरसाम्यमिष्टिवाक्ययोरेकार्थत्वमापादयतीत्युपपादितं षष्ठे । श्रुतिस्मृत्योरक्षरसाम्यादैकार्थ्यमिति चेत् । न "महतः परमव्यक्त"मितिश्रुतेः सांख्यस्मृत्यैकार्थ्यप्रसङ्गात् । तथा सति "आनुमानिकमप्येकेषामिति (१)न्यायविरोधात् । उपक्रमैकवाक्यतानुरोधेनैकार्थ्यानाश्रयणं प्रकृतेऽपि तुल्यम् । न च मूलश्रुत्यभावप्रसङ्गः अनन्तरश्लोकोक्तानादिसंसारवृक्षप्रवृत्तेरत्रोच्यमानाया "विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति" इत्याद्यनेकश्रुतिभिः श्रीनारायणहेतुकत्वप्रतिपादनात् । कथं विद्यामित्यस्याग्रिमश्लोके "विस्तरेणात्मनो योगम्" इत्यत्र योगं=योगैश्वर्यं शक्तिविशेषमित्युक्तम । ततश्च "कथं विद्याम्" इत्यत्रापि योगशब्दार्थः स एवेति गम्यते । "योगेश्वर ततो मे त्वम्" इत्यत्र योगिनां योगास्तेषामीश्वर इत्युक्तम् । एवमुक्त्वा तत इत्यत्राप्ययमेव योगशब्दार्थः, एकप्रकरणात् । "यत्र योगेश्वर" इत्यत्रापि योगेश्वरः सर्वयोगानामीश्वरः तत्प्रभवत्वात् सर्वयोगबीजस्येत्युक्तम् । अनुगीतारम्भेऽपि योगशब्दस्यायमेवार्थः । ईश्वरगीतास्वपि, "योगिनामस्म्यहं शम्भुः" इत्यत्र तु शम्भोः सदाशिवस्य योगित्वं नारायणस्येव लोकशिक्षार्थम् । न चायं शम्भुः सदाशिवादन्य इति शङ्का प्रमाणाभावात्, अनेकार्थत्वापत्तेश्च । यत्तु विभूतिषु विगणनं नतद्दोषाय यतः पूर्वाचार्यैरुक्तम् । प्रभावातिशयमात्रविवक्षया विभूतित्वं निर्दिश्यत इति । अत एवेश्वरगीतायां "रुद्राणां शङ्करश्चाहम्" । "वीराणां वीरभद्रोऽहम्" । "ईश्वराणां महेश्वरः" "परेषां परमेश्वर" इत्युक्तम् । न

---

(१) उ० मी० अ० १ पा० ४ अधि० १ सू० १

देवानामीश्वरत्वम्, प्रमाणाभावात्, अनेकार्थत्वापत्तेश्च, वीरभद्रस्य सदाशिवावतारत्वप्रसिद्धेश्च । यच्च विश्वेत्यादि अभ्युपगन्तव्यमित्य-न्तम् । तदप्यसत् । यतो मोक्षधर्मेषु "निहतास्तेन वै पूर्वं" इत्यस्य पूर्वश्लोकः—

तं विद्धि रुद्रं कौन्तेय देवदेवं कपर्दिनम् ।

कालः स एव कथितः क्रोधजेति मया तव ॥ इति ।

निहतास्तेनेत्यस्योत्तरश्लोकौ ।

अप्रमेयप्रभावं तं देवदेवमुमापतिम् ॥

नमस्व देवं प्रयतो विश्वेशं हरमक्षरम् ।

यस्य ते कथितः पूर्वं क्रोधजेति पुनः पुनः ॥ इति ।

तत्र पूर्वश्लोके "कालः स एव कथित" इति, "कालोऽस्मि लोकक्ष-यकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः" इति गीतायामित्यर्थः । क्रोध-जेति मया तवेति मोक्षधर्मेष्वेव नारायणीये । "यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसम्भवः" इत्युक्त्वाऽनुपदमेव—

कपर्दी जटिलो मुण्डः श्मशानगृहसेवकः ।

उग्रव्रतचरो योगी रुद्रः परमदारुणः ॥

दक्षक्रतुहरश्चैव भगनेत्रहरस्तथा ।

नारायणात्मको ज्ञेयः पाण्डवेय ! युगे युगे ॥

तस्मिन् हि पूज्यमाने वै देवदेवे महेश्वरे ।

सम्पूजितो भवेत् । पार्थ ! देवो नारायणः प्रभुः ॥

अहमात्मा हि लोकानां विश्वानां पाण्डुनन्दन ! ।

तस्मादात्मानमेवाग्रे रुद्रं सम्पूजयाम्यहम् ॥

यद्यहं नार्चये यं वै ईशानं वरदं शिवम् ।

आत्मानं नार्चयेत्कश्चिदिति मे भाविता मतिः ॥

मया प्रमाणं हि कृतं लोकः समनुवर्तते ।

प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहम् ॥

यस्तं वेत्ति स मां वेत्ति यो हि तं स हि मामनु ।

रुद्रो नारायणश्चेति सत्त्वमेकं द्विधा कृतम् ॥

न हि मे केनचिद्देयो वरः पाण्डवनन्दन ।

इति सञ्चिन्त्य मनसा पुराणं रुद्रमीश्वरम् ॥

पुत्रार्थमाराधितवानहमात्मानमात्मना ।

न हि विष्णुः प्रणमति कस्मैचिद्विबुधाय वै ॥

ऋते आत्मानमेवेति ततो रुद्रं भजाम्यहम् ।

सब्रह्मका सरुद्राश्च सेन्द्रा देवाः सहर्षिभिः ।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् ॥ इति ।
कालः स एव कथितः क्रोधजेति मया तव ।
यस्य ते कथितः पूर्वं क्रोधजेति पुनः पुनः ॥ इति ।

नारायणीय एव "त्वं चैव क्रोधजस्तात पूर्वसर्गे सनातन" इत्युक्त्वा ऽनुपदमेवोक्तम्—

उवाच देवमीशानमीशः स जगतो हरिः ।
यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु ॥
नावयोरन्तरं किञ्चिन्मा ते भूद्बुद्धिरन्यथा ॥ इति ।

एवं पूर्वोत्तरभागयोरुमापतिनारायणयोर्विस्पष्टमभेदावगमेन "मयैवैते निहताः पूर्वमेव" इत्यत्र मच्छब्देन श्रुतिवशान्नारायणविवक्षायां निहतास्तेन वै पूर्वम्" इत्यनेन न विरोधः । स्वयमेव भगवता "कालः स एव कथितः क्रोधजेति मया तव" इति पूर्वोक्तमनुवदताभेदाभिप्रायेण विरोधस्य परिहृतत्वात्, दुर्योधनादिलयाय क्रोधेन रुद्रावतारं सम्पादितवतो भगवतः प्रयोजककर्तृत्वेन "मयैवैते निहता" इति कर्तृत्वोक्तिसम्भवाच्च । अत एव "प्रतिप्रस्थातः! सवनीयान् निर्वपस्व" इति प्रैषमुक्तवतोऽध्वर्योः प्रातरनुवाकानुपाहितपक्षे स्वप्रेरितप्रतिप्रस्थात्रनुष्ठितत्वेन स्वकर्तृकनिर्वापोपस्थापितं प्रोक्षणादिकमनुष्ठेयं न तु प्रचरणीहोमादि लौकिकाग्निरित्युक्तं पञ्चमे(१)। तत्सिद्धं बाधकान्तराभावात्, "मन्मना भव" इत्यादौ च बहुषु शब्देषु मुख्ये सम्भवति लक्षणाया अन्याय्यत्वात्, पूर्वाचार्यैश्चाविरोधेन व्याख्यानात्, भगवद्गीतायाः श्रीकृष्णपरत्वम् । एवञ्च—

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥

इति सञ्जयोक्तिः सङ्गच्छते । इतरथा हरस्येति वदेत्, न वदेद्धरेरिति । तस्माद्गीताबलादपि सिद्धं नारायणस्य परमात्मत्वम् ।

ननु कश्चिदार्षग्रन्थेषु 'मायाशबलात्परब्रह्मण आकाशस्तदभिमानी सदाशिवश्च जायते ततो वायुस्तदभिमानीश्वरः ततस्तेजस्तदभिमानी रुद्रः तत आपस्तदभिमानी सत्त्वसहितो विष्णुः ततः पृथिवी तदभिमानी च हिरण्यगर्भो जायते' इति श्रूयते । अतो मायाशबलाज्जायमानत्वेन विष्णोस्ततो भिन्नत्वात्कथं परमा-

(१) पू० मी० अ० ५ पा १ अधि १३ सू० २५

त्मत्वमिति चेत् । न । आदिजीवत्वेन तत्र तत्रोक्तस्य हिरण्यगर्भ-
स्यानीश्वरकार्यत्वासम्भवेन विष्ण्वन्तानां परमात्मत्वस्यावश्यवक्तव्य-
त्वात्, अन्यश्रवणस्य चावतारत्वेनोपपत्तेः । तथा हि । "यो देवानां
प्रथमं पुरस्तद्विको रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमानम्" इति
हिरण्यगर्भस्य प्रथमत्वं तैत्तिरीयश्रुतावुक्तम् । देवानां प्रथममादिभूतमिति
च विद्यारण्यैर्व्याख्यातम् । तथर्ववेदे "हिरण्यगर्भः समवर्त्तताग्रे
भूतस्ये"ति । "यो ब्रह्माणं विदधाति पूर्वम्" इति च मन्त्रः । सदा-
शिवादीनामनीश्वरत्वे सदाशिवस्यैव प्राथम्यं वाच्यं न तु हि-
रण्यगर्भस्येत्येताः श्रुतयः, उपरुध्येरन् । न च छान्दोग्यावगततेजः
प्राथम्यस्येव हिरण्यगर्भप्राथम्यस्यापि मानान्तरानुरोधेन बाधः
शङ्क्यः, छान्दोग्यमात्रगतप्रथमया कल्प्यतेजःप्राथम्यस्य श्रुत्यन्त-
रसिद्धेनानन्यथासिद्धवियदुत्पत्तिपरार्थेन बाधेऽपि बहुश्रुतिषु श्रूयमाण-
हिरण्यगर्भप्राथम्यस्य स्मार्त्तेनान्यथोपपद्यमानेन च सदाशिवाद्युत्पत्ति-
श्रवणेन बाधायोगात् । किञ्च, अविद्योपाधेर्भिन्नस्वरूपस्य च स्वरूपा-
नादित्वेनानीश्वराणामुत्पत्तिर्लिङ्गशरीरात्मनेति सर्वसिद्धान्तः । न च
सदाशिवादिविष्ण्वन्तानां लिङ्गशरीरात्मनोत्पत्तिः सम्भवति । तस्या
पञ्चीकृतपञ्चभूतकार्य्यत्वात् पृथिव्याः पूर्वमुत्पत्त्यसम्भवात् । नापि स्थू-
लशरीरात्मनोत्पत्तिः, तत्र लिङ्गशरीरं विना चेष्टाऽयोगेनोत्तरकार्य्यज-
नकत्वायोगात् । प्राज्ञतैजसविश्वानामानन्दमयादिकोशानां चोत्पत्तौ
क्रमावश्यम्भावेन लिङ्गशरीरानन्तरमेव तदुत्पत्तेश्च । स्थूलस्य पञ्चभूत-
कार्य्यत्वेन तदवस्थायां सुतरामयोगाच्च । मायाशबलावतारत्वे तु मा-
यायाः स्वाश्रयाव्यामोहकत्वेन तेषां स्वतः सर्वज्ञत्वात् सर्वशक्तित्वा-
च्चेति मायिकलीलाविग्रहात्मनोत्पत्तेरुत्पादनस्य चोपपत्तिः । अत एव
श्रीभागवतम् । "मायामयस्य न तु भूतमयस्य" इति । न चानीश्वराणां
मायिकविग्रहसम्भवः, पूर्वकल्पस्थमौलिकलिङ्गशरीरसंस्कारवताम-
मीषां भौतिकलिङ्गशरीरोत्पत्तेरवश्यम्भावात्, हिरण्यगर्भस्य तु भूत
सृष्टिसमनन्तरभाविनो भौतिकलिङ्गशरीरात्मनोत्पत्तिः साम्प्रदायिकै-
रुक्तेति युक्तमस्यानीश्वरत्वम् । किञ्च बृहदारण्यके अक्षरब्राह्मणे आका-
श एव तदोतं च प्रोतञ्चेत्यवधारणेनाऽब्रह्मव्युदासेनाकाशशब्दिते मा-
याशबले परब्रह्मणि सूत्राख्यहिरण्यगर्भस्यौतत्वप्रोतत्वमुक्तं, तद्विष्ण्व-
न्तानामनीश्वरत्वे न घटते । तथा हि अत्र न तावत् तच्छब्देन समष्टिलि-
ङ्गशरीरात्मकं सूत्रं स्वीकृत्य तस्य भूताकाशे ओतत्वं प्रोतत्वं च वक्तुं
शक्यम् । लिङ्गशरीरस्य पञ्चभूतेषु अज्ञाने चोतत्वप्रोतत्वेनावधारणा

योगात्। अत आकाशशब्दं मायाशबले वाचस्पतिमिश्रोक्तरीत्या गौणं स्वीकृत्य पङ्कजादिकाक्तरीत्या वाचकं वा स्वीकृत्य चेतनस्य हिरण्यगर्भस्योपादानात्मनोत्पत्तिरीश्वरायत्तत्वाशयेन तस्मिन्नोतत्वप्रोतत्वप्रतिपादनं वाच्यम्। तच्च मायाशबलावतारत्वेन विष्णवन्तानां मायाशबलत्वे सम्भवति। अन्यथाऽवधारणायोगतादवस्थ्यात्। न च यस्मिन् हिरण्यगर्भ ओतश्च प्रोतश्च साक्षात् स एव विष्णुः, अनीश्वरोऽप्याकाशशब्दित इति शङ्क्यम्। अनीश्वर ओतप्रोतस्य मायाशबल ओतप्रोतत्वाबाध्यम्भावेनावधारणायोगतादवस्थ्यात्। "आकाशो वै नामरूपयोर्निर्वहिता" "दहरोऽस्मिन्नन्तराकाशः" आकाश इति होवाच"इत्यादावाकाशशब्दस्य मायाशबले प्रसिद्धत्वाच्च। अनीश्वरपरत्वे"अनतिप्रश्न्यां वै देवताम्" इति प्रश्नस्तुत्यनुपपत्तेः। परमकारणप्रश्नस्यावश्यकर्तव्यत्वेन नमोऽस्तु याज्ञवल्क्यायेति समाप्त्ययोगाच्च। उक्तञ्चाचार्यैः सूत्रात्मकं जगद्व्याकृत आकाशे अभिव्यव पृथिवी त्रिष्वपि कालेषु वर्तते उत्पत्तौ स्थितौ लये चेति। उक्तस्यैवार्थस्यावधारणार्थं पुनः प्रश्नप्रतिवचनमुच्यत इति। तदिदं भाष्यं वार्त्तिके तत्तच्छ्रुत्युपन्यासपूर्वकं व्याख्यातम्।

आकाशवचसात्मैव ज्ञेयो नान्योऽत्र कश्चन।
सर्वान्तरत्वं नान्यस्य युज्यतेऽनात्मनो यतः॥
आकाशो वा इति तथा श्रुतिरब्रवीत्।
कारणं चात्मनो नान्यत्रश्यन्तेषूपपद्यते॥
जगज्जनिस्थितिध्वंसनियमाद्यर्थकार्यपि।
नात्मनः कारणादन्यत् किञ्चित् सम्भाव्यते श्रुतेः॥
एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययः।
माण्डूक्यश्रुतिवच इति स्पष्टमधीयते।

योनिः=उपादानम्।

नातोऽन्तर्यामिणः कल्पमन्यद्व्याकृतं बुधैः।
सर्वस्यैव वशीत्युक्त्वा यतस्तस्यैव वेद्यताम्॥
यस्मात्प्राह श्रुतिस्तस्याद्यन्ता व्याकृतमुच्यते॥ इति।

अत्रानन्दगिरीयम्। यथा पारम्पर्येण पृथिव्यादेराकाशे लयः, तथा सूत्रस्यापि, किं वा साक्षादित्यभिप्रेत्य पुनः प्रश्ने पृथिव्यादिवदनेकत्र सूत्रस्य न लयः, किन्त्वाकाश एवेत्यवधारणेन सिद्धमिति। तस्मादेतत्पूर्वाचार्यव्याख्यातानेकश्रुतिवशादपि न विष्णवन्तानामनीश्वरत्वं युक्तम्। आचार्यैश्च नारायणस्य विस्पष्टमन्तर्यामित्वमुक्तम्। यः ईशः=ईश्वरो नारायणाख्यः पृथिव्यां देवतामन्तरो यमयतीत्यादिना।

वार्तिककृद्भिश्च—

सूत्रादप्यन्तरतमस्त्वन्तर्याम्यधुनोच्यते ।
कार्यकारणभावोऽयं यस्मिन्नुक्ते समाप्यते ॥
कृष्णद्वैपायनो व्यासो वेदात्मा ध्वान्तहानिकृत् ।
प्राहैतमेव वक्तुः प्राणिनां हितकाम्यया ॥
नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्त द्वीपा च मेदिनी ॥
तस्मै नमोऽस्तु देवाय निर्गुणाय गुणात्मने ।
नारायणाय विश्वाय देवानां परमात्मने ॥

गुणात्मने=इति सत्त्वोपाहितायेत्यर्थः । अन्तर्यामित्वं च पारमेश्वरधर्मत्वेन 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्" इत्यत्रोक्तम् । "नारायणः परोऽव्यक्तादिति द्वैपायनोपबृंहणेन च "अव्यक्तात्पुरुषः परः" पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इति श्रुत्यर्थत्वेन निर्णीतस्य सत्त्वोपाहितनारायणस्य स्वरूपेण सदाशिवादिभ्योऽपरत्वायोगात् उत्पत्तिः, अवतारत्वाभिप्रायेणेति निर्णीयते । सत्त्वस्यानादित्वेन तदुपाहितस्यानादित्वाच्च । "क्षयन्तमस्य रजसः पराके" "अनादिनिधनं विष्णुम्" इत्यादिश्रुतिस्मृतिभ्यश्च ।

अस्य=प्रतीयमानस्य रजसः कार्यप्रपञ्चस्य पराके=परे पारे क्षयन्तम्=वसन्तमिति श्रुतेरर्थः । "यास्तु यं पृथिवी न वेद यमापो न विदुः" इत्यादिश्रुतयः तास्वहं पृथिव्यहमाप इत्येवमभिमानवत्यो भूतसृष्टिसमनन्तरं भाविन्योऽन्या एव देवता उक्ताः । भाष्यकारैरन्तर्याम्यधिकरणे पृथिवी देवता ह्यहमस्मि पृथिवीत्यात्मानं विजानीयादिति निर्देशात् । पुराणेषु धरण्युवाचेत्यादिव्यवहाराच्च । न हि हिरण्यगर्भो पृथिवीति न वेद नापीश्वरं न वेद । "ज्ञानमप्रतिघं यस्ये"त्यादिविरोधात् । तथोक्तानेकमानैर्जगदीश्वरस्य भाष्यवार्तिककारैरन्तर्यामितयोक्तस्य नारायणस्याहमाप इत्यभिमानोऽन्तर्याम्यन्तरप्रेर्यत्वमीश्वराज्ञानं वा सम्भवति तस्माद् भूताभिमानिदेवताकार्यभूतोत्तरभूतसृष्टिहेतोर्भगवानेव चतुरोऽवतारानकरोदिति वक्तव्यम् । "तत्तेज ऐक्षत ता आप ऐक्षन्त" इत्यत्र चासेजःशब्दौ परेत्यादिपूर्वश्रुतावेकवचनान्तपुरुषशब्दोक्तस्य जीवस्यांशजादिभेदत्वेन प्रतिपादितस्यैवेदमा परामर्शात् ? बहुत्वेन स्त्रीत्वेन चोपस्थितानां देवतानां पुल्लिङ्गैकवचनान्तसर्वनाम्नोऽन्वयायोगाच्च । यथा बहुत्वेनोपस्थितानां ग्रहाणां "बार्हस्पत्यं ग्रहं गृह्णाति" इत्यत्र तात्रितान्तगतसर्वनाम्ना न तन्निर्देशस्तद्वत् । अधिष्ठानाधिष्ठेययोरभेदमारोप्य कर्म-

त्वेन निर्दिष्टानां देवतानां कर्तृत्वायोगाच्च । अत एव तत्र जीवब्रह्मैक्य-प्रमाणत्वेनैतद्वाक्यमुदाहृतमाचार्यैः । न ब्रह्मणोऽन्यो जीवः, "अनेन जीवेनात्मनाऽनुप्रविश्य" इतिश्रुतेरिति टीकादौ । यदि च श्रीनारायण-स्यैवाधिष्ठानत्वेनैतच्छ्रुतिप्रतिपाद्यत्वादनीश्वरत्वम् , तदा "वेदैश्च सर्वैरहमेव वेद्यो" "नारायणपरा वेदा" इति च न सङ्गच्छेत, वेदाना-मनीश्वरपरत्वायोगात् । श्रुतश्च विष्णुपरत्वं तेषां हरिवंशेऽपि विष्णुम-हिम्नो निरूपणमुपक्रम्य । तथाहि—

य एको विश्वमध्यास्ते प्रधानं पुरुषो हरः ।

हरिरिति बहुपुस्तकेषु पाठः ।

प्रकृत्या यं परं सर्वं क्षेत्रज्ञं वै विदुर्बुधाः ।
तस्याव्यक्तस्य यो व्यक्तो भागः सर्वमयोऽद्भुतः ॥
तस्यात्मा प्रथमो देवो विष्णुः सर्वस्य धीमतः ।
प्रकृत्याः प्रथमो भाग उमा देवी यशस्विनी ॥
व्यक्तः सर्वमयो विष्णुः स्त्रीसंज्ञो लोकभावनः ।
रुक्मिण्याद्याः स्त्रियस्तस्य व्यक्तस्य प्रथमो गुणः ॥
अव्यक्ता प्रकृतिर्देवी गुणी देवो महेश्वरः ।
न विशेषोऽस्ति रुद्रस्य विष्णोश्चामरसत्तम ! ॥
गुणिनश्चाव्ययस्यैव स्रष्टारः प्रथमो गुणः ।
नारायणो महातेजाः सर्वकृल्लोकभावनः ॥
भोक्ता महेश्वरो देवः कर्ता विष्णुरधोक्षजः ।
ब्रह्मा देवगणाश्चान्ये येन सृष्टा महात्मना ॥
महादेवेन देवेश प्रजापतिगणास्तथा ।
पुराणपुरुषो देवो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ॥ इति ।

अस्यार्थः साम्प्रदायिकैरेवमुक्तः । य एकः=सजातीयविजातीयभेद-शून्यः । प्रकृत्या=मायया विश्वमध्यास्ते=हति । मायोपहितमेव परंब्रह्म हर-शब्देन हरिशब्देन वा निर्दिष्टो नद्यत्र प्रकृतिशब्देन हरिहरशक्ती रमोमे वक्तुं युक्ते, तयोरपि चिद्रूपत्वेनालक्ष्यविशेषात् स्वरूपेण विश्वाधा-रत्वानुपपत्तेः । "प्रकृत्याः प्रथमो भाग उमा देवी" इत्यस्यानुपपत्तेश्च । तस्याव्यक्तस्य=मायोपहितस्य । व्यक्त=रूपाभ्यन्तरसत्त्वव्यक्तताम्यन्तो विष्णुशब्दोदितो देवः । व्यक्तः सर्वमयो विष्णुः, इत्यनन्तरोक्तेः । "भाग इव मायोपहितमेव गुणोपाधिभवेण त्रिधा भूतः" इति मैत्रेयश्रुत्या प्रतिपा दनात् । तस्य=सत्त्वोपहितपरब्रह्मणः, भागो देवः=श्रीकृष्णः, साक्षात् सर्वस्य

श्रीमता=प्रथमो निमित्तं चात्मा=स्वरूपं विष्णुरिति विधीयते । "कृष्णस्तु भगवान् स्वयम्" इतिवत् । अतोऽस्याज्ञानतिक्रमणीयेति भावः । "यस्य येनार्थसम्बन्ध" इति न्यायेन(१) प्रकृत्याः प्रथमो भाग इत्यर्थम्, अव्यक्ता प्रकृतिरित्यतः पूर्वं द्रष्टव्यम् । तच्च स्वातन्त्र्येणोमां प्रतिपादयति । अव्यक्ता प्रकृतिरित्यत्र तु महेश्वरगुणत्वेनेति पुनर्वैपरीत्यपाठो न दोषाय । श्रीकृष्णाज्ञावत् तत्पत्नीनामपि साऽनतिक्रमणीयेत्याशयेनाह । रूपक इति । मोहिन्यादिस्त्रीरूपतां स्वस्मिन् सञ्जानानीति शेषः । सर्वमयत्वेन सर्वं कर्तुमस्य सामर्थ्याद् दैत्यसम्मोहनार्थं मोहिनीरूपस्वीकारवत् शक्तिमसत्राजिदादिवधाद्यर्थं रुक्मिण्यादिरूपस्वीकारसम्भवात् तदाज्ञाऽनतिक्रमणीयेत्याशयः । न हि पुरुषोत्तमत्वेनातिप्रसिद्धस्य स्त्रीसंज्ञपशाभिहितं स्त्रीत्वं यथाश्रुतं वक्तुञ्च शक्यम्, प्रकरणविरोधात् । यदा किल पारिजातप्रार्थनार्थं भगवतेन्द्रं प्रति प्रेषितेन नारदेन नानाविधैः, उपायैः प्रार्थित इन्द्रो न पारिजातं दातुमैच्छत् तदैतानि वचनानि स महर्षिरुदाजहार "संहारस्ते भविता" इति भयमप्यभावयत्, न च स्त्रीरूपत्वं भयोपयोगीत्युक्तव्याख्यानमेव युक्तम् । अनतिक्रमणीयत्वे हेत्वन्तरं प्रथमो गुण इति । प्रधानमहिषीत्वाद्नतिक्रमणीया इत्याशयः । तत्रैव हेत्वन्तरमाह प्रकृत्या इति सार्द्धेन । उमाविग्रहः स्वेच्छाकृतोऽज्ञानकार्यं न तु भूतमय इत्यर्थः । रुद्रग्रहणेन रुद्रस्य संहारहेतुत्वं प्रसिद्धम् । तदविशेषादस्य तदाज्ञाया अनतिक्रमणीयत्वम् । अन्यथा ऽनेन तव संहारः स्यादिति भावः । उमामहेश्वरौ निर्दिश्य रुद्राद्विष्णोर्विशेषाभावं वदन् रमाया उमायाः अविशेषं सूचयामास । तं प्रकटयति । गुणेन इति । अयमाशयः । मार्कण्डेयपुराणात् "चतूरूपं न भिद्यते" इति वचनान्तराच्च सत्यपि उमाशब्दवाच्यस्य विग्रहविशेषोपहितचैतन्यस्येश्वरत्वाविशेषे विग्रहस्य कार्यत्वेन प्रतिकल्पं भेदाद्विष्णुरुद्रोपाध्योः सत्त्वतमसोरनादित्वेनाध्यस्तत्वादस्ति ताभ्यामस्या विशेषः, न तु तयोः परस्परं कश्चित् । गुणयोरनादित्वाविशेषात् । "एक एव रुद्र एको दधार" इत्याद्यनेकाकप्रमाणैरुभयोरीश्वरत्वाविशेषावधारणाच्चेति । तादृशस्य श्रीविष्णोः सदारः श्रीकृष्णः प्रथमो गुणः=मुख्योऽवतार इत्यर्थः । आज्ञानतिक्रमे हेत्वन्तरं भोक्तेति । अयं हि पालनकालः, अज, महेश्वरः केवलं पश्यति पालनकर्ता स्वयमेव । अतस्त्वत्पालनहेतुत्वेन तदुपजीव्य

(१) यस्य येनार्थसम्बन्धो दूरस्थस्यापि तस्य सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥

इति पूर्णश्लोकः ।

इत्याशयः। स्वजनकजनकत्वेनाप्युपजीव्य इत्याह। ब्रह्मेति। ब्रह्मा=वि-
राट्। प्रजापतयः=कश्यपाद्याः। न तु गुणमूर्त्तीनां सृष्टिः सम्भवति। गुणा-
नामनादित्वेन तासामनादित्वात्। ननु रुद्रस्यापि जन्म श्रूयते। अण्डं हि-
रण्मयं मध्येसमुद्रं रुद्रस्य वीर्यात् प्रथमं बभूव। तस्मिन् ब्रह्मा वि-
ष्णुर्जायते जातवेदा इति रुद्रान्नारायण इत्यपि क्वचित्पुराणेषु श्रूयते।
सत्यम्। तत्तु ब्रह्मादिप्रार्थनावशात् वराहादिवत् तत्तन्महाभूतस्था-
पनाय भक्तानुग्रहायावताररूपेण लीलाविग्रहस्वीकारमात्रं, न अश्व-
मेधोपासनया हिरण्यगर्भजन्मेव श्रीविरूपाक्षस्य श्रीनारायणस्य वा क-
र्ममूलत्वेन तच्छुचत इत्याशयेनाह पुराणपुरुष इत्यादि। तस्मादनेकश्रुति-
पुराणवचनवशात् सिद्धं हरिहरयोरीश्वरत्वम्। यथा रामकृष्णादीनां
श्रीनारायणरूपता यथा वा वीरभद्रादीनां श्रीसदाशिवरूपता। एतावांस्तु
विशेषः। तत्तदवताराणां स्वेच्छानिर्मितकादाचित्कपरिच्छिन्नतत्तल्लीला-
विग्रहोपाधिकत्वेन परिच्छिन्नत्वादिव्यवहारः। अवतारिस्वरूपस्य तु त-
दनवच्छेदेनाप्यवस्थानं व्यापकोपाधित्वात्। नैवं गुणोपाधिकेषु। गु-
णानामनादित्वात् मायामभिव्याप्य वर्त्तमानत्वाच्च। एवञ्च यथा वस्तु-
तः, अखण्डमद्वितीयं चैतन्यं स्वरूपेणापरिच्छिन्नमपि अनादिभावरूपा-
ज्ञानस्य चिन्मात्रनिष्ठत्वेन(१) व्यापकत्वात् तदवच्छिन्नं सत् साक्षिरूप-
तामापन्नं साक्षिरूपेणैवावतिष्ठते नत्वज्ञानानवच्छिन्नं पृथगपीति। अज्ञानं
वा मिथ्याप्य अस्ति शक्तिद्वयम्। आवरणशक्तिर्विक्षेपशक्तिश्च। तत्रा-
वरणशक्तिप्रधानं अज्ञानम् अविद्या, विक्षेपशक्तिप्रधानमज्ञानं च माया।
तदुपाधिद्वययोगात् साक्षिचैतन्यं, जीवेश्वररूपेणवावतिष्ठते न तु
तदनवच्छिन्नं पृथगपि। अज्ञानस्य शक्तिद्वयस्य च धर्मधर्मिभावेन सा-
पेक्षोपाधित्वाच्छक्तिद्वयस्य व्यापकत्वाच्च। एवं "देवात्मशक्तिं स्वगु-
णैर्निगूढाम्" इत्यादिवाक्येभ्यः सत्त्वादीनां मायागुणत्वावगतेर्गुणगुणि-
नोश्चाभेदेन सापेक्षोपाधित्वाच्च मायाशबलेश्वरचैतन्यं, अनादिसि-
द्धतदुपाधित्रययोगाद्ब्रह्मादिरूपेणैवावतिष्ठते न तु पृथक्। मायाश-
बलेश्वररूपत्वं विष्ण्वादीनां विस्पष्टमुक्तं कूर्मपुराणे। "सत्त्वं गुणमु-
पाश्रित्य विष्णुर्विश्वेश्वरः स्वयम्" इत्यादिना। तथा—

अहं नारायणो गौरी जगन्माता सनातनः।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः॥ इति।

(१) तदुक्तं सङ्क्षेपशारीरके।
आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥ इति।

अत्र सर्वेश्वर इत्यनेन "मायिनं तु महेश्वरम्" इतिश्रुत्युक्तमायाशबलपरामर्शः । अहमित्यनेन गुणविशेषोपाधिकस्य साम्बशिवस्य परामर्शः । अत एवाऽम्बिकायाऽस्यैव वचनम् । "मामेव केशवं देवमाहुर्देवीमिहाम्बिकाम्" इत्युक्त्वा ।

> एष धाता विधाता च कारणं कार्य्यमेव च ।
> भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् ॥
> कर्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः ।
> स्रष्टा पाता वासुदेवो विश्वात्मा विश्वतोमुखः ॥
> कूटस्थो ह्यक्षरव्यापी योगी नारायणाह्वयः ।
> कारकः पुरुषो ह्यात्मा केवलं परमं पदम् ॥

इत्यनेन प्रागुक्तं केशवमुपवर्ण्य प्रागुक्ताम्बिकावर्णनम्—

> सैषा माहेश्वरी माया मम शक्तिर्निरञ्जना ।
> शान्ता सत्या परानन्दा परं पदमिति श्रुतिः ॥
> अस्याः सर्वमिदं जातमत्रैव लयमेष्यति ।
> एषैव सर्वभूतानां गतीनामुत्तमा गतिः ॥

इत्यनेन कृत्वा—

> तयाहं सङ्गतो देव्या केवलो निष्कलः परः ।
> पश्याम्यशेषमेवेदं यस्तद्वेद स मुच्यते ॥
> तस्मादनादिमध्यान्तं विष्णुमात्मानमीश्वरम् ।
> एवमेकं विजानीध्वं ततो यास्यथ निर्वृतिम् ॥ इति ।

एवमिति=सत्यपि गुणोपाधिकभेदे, ईश्वररूपेणेत्यर्थः । माहेश्वरीति । महेश्वरशब्दोदितमायाशबलोपाधेर्मायाया अधिष्ठात्री । अत एव मम शक्तिः=कारणत्वनिर्वाहिका । मायायाः कारणत्वनिर्वाहकत्वेन तदधिष्ठाऽया अपि तत्त्वात् । अत एवाह तयेति । वस्तुतः असङ्गस्यापि अशेषद्रष्टृत्वं तत्कृतमित्यर्थः । एवञ्च य एव निष्कलः शिवशब्दोदितः, अन्वया सङ्गतत्वेनोक्तः । तद्वचसा "अहं नारायणो गौरी" इति पूर्वोक्तेनायमर्थो निर्णीयते साम्बसदाशिवनारायणगौरीरूपेण ईश्वरशब्दोदितमायाशबलमवातिष्ठत इति । न चाहमीश्वरो नारायणगौरीरूपेणेत्यन्वयः शङ्क्यः, व्यवहितान्वयापत्तेः, बहुत्वेत्यस्याऽयोगाच्च । अस्मिन् वचसि विभज्येति तत्तल्लीलाविग्रहभेदतः। तत्र गुणकृतभेदो ब्रह्मादीनामित्यनेकधोक्तम् । गौर्य्यास्तु लीलाविग्रहतया पारमेश्वरमेव चैतन्यं मायिकस्त्रीलीलाविग्रहोपाधिना गौरीति व्यवह्रियते । एवं

लक्ष्मीः । सापि ईश्वररूपतया-

यस्य सा जगतां माता शक्तिस्तद्धर्मधर्मिणी ।
माया भगवती लक्ष्मीः-

इत्यादि कूर्मपुराणादिषु श्रूयते ।

अत्र मातेति जगत्स्रष्टृत्वम् । शक्तिरिति कारणत्वनिर्वाहकत्वम् । तच्चास्याः कारणत्वनिर्वाहकमायाऽधिष्ठातृत्वात् । तद्धर्मधर्मिणीति पूर्वोक्तश्रीवासुदेवस्य ये धर्मा नित्यसर्वज्ञत्वादयस्तद्वत्त्वम् । मायेति तदधिष्ठातृत्वम् । भक्तानुग्रहार्थं नानाकूर्मादिलीलाविग्रहस्वीकारेण भगवतोऽमृतमन्थनस्येव लीलाविग्रहद्वयस्वीकारेण परमात्मनो गौरीरूपेण लक्ष्मीरूपेण च मायाधिष्ठातृत्वम् । उभयोस्तत्र तत्र तच्छ्रवणात् । भगवतीति-

उत्पत्तिं च विनाशञ्च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥

भगवद्रूपतामाह ।

तादृशं पारमेश्वरमेव चैतन्यं मायिकस्त्रीलीलाविग्रहद्वयस्वीकारेण गौरीति लक्ष्मीरिति च व्यवह्रियते । गुणत्रयोपाधियोगात्तु विष्ण्वादिरूपेण । गुणत्रयस्य चानाद्यनन्तत्वात् तदुपाधिकानामपि तथात्वम् । अत एव चोक्तम् । "तस्मादनादिमध्यान्तं विष्णु"मिति । महाभारतेऽपि । "अनादिनिधनं विष्णु"मिति । श्रीसदाशिवस्यापि तत्र तत्रानादित्वश्रवणं तदुपाधेर्गुणविशेषस्यानादित्वात् । अनयोरेव तत्तद्गुणविशेषोपाधिकयोः क्रमेण रामकृष्णाद्या वीरभद्राद्याश्चावताराः ।

ये तु लाघवतर्कवशेन एकमेवेश्वरं स्वीकृत्य गुणत्रयानाश्रयणेनैकस्यैवेश्वरस्य विष्ण्वाद्याः संज्ञा इत्याहुः, तेषां पुराणेषु व्यवस्थया एतदवतारश्रवणं न सङ्गच्छते । यथा वीरभद्राद्याः शिवसंज्ञस्य शङ्करसंज्ञस्य चावताराः, एवं विष्णोरप्यवतारा इति प्रसिद्धिः स्यात्, लीलाविग्रहविशेषमात्रोपाधित्वेऽपि किं वैकुण्ठवासिनः क्षीराब्धिवासिनो वावतारा इति विनिगमकाभावः, लीलाविग्रहाणां च तुल्यत्वेनावतारकल्पनानुपपत्तिः । अनित्यविग्रहोपाधिकानाञ्च "अनादिनिधनं विष्णु"मिति व्यवहारायोगः । नित्यविग्रहस्वीकारे "अपाणिपादः" इत्यादिबहुश्रुतिविरोधः, अपसिद्धान्तश्च । गुणविशेषाश्रयणे तेषामनुमानासिद्धत्वेन श्रुतिपुराणवाक्येभ्यः सिद्धौ तत एव तदाधारमायाया अपि जगदुपादानत्वसिद्धौ परमाण्वादिकल्पना वृथैवेति वेदान्तसिद्धान्त एव युक्त इति ।

येऽपि वेदान्तिमते स्थित्वा चिन्मत्रचैतन्यमीश्वर इत्याहुः । तन्मतेऽपि

अनेकेष्वपि प्रतिबिम्बेषु बिम्बस्य लोके एकत्वदर्शनादवताराणां व्यवस्थाश्रयणं न सङ्गच्छते । गुणविशेषोपाधित्वाश्रयणे तु तदाधारतदभिन्नमायाया उपाधित्वावश्यंभावेन लोकवेदापरिज्ञातबिम्बस्य सोपाधित्वकल्पनायोगः, लोके बिम्बस्य शुद्धत्वेन प्रसिद्धेः । बिम्बस्य च लोके प्रतिबिम्बदेशानवस्थानदर्शनेनान्तर्यामित्वानुपपत्तिः ।

एतेन सत्त्वमात्रोपहित एक ईश्वर इत्यप्यपास्तम् । अवतारव्यवस्थानुपपत्तेस्तुल्यत्वात्, "मायिनं तु महेश्वरम्" इत्यादिप्रमाणेभ्यो मायोपाधिकत्वावश्यंभावाच्च । न च मायाशब्दाभिधेयं सत्त्वमेवेति शङ्क्यम् । आचार्यैर्विक्षेपशक्तिप्रधानाज्ञानस्य मायाशब्दाभिधेयत्वनिर्देशात् । मायिकतया लोके प्रसिद्धस्य च व्याघ्रादेरधिष्ठानाज्ञानकार्यत्वसम्भवात् तत्त्वज्ञानजननस्वभावसत्त्वगुणकार्यत्वायोगाल्लोकवेदयोश्च शब्दार्थैक्याच्च मायाशब्दाभिधेयं सत्त्वम् । अवश्यमेषाऽविद्या शक्तिरित्यादौ मूलाज्ञानवाचकतया प्रसिद्धाविद्याशब्दसामानाधिकरण्येन मायाशब्दस्य विवरणाचार्योदाहृतश्रुतिस्मृत्यादौ प्रयोगाच्च । सत्त्वस्य च निर्विषयत्वेन तदुपादानकस्य जगतो ब्रह्मोपादानकत्वं न स्यात् । सम्भवति तु विवर्तमानाज्ञानविषयत्वेन ब्रह्मण उपादानत्वं शुक्तेरिव रजते । एवञ्च "मायां तु प्रकृतिं विद्या"दित्यादौ विक्षेपशक्तिप्रधानाज्ञानस्यैव प्रकृतित्वोक्तिसम्भवात् तदेव मायाशब्दाभिधेयमुक्तश्रुतिपुराणप्रामाण्यादीश्वरोपाधित्वेन निर्णीयते, तदुपहितेश्वरस्यैव च तन्निष्ठतदभिन्नतत्तद्गुणविशेषोपाधियोगात्, विष्ण्वादिरूपत्वम् । मायायाश्च स्वाश्रयाव्यामोहकत्वात्सर्वेषां गौरीलक्ष्मीसहितानां नित्यसर्वज्ञत्वम् । अत एव न तेषां कदापि व्यामोहः । ननु 'प्रमादमोहौ तमस' इत्यादिस्मृतेस्तमसोपहितेश्वरस्य मोहप्रसक्तिरिति चेत् तर्हि 'न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति" इति श्रुतेः कर्पूरगौरमेघश्यामशरीरिण ईश्वरस्य प्रियाप्रियं प्रसज्येत । अथेश्वरस्य रागादिदोषाभावाज्जीवाधिकारैषा श्रुतिः, तर्हि मायोपहितस्यैव तमसोपहितत्वान्मायायाश्च स्वाश्रयाव्यामोहकत्वात्स्मृतिरपि जीवाधिकारेति न तमसोपहितत्वेन कोऽप्यपकर्षः, सममेव तु मायोपहितत्वेन विष्ण्वादीनामैश्वर्यम्, अत एव सत्यपि गुणोपाधिके भेदे तेषां तत्र तत्राभेदव्यवहारः । चैतन्ये हि वस्तुतो भेदो नास्त्येव । अस्मदादीनां भ्रान्त्या तद्व्यवहारः । मायायाः स्वाश्रयाव्यामोहकत्वाच्च तत्र सति तेषामभेदव्यवहारः । यथा कश्चिद्योगी अनेकानि शरीराणि विधाय तेषु स्वस्य सदासत्वस्वामिभावं व्यवहरन्नपि न स्वात्मानं भिन्नं मन्यते, नापि स्वस्मिन् दासत्वं वस्तुतः पश्यतीति तद्वत् । तथा च शिववचनम् ।

ब्राह्मे—

त्रिधाभिन्नोऽस्म्यहं विष्णो ! ब्रह्मविष्णुभवाख्यया । इति ।

नारायणवचनं-नारायणीये—

नावयोरन्तरं किञ्चिन्मा ते भूद्बुद्धिरन्यथा ॥ इति ।

गौरीवचनम् । कौर्मे—

त्वं हि नारायणः साक्षात्सर्वात्मा पुरुषोत्तमः ।
प्रार्थितो दैवतैः पूर्वं जातो वै देवकीसुतः ॥
पश्य त्वमात्मनाऽऽत्मानममलं परमं च यम् ।
नावयोर्विद्यते भेद एकं पश्यन्ति सूरयः ॥ इति ।

यथा च योग्यनेकदेहैः कृतेष्वपि कार्येषु कर्तृत्वमेकदेहावच्छेदेनैवापरदेहावच्छेदेनापि व्यवहरति, मयैतदखिलं कृतमिति । तद्वत् "अहमेव हि संहर्ता स्रष्टाहं परिपालकः" इति हरवचनम् । "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा" इतिहरिवचनं च । न चैतावता शास्त्रदृष्टिन्यायप्रसक्तिः । नित्यसर्वज्ञत्वेन भ्रान्तिसिद्धभेदस्यैतान्प्रति कदाप्यप्रसक्तेः । योगिन इव स्वरूपे । न हि योगी स्वीयानेकदेहान्तरकार्यकर्तृत्वं देहान्तरे मन्यमानः "शास्त्रदृष्ट्या तूपदेशः" इति(१)न्यायविषयो भवति । एवं त्रयाणां गुणोपहितानां ब्रह्मविष्णुशिवानामीश्वरत्वं न तु तेभ्यः पृथक्त्वं मायोपहित इति सिद्धम् ।

विष्णुपुराणवचनम् । [अंश १ अध्या० २२ श्लो० ३०-३२]

ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥
विष्णुर्मन्वादयः कालस्तथैवाखिलजन्तवः ।
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ इति ।
रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्द्धाप्रलयायैता जनार्दनविभूतयः ॥ इति ।

तत्र सत्त्वोपहितं विभूतिमत्त्वेनाङ्गीकृत्य विभूतित्वेनावतारा व्याख्येयाः । तेषां च सत्यपीश्वरत्वे लोकसङ्ग्रहार्थं सेवकभावाङ्गीकाराद्विभूतित्वोक्तिः । एवं तापनीये ब्रह्मा विष्णुर्महेश्वर इत्याद्यारभ्य "सर्वो वै श्रीनृसिंहो देव" इत्यपि गुणविशेषोपाधिकस्यावतारित्वे श्रीनृसिंहस्य चावतारत्वे तदुपासनायां वचनबलात् ब्रह्मविष्णुमहेश्वरशब्दप्रतिपादितानां अवतारविशेषाणां शेषत्वाध्यवसानम् । एवं—

ऊर्ध्वविग्रहा शुद्धा त्रिनेत्रा चन्द्रशेखरा ।
नीलग्रीवा परानन्दप्रमोदा ताण्डवप्रिया ॥

---

(१) [illegible] अ० १ पा० १ अधि० ११ सू० ३०

ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ॥

इत्यादौ सत्यपि गुणविशेषोपाधिकब्रह्मणः अवतारित्वे ताण्डवप्रियस्य चावतारत्वे तदुपासनाकृत्त्वेन ब्रह्मविष्णुशब्दोदितगुणमूर्त्यवताराणां शैवत्वाध्यवसानम् ।

तथा—

साक्षात् परतरस्यैव वस्तुनः सर्वसाक्षिणः ।
अस्ति मूर्तिः परा शुद्धा स्वतन्त्रा पापनाशिनी ॥
तस्याऽसाधारणी मूर्तिः साम्बा चन्द्रार्द्धशेखरा ।
ब्रह्मविष्णुमहेशानास्तां ध्यायन्ति निरन्तरम् ॥

इत्यत्र साक्षात् परतरस्यैवेत्यनेन मायाशबलमुक्तम् । अस्तिमूर्तिरित्यनेन तदेव गुणविशेषोपाधिकम् । तस्यासाधारणीत्यनेन गुणविशेषोपाधिकस्यैव मायाशबलस्यावताररूपा काचिन्मूर्तिः । ब्रह्मविष्णुमहेशानशब्दोदितानां तु अवतारविशेषाणां ध्यातृत्वं लोकशिक्षार्थमिति । एवं—

सृजत्यशेषमीशस्य शासनाच्चतुराननः ।

तिसृभिर्मूर्तिभिश्चाहम्—

इति च ।

विष्णुः पालयते विश्वं जगद्योनेर्नियोगतः ।
सृजते ग्रसते चापि स्वकाभिस्तनुभिस्त्रिभिः ॥
हरत्येव जगत्सर्वं हरस्तस्यैव शासनात् ।
सृजत्यवति विश्वात्मा त्रिधा भिन्नः सुरक्षति ॥

इत्यपि व्याख्येयम् । तथा हि । न तावज्जीवादीश्वरस्येव मायाशबलस्य तत्तद्गुणोपाधिकेभ्यः परत्वं युक्तम् । जीवेश्वरोपाधिभूतशक्तिद्वयस्य परस्परानिरपेक्षत्वकल्पनया तद्गुणानां तदभावात्, गुणगुणिभावेन सापेक्षत्वात् । न च सापेक्षोपाधिस्थले शासयितृशासितव्यत्वादि व्यवह्रियते । न हि विश्वतैजसप्राज्ञेषु प्राज्ञः शासितव्य इति व्यवहरन्ति । अवतारेषु तु तत्तल्लीलाविग्रहाणां निरपेक्षोपाधित्वेन संवादादिरूपाः सर्वे व्यवहाराः श्रूयन्ते । तद्यथा ब्राह्मणबालकानयनाय जिष्णुना सह प्रस्थितस्य श्रीकृष्णस्य शेषशायिना सह ।

ववन्द आत्मानमजं तमच्युतो जिष्णुश्च तद्दर्शनजातसाध्वसः ।
तावाह भूमा परमेष्ठिनौ प्रभुर्बद्धाञ्जलीः सस्मितमूर्जया गिरा ॥
द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ।
कलावतीर्णाववनेर्भरासुरां हत्वेह भूयस्त्वरयेतमन्तिमे ॥ इति ।

न च श्रीकृष्णेन स वन्दितस्तेन चायमाज्ञापित इत्येतावताऽस्याप·

कर्षः । "कृष्णस्तु भगवान् स्वयम्" इत्याद्यनेकवचनविरोधात् । अतिदा शिवश्रीनारायणावताराणामपिलोन्यःप्रतिप''' : । अत्र च पुण्डरीका स्थश्रीनारायणोपासनमुक्तम् । अक्षिद्वयप्रतिपादनात् । अत एवोपबृंहणं

गारुडे—

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ इति ।

तस्माच्छिवविष्णोस्तदवताराणाञ्च धर्माधर्मासंश्लेषनित्यसर्वज्ञत्वनित्यमुक्तत्वादिनेश्वरत्वाविशेषाद्भजनीयत्वाविशेषः । ततश्च तेषां मध्येऽन्यतरविषयापि कृता भक्तिर्ज्ञानद्वारा मुक्तिहेतुरनायासेन भवतीति सिद्धम् ॥ इति भजनीयनिर्णयः ।

यथा सम्प्रदायं निबन्धाननेकान्
समालोक्य भक्तेरकारीह चिन्ता ।
तया यातु तोषं जगन्नाथ ईशः
कृपालुः पितेव स्वबालोक्तशब्दैः ॥ १ ॥
नामकौमुद्यथो भक्तिमुक्ताफलं
श्रीधरीयो विवेको यश्च भक्तः स्थितः ।
शाङ्करं भाष्यमत्रापि यद्टिप्पणं
भक्तिकाण्डेऽखिलं मूलमेतत्स्मृतम् ॥ २ ॥
शृणुत हरिगुणौघं कीर्तयध्वं सदा तं
स्मरत हरिपदाब्जं तस्य सेवां कुरुध्वम् ।
रचयत हरिपूजां दासभूताः सखायो
नमत सकलमस्मा अर्पयध्वं गृहादि ॥ ३ ॥
य इदं नवविधभजनं गिरिजाभर्तुरमोघितुस्तनुते ।
संसृतिसागरपारं व्रजतीति श्रुतिः स्वयं मनुते ॥ ४ ॥
मुधरपक्षच्छेदनकृन्मदभेदनहेतोर्भूधरधारी ।
जयति यशोदानन्दयशोदः कोऽपि स यामुनपुलिनविहारी॥५॥
धृतबहुविधजलरुहकृतमालो
मृगमदतिलकयुताखिकभालः ।
सज्जनविद्वेषकजनकालो
जयति स कोऽपि यशोदाबालः ॥ ६ ॥

सत्यं श्रीशम्भुपादाम्बुरुहनतमना यः स मुक्तः प्रभूयात्
तद्वद्वाराहकौर्मप्रभृतितनुभृतां सेवकाः स्युर्विमुक्ताः ।
अस्माभिस्तु कश्चिन्मधुरतररवं वेणुना यामुनीये
तीरे कुर्वंस्त्ववञ्चत्स्वचरणकमले तत्र कुर्मो वयं किम् ॥ ७ ॥
तनुते कश्चन यज्ञं कोऽपि च जपमथ परस्तपोराशिम् ।
अहमिह न किमपि जाने श्रीजाने ते पदाम्बुजं जाने ॥ ८ ॥
शुण्डालिमभुजदण्डकृतासुरखण्डन ! जगतो मण्डनरूप ।
आखण्डलमुखसुरमण्डलवरकुण्डलमण्डितकाण्डमिदं ते ॥ ९ ॥
वेदान्तशास्त्रार्थविवेकहेतोः सिद्धान्ततत्त्वं विनिरूपितं यैः ।
कृतश्च यैर्भक्तिविवेचनं तान्समाश्रयन्तान्गुरून् स्वमूर्ध्ना ॥ १० ॥
सदा हरेः सेवनमाचरन्तो ये सन्ति सन्तो हरिभक्तिमन्तः ।
नमामि तान् सर्वनरेषु धन्यान् तेऽमुं निबन्धं प्रविवेचयन्तु ॥ ११ ॥
जन ! कुरु सज्जनसङ्गतिमादौ रचय ततो नवभेदकं भजनम् ।
वृन्दावनजनरञ्जनहेतोराखण्डनमदभञ्जनकर्तुः ॥ १२ ॥
नवनीतकरो बालो नवनीरधरप्रभः ।
कमनीयतनुः कुर्याच्छं नो विष्णुरुरुक्रमः ॥ १३ ॥

इति सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमल-
श्रीमन्महाराजाधिराजप्रतापरुद्रतनुजश्रीमहाराजमधुकरसाहसू-
नुचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीम-
न्महाराजाधिराजश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्म-
जश्रीपरशुराममिश्रसूनुसकलविद्यापारावारपारीण-
धुरीणजगद्दारिद्र्यभञ्जनपारीन्द्रविबुधजनजीवातु-
श्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनिबन्धे
भक्तिप्रकाशः समाप्तः ।

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय

बनारस सिटी ।

भक्तिप्रकाश उपन्यस्तानां श्रीभागवतस्थश्लोकानां स्कन्धादिसंख्याज्ञापकम् ।

पृष्ठसंख्या	श्लोकप्रतीकानि	स्कन्धसंख्या	अध्यायसंख्या	श्लोकसंख्या
२	यदृच्छयेति ।	११	२०	८
,,	जातश्रद्ध इति ।	,,	,,	२७
,,	ततो भजेतेति ।	,,	,,	२८
३	प्रोक्तेनेति ।	,,	,,	२९
,,	भिद्यत इति ।	,,	,,	३०
,,	तस्मादिति ।	,,	,,	३१
,,	यत्कर्मभिरिति ।	,,	,,	३२
४	सर्वमिति ।	,,	,,	३३
,,	दानव्रतेति ।	१०	४७	२४
६	त्रिभुवनेति ।	११	१	५३
,,	तावत्कर्माणीति ।	,,	२०	९
,,	स्वपादमूलमिति ।	,,	५	४२
,,	शृण्वतामिति ।	१	२	१७
,,	नैकात्मतामिति ।	३	२५	३४
,,	न पारमेष्ठ्यमिति ।	११	१४	१४
,,	दीयमानमिति ।	३	२९	१३
८	यथायथेति ।	११	१४	२६
,,	यत्कीर्तनमिति ।	२	४	१५
१०	भक्तिरिति ।	११	२	४२
,,	इत्यच्युताङ्घ्रिमिति ।	,,	२	४३
,,	अथैतामिति ।	,,	३	१७
११	कर्माणीति ।	,,	,,	१८
,,	नित्यार्तिदेनेति ।	,,	,,	१९
,,	एवमिति ।	,,	,,	२०
,,	तस्माद्गुरुमिति ।	,,	,,	२१
,,	तत्रेति ।	,,	,,	२२
,,	सर्वत इति ।	,,	,,	२३
,,	शौचमिति ।	,,	,,	२४
,,	सर्वत्रेति ।	,,	,,	२५
,,	श्र[illegible]ामिति ।	,,	,,	२६
१२	श्रवणमिति ।	,,	,,	२७
,,	इष्टं [illegible]त्तमिति ।	,,	,,	२८
,,	एवमिति ।	,,	,,	२९

पृष्ठसंख्या	श्लोकप्रतीकानि	स्कन्धसंख्या	अध्यायसंख्या	श्लोकसंख्या
,,	परस्परमिति ।	,,	,,	३०
,,	स्मरन्त इति ।	,,	,,	३१
,,	क्वचिदिति ।	,,	,,	३२
,,	इतीति ।	,,	,,	३३
१४	स वै पुंसामिति ।	१	२	६
१५	भक्तियोगेनेति ।	१	७	४
,,	वासुदेव इति ।	१	२	७
,,	इमं लोकमिति ।	३	२५	३९
,,	विसृज्येति ।	,,	,,	४०
२३	आत्मारामा इति ।	१	७	१०
,,	नष्टप्रायेष्विति ।	१	२	१८
,,	तुलयामेति ।	१	१८	१३
,,	दुर्लभ इति ।	११	२	२९
,,	संसार इति ।	११	२	३०
,,	न रोचयतीति ।	,,	१२	१
२४	यतानीति ।	,,	,,	२
,,	महत्सेवामिति ।	५	५	२
,,	तितिक्षव इति ।	३	२५	२१
,,	मय्येति ।	,,	,,	२२
,,	मदाश्रया इति ।	,,	,,	२३
,,	त एत इति ।	,,	,,	२४
,,	तस्मादिति ।	२	१	५
,,	शृण्वन्तीति ।	१	८	३६
,,	तस्मादेकेनेति ।	१	२	१४
२५	पिबन्तीति ।	२	२	३७
२५	पानेनेति ।	३	५	४५
,,	तदेव रम्यमिति ।	१२	१२	४९
,,	आपन्न इति ।	१	१	१४
,,	अविस्मृतिरिति ।	१२	१२	५४
,,	विदुषामिति ।	११	१४	२७
,,	यत्पादयोरिति ।	८	२२	२३
,,	नूनमिति ।	४	९	९
२६	वागीहेति ।	१०	७०	४५

पृष्ठसंख्या	श्लोकप्रतीकानि	स्कन्धसंख्या	अध्यायसंख्या	श्लोकसंख्या
३०	श्रवणमिति ।	७	५	२३
,,	इति पुंसेति ।	,,	,,	२४
,,	धर्मः स्वनुष्ठित इति ।	१	२	८
,,	भविष्ठिति ।	२	३	१९
,,	तान् शोच्यशोच्यानीति ।	३	५	१४
,,	शृण्वतामिति ।	१	२	१७
,,	को वा भगवत इति ।	१	१	१६
,,	प्रविष्ट इति	१	८	५
३१	शुद्धिर्नृणामिति	११	६	९
,,	यस्तूत्तमेति	७	३	^५
,,	इत्थं परस्येति	१०	९०	४९
,,	ज्ञाने प्रयासमिति	१०	१३	३
,,	नात्यन्तिक इति	३	१५	४८
,,	ज्ञानं यदेति	२	३	१२
३२	शृण्वन्निति	१	८	३६
३३	उपगायन्निति ।			
३५	वरेण यमिति ।	११	५	४८
,,	तद्वागिति ।	१	५	११
,,	निवृत्ततर्षैरिति ।	१०	१	४
,,	कर्माणीति ।	१०	९०	४९
३६	नहीति ।	६	१६	४४
३७	नातः परमिति ।	६	२	४६
,,	तस्मादिति ।	६	३	२६
,,	गां दुग्धदोहामिति ।	११	११	१९
,,	इत्थं हरेरिति ।	११	३१	२८
,,	आपन्न इति ।	१	१	१४
,,	कलेरिति ।	१२	३	५१
४२	कृत इति ।	१२	३	५२
४५	स्तेन इति ।	६	२	९
,,	सर्वेषामिति ।	,,	,,	१०
४८	प्रायश्चित्तानीति ।	,,	१	१८
९८	विश्रब्धेणुमिति ।	१०	१३	११
१२५	एवं मन इति ।	५	५	६
१३३	गोप्य इति ।	७	१	२९

इति स्थानज्ञापकपत्रम् ।

[illegible]] [illegible] । सम्पूर्णः । [[illegible] वि० १५] ८

१०७ [illegible] । [illegible] । ([illegible] वि० १) ८

१०८ [illegible] । नं० सं० श्री[illegible]विरचिता । ([illegible] वि० ७) ६

१०९ [illegible] । श्रीमन्[illegible]विरचिता । श्री[illegible] [illegible] कुञ्जिकाव्याख्या [illegible] समन्वित[illegible] च [illegible] । न्यायाचार्य [illegible] पं० [illegible] [illegible] विषमस्थलटिप्पण्या [illegible] च सहिता । (न्या० वि० १६) ८

११० [illegible] ([illegible]) [illegible], [illegible] "[illegible]" [illegible] [illegible] "[illegible]" भूमिकेन [illegible] [illegible] [illegible] [illegible] सहितेन [illegible] "[illegible]" [illegible] तथ, [illegible] श्रीमन्माध्वसम्प्रदायाचार्य-दार्शनिकसार्वभौम-साहित्य [illegible] [illegible] गोस्वामि[illegible] विरचित टिप्पण्या "[illegible]" भूमिकया च संवलितम्, ([illegible]. वि. [illegible])

१११ सारस्वत व्याकरणम् । [illegible] प्रणीतम् । श्री[illegible] [illegible] [illegible], श्रीवासुदेवभट्टविरचितप्रसादाख्य-टीकया च समन्वितम् । कविता[illegible]-[illegible] श्री[illegible] विनिर्मितया मनोरमाविवृत्या च समुल्लसितम् । पूर्वार्द्धम् । (व्या. वि. १३) ६०

११२ सामान्यनिरुक्ति-गादाधरी-गूढार्थतत्त्वालोकः । [illegible] पं० [illegible] [[illegible]] शर्मविरचितः । (न्या. वि. १७) ६०

११३ [illegible] । न्यायाचार्य पं० [illegible] [illegible] टिप्पणीसहिता । (न्या. वि. १८) ६०

११४ मनुस्मृतिः । [illegible] [illegible] [illegible] पं० [illegible] [illegible]-[illegible] [illegible] सहिता । [illegible] । सम्पूर्णा । ([illegible]. वि. [illegible]) ६०

११५ व्युत्पत्तिवादः । श्रीमद्गदाधरभट्टाचार्यचक्रवर्तिविरचितः । वैयाकरण[illegible] [illegible] [[illegible]-[illegible]] [illegible] टीका सहितः । (न्या. वि. ११) ६०

११६ [illegible] । [illegible] विरचिता । न्यायाचार्य पं० [illegible] [illegible] विषम[illegible] [illegible] । [illegible] द्वितीयाध्यायस्य द्वितीयपादान्तो [illegible] भागः । ६०

११७ [illegible] । [illegible]-[illegible]-[illegible] । [illegible] पं० [illegible] [illegible] विरचितः । ([illegible]. वि. [illegible]) [illegible]